Digitized by Sarayu Trust Foundation Delhi and eGangotri.

महा रुद्र यज्ञ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ नमः शिवाय



महा रुद्र यज्ञ

CC0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection.

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

Published by :
"Bala" @ V. Balachander
on behalf of
Sree Vinayaka Mandir Committee
AB-Block, Vinayaka Mandir Marg,
Sarojini Nagar,
New Delhi-110023 (India)
Tel. : 011-24670924

Dedicated to Lord Sree Vinayaka
on the occasion of
15th Maha Rudra Yagnam
from 9th to 11th April, 2004

Typeset at :
Khanoliya Enterprises
New Delhi-110045

Printed at :
Prince Print Process ✆ 27462938

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

Maha Rudra Yagnam

The Vedas are supreme among the various forms of knowledge and Vedas have to be learnt and understood for their own sake without expecting any reward. That is why our ancients had thought best to utilise various portions of the Veda Mantras for purposes of rituals and ceremonies for conferring spiritual as well as material benefits on mankind since they knew that very few people would learn Vedas merely for their own sake in these days.

The word Shiva is considered by the sages as 'JIVARATNA' or the jewel of life.

That life jewel praised by all the Vedas; and also called Sankara, Tryambaka etc., is the only refuge for all living beings and gives all happiness in life. To worship such an incomparable form, all devotees of Shiva used to observe the following five rules.

(1) Rudraksha Dharanam; (2) Bhasma Dharanam in the prescribed manner; (3) Panchakshara Mantra Japa by those who have been initiated by a Guru or Shiva Nama Japa by those not initiated into the Mantra, (4) Performing daily Panchayatana Puja and (5) Meditating constantly on Sadashiva.

Ancient sages and saints have prescribed several ceremonies and austerities where Vedic Mantras are used for worship. One of such Mantras of high potency

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

and power in called SRI RUDRAM of Taitriya Samhita of Sri Krishna Yajurveda. Samhita consists of seven 'cantos' containing 44 Chapters or 'Prasnas'. In the middle of 4th Canto of this Samhita 'SRI RUDRAM' is the fifth chapter (Prasna). This chapter is divided into 11 'Anuvakas' or paragraphs. It is a prayer to Lord Shiva praising His various attributes and qualities. The importance of Sri Rudram is that it occurs in the middle of the Taittiriya Samhita of and in the central portion of Sri Rudram is to be found the greatest of the Mantras viz. 'THE PANCHAKSHARA MANTRA'. Sri Rudram is therefore the holiest of holy Mantras. It is also called Namaha Prasnam as the word 'NAMAH' occurs several times. It is also known as Satarudriyam. It is recited not only for one's own purification and attainment of higher spiritual knowledge but also for bringing welfare to oneself and to the country as a whole. To preserve the maximum power and efficacy of the Mantras, the method of chanting has also been prescribed. Even the mere recitation with devotion and repetition of Sri Rudra Prasna is believed to please Lord Shiva. Traditionally, the seventh chapter of the 4th Cantos of Taittiriya Samhita called the CHAMAKA Prasnam is also recited along with Sri Rudra Prasnam in which there is a prayer for seeking material benefits ranging from material needs such as food to eat, to achieve ultimate salvation. Sanyasis are not used to recite this Chamaka Prasna as naturally they have no need for material benefits.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

Constant repetition of Rudra Mantras in the prescribed manner is called JAPA YAGNA.This Japa Yagna is followed by Abhisheka to Lord Shiva, Havan and Archana by which the efficacy of the Japa Yagna is enchanced.

Sri Rudra Japam is normally done after an elaborate Anganyasa which is called MAHANYASA. Sri Rudram is then chanted eleven times and at the end, one Anuvaka of Chamaka Prasnam is chanted. Thus when Sri Rudram is chanted 11 times, Chamakam is chanted once in full; i.e., the first eleven anuvakas of the seventh prasna of the 4th canto of Taitriya Samhita.

Simultaneously, Abhishekam is also performed on a 'Shivalinga' chanting Sri Rudra eleven times and Chamaka once. The significance is that, the eleven forms of Lord Shiva viz: Mahadeva, Shiva, Rudra, Sankara, Neelalohita, Easana, Vijaya, Bhima, Devadeva, Bhavodhbhava and Adityatma Rudra, are invoked in eleven Kalasas (Kumbham) when eleven Pundits chant Sri Rudra Mantra eleven times each according to the above procedure followed by one anuvaka of chamaka. Then Havan is performed chanting Chamaka prasna in full and pouring pure cow's ghee into the fire in one unbroken stream called 'VASORDHARA'. Abhishekam is also performed with the water sanctified in the eleven Kumbhams to the Lord while the same is also sprinkled on all the devotees assembled to witness the Maharudra Yagna. Then Archana is performed with flowers and

CC0. In Public Domain. Kirtikant Sharma Rajagarh Delhi Collection.

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

'Bilwa' leaves with various Mantras. The Yagna is then concluded with Mangala Harati and Mantra Pushpanjali.

In this Rudrikadasini, as it is called, Sri Rudra Mantra is chanted 121 times by the 11 pundits each chanting 11 times and the chamaka Mantra is chanted 11 times, each pundit chanting once in addition to the chant required for Abhisheka, Archana and Havan. ELEVEN such RUDRIKADASINIS are required to be performed for a MAHA RUDRA YAGNA; i.e., 11 pundits duly initiated and trained in Vedas and knowing the various Mantras required for chanting according to the proper Swaras. At the time of Rudra Japa, there should be purity in all the three Karanas—Mano Vak and Kaya—Mind, speech and body. The body should be clean after bath and sacred Bhasma should adorn the body along with Rudraksha beads. To prevent laziness, indifference, inattention and tendency to sleep, preferably one should not take any food before chanting the Mantras. The Maharudram is usually done for 11 days but to save time according to local condtions, it may be done in 4 or 5 days according to the availability of Pundits, time and resources. Altematively, 11 groups (GHANAS) of 11 Vedic Pundits each can conduct the Maharudra Yagna in one day also, each group performing one RUDRIKADASINI.

Eleven such Maharudra Yagna performed without break i.e., 121 Rudrikadasinis will be required for one ATI RUDRA MAHA YAGNA. These 121 Rudrikadasinis can be performed by 121 Vedic Pundits for eleven days

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

consecutively or 11 Vedic Pundits consecutively for 121 days. What is important is the total number of times the Rudra Mantras are chanted accompanied by the Chamaka Mantras. The number of days and the number of Pundits may be modified according to convenience. But this modification has to be done only according to the prescribed procedure so that the essentials are not left out.

The greatness of these Mantras and the unique benefits which flow from the performance of Yagnas to the accompaniment of such Mantras have been described in detail in the ancient text 'SIVA RAHASYA'. To quote some of them:

(a) Performance of Karma Kanda rituals lead to the cleaning of the mind as a preparatory to the acquisition of Brahma Vidya.

(b) Expiation of sins and removal of obstacles to progress and prosperity.

(c) Securing ultimate salvation.

The superior excellence of SRI RUDRA MANTRAS have been brought out in the SUTA SAMHITA in SKANDA PURANA.

Satarudriyam occurs in all the 100 sakhas of Yajurveda and by the mere chanting, all one's sins are destroyed.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

The SMRITIS also refer to Sri Rudra as a panacea for the expiation of unrighteous acts. e.g., the Smiritis of Satatapah, Atri and Yagnavalkya.

Bodayana prescribes Rudra Japa with Mahanyasa for one who is a Papakashayarthi, Vyadhimochanarthi, SRIKAMAH, SANTIKAMAH, Ayushyakamah and Aroghyakamah i.e., who wants atonement from sins, relief from disease, wealth, long life and sound health with peace.

The chanting of Sri Rudra is prescribed for Sanyasins also.

In Hari Vamsa there is a reference to Sri Krishna having perfromed Rudra Japa. Although in reality, there is no need for Sri Krishna for performing any Japa, yet He resorted to the same for the benefit of the people at large.

LOKAH SAMASTHAH SUKHINO BHAVANTU

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अनुक्रमः

1.	स्वस्ति वाचनम् (प्रार्थना)	1
	गणपति अथर्व शीर्षोपनिषत्	
	पुरुषसूक्तम्	5
	नारायणसूक्तम्	8
	विष्णुसूक्तम्	9
	श्रीसूक्तम्	11
	भूसूक्तम्	15
	नीळासूक्तम्	15
	दुर्गासूक्तम्	17
	मेधासूक्तम्	18
	देवी सूक्तम्	20
	भाग्यसूक्तम्	21
2.	अनुज्ञा	22
3.	विघ्नेश्वर पूजा	23
4.	संकल्पः	28
5.	ग्रह प्रीतिः	38
	गो दानं	38

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

6.	नान्दी श्राद्धम्	39
	वैष्णव श्राद्धम्	40
	पूतत्व कृच्छ्रम्	41
	दश दानं	42
7.	पुण्याह वाचनम्	44
8.	आचार्य वरणम्	50
	कलशादि पूजा	50
9.	महान्यासः	54
10.	महादेवादीनां श्रीरुद्र विधान पूजा	99
11.	श्री रुद्रत्रिशती	111
	प्रदक्षिणमन्त्राः	125
	नमस्कारमन्त्राः	127
12.	चमकानु वाकेन प्रार्थना	129
13.	श्रीरुद्र प्रश्नः	135
14.	चमक प्रश्नः	147
15.	अग्निमुखं श्रीरुद्र होमः	154
16.	त्रेधा विभागः	169
17.	षोढा विभागः	170

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

18.	षोडशधा विभागः	170
19.	अष्टा चत्वारिंशद्धा विभागः	171
20.	एकोन सप्तत्यधिकशतधा विभागः	171
21.	श्रीरुद्र क्रमपाठः	172
	चमक क्रमपाठः	197
22.	बिल्वाष्टोत्तर स्तोत्रं	211
23.	शिव पञ्चाक्षर स्तोत्रं	226
24.	लिङ्गाष्टकम्	227
25.	दुर्गाष्टात्तर शत नामावळिः	228
26.	दक्षिणा मूर्ति अष्टोत्तर शत नामावळिः	232
27.	नवग्रह सूक्तम्	235
28.	नक्षत्र सूक्तम्	239
29.	पञ्च शान्तिः	250

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ नमो भगवते रुद्राय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वस्ति वाचनम् (प्रार्थना)

गणानां त्वा गणपतिꣳ हवामहे कविं कवीना-मुपमश्र वस्तमम्। ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूति-भिस्सीद सादनम्॥ महागणपतये नमः॥

गणपत्यथर्वशीर्षोपनिषत्

ॐ भद्रं कर्णेभिः शृणुयाम देवाः। भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवाग्ं सस्तनूभिः। व्यशेम देवहितं यदायुः। स्वस्ति न इन्द्रो वृद्धश्रवाः। स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः। स्वस्ति नो बृहस्पतिर्दधातु॥

ॐ शान्तिः शान्तिः शान्तिः॥

ॐ नमस्ते गणपतये। त्वमेव प्रत्यक्षं तत्त्वमसि। त्वमेव केवलं कर्ताऽसि। त्वमेव केवलं धर्ताऽसि। त्वमेव केवलं हर्ताऽसि। त्वमेव सर्वं खल्विदं ब्रह्मासि। त्वं साक्षादात्माऽसि नित्यम्॥१॥

ऋतं वच्मि। सत्यं वच्मि॥२॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अव त्वं माम्। अव वक्तारम्। अव श्रोतारम्। अव दातारम्। अव धातारम्। अवानूचानमव शिष्यम्। अव पश्चात्तात्। अव पुरस्तात्। अवोत्तरात्तात्। अव दक्षिणात्तात्। अव चोर्ध्वात्तात्। अवाधरात्तात्। सर्वतो मो पाहि पाहि समन्तात्॥ ३॥

त्वं वाङ्मयस्त्वं चिन्मयः। त्वमानन्दमयस्त्वं ब्रह्ममयः। त्वं सच्चिदानन्दाऽद्वितीयोऽसि। त्वं प्रत्यक्षं ब्रह्मासि। त्वं ज्ञानमयो विज्ञानमयोऽसि॥४॥

सर्वं जगदिदं त्वत्तो जायते। सर्वं जगदिदं त्वत्तस्तिष्ठति। सर्वं जगदिदं त्वयि लयमेष्यति। सर्वं जगदिदं त्वयि प्रत्येति। त्वं भूमिरापोऽनलोऽनिलो नभः। त्वं चत्वारि वाक्पदानि॥ ५॥

त्वं गुणत्रयातीतः। त्वं अवस्थात्रयातीतः। त्वं देहत्रयातीतः। त्वं कालत्रयातीतः। त्वं मूलाधारस्थितोऽसि नित्याम्। त्वं शक्तित्रयात्मकः। त्वां योगिनो ध्यायन्ति नित्यम्। त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्म भूर्भुवः स्वराम्॥ ६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गणादिं पूर्वमुच्चार्य वर्णादीं स्तदनन्तरम्। अनुस्वारः परतरः। अर्धेदुलसितम्। तारेण ऋद्धम्। एतत्तव मनुस्वरूपम्।

गकारः पूर्वरूपम्। अकारो मध्यमरूपम्। अनुस्वारश्चान्त्यरूपम्। बिन्दुरुत्तररूपम्। नादः सन्धानम्। सगंहिता सन्धिः। सैषा गणेशविद्या। गणक ऋषिः। निचृद्गायत्रीच्छन्दः। गणपतिर्देवता। ॐ गं गणपतये नमः॥ ७॥

एकदन्ताय विद्महे वक्रतुण्डाय धीमहि। तन्नो दन्तिः प्रचोदयात्॥ ८॥

एकदन्तं चतुर्हस्तं पाशमङ्कुशधारिणम्। रदं च वरदं हस्तैर्बिभ्राणं मूषकध्वजम्॥ रक्तं लम्बोदरं शूर्पकर्णकं रक्तवाससम्। रक्तगन्धानुलिप्ताङ्गं रक्तपुष्पैः सुपूजितम्॥ भक्तानुकम्पिनं देवं जगत्कारणमच्युतम्। आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्परम्॥ एवं ध्यायति यो नित्यं स योगी योगिनां वरः॥ ९॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नमो व्रातपतये। नमो गणपतये। नमः प्रमथपतये। नमस्तेऽस्तु लम्बोदरायैकदन्ताय विघ्ननाशिने शिवसुताय वरदमूर्तये नमः ॥१०॥

एतदथर्वशीर्षं योऽधीते स ब्रह्मभूयाय कल्पते। स सर्वविघ्नैर्न बाध्यते। स सर्वत्र सुखमेधते। स पञ्चमहापापात् प्रमुच्यते। सायमधीयानो दिवसकृतं पापं नाशयति। प्रातरधीयानो रात्रिकृतं पापं नाशयति। सायं प्रातः प्रयुञ्जानो पापोऽपापो भवति। सर्वत्राधीयानोऽपविघ्नो भवति। धर्मार्थकाममोक्षं च विन्दति।

इदमथर्वशीर्षमशिष्याय न देयम्। यो यदि मोहाद् दास्यति स पापीयान् भवति।

सहस्रावर्तनाद्यं यं काममधीते तं तमनेन साधयेत्॥ ११॥

अनेन गणपतिमभिषिञ्चति स वाग्मी भवति। चतुर्थ्यामनश्नन् जपति स विद्यावान् भवति। इत्यथर्वणवाक्यम्। ब्रह्माद्यावरणं विद्यान्न बिभेति कदाचनेति॥ १२॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यो दूर्वाङ्कुरैर्यजति स वैश्रवणोपमो भवति। यो लाजैर्यजति स यशोवान् भवति। स मेधावान् भवति। यो मोदकसहस्रेण यजति स वाञ्छितफलमवाप्नोति। यःसाज्यसमिद्भिर्यजति स सर्वं लभते स सर्वं लभते॥ १३॥

अष्टौ ब्राह्मणान् सम्यग् ग्राहयित्वा सूर्यवर्चस्वी भवति। सूर्यग्रहे महानद्यां प्रतिमासन्निधौ वा जप्त्वा सिद्धमन्त्रो भवति। महाविघ्नात् प्रमुच्यते। महादोषात् प्रमुच्यते। महाप्रत्यवायात् प्रमुच्यते। स सर्वविद्भवति। स सर्वविद् भवति। य एवं वेद। इत्युपनिषत्॥ १४॥

ॐ शान्तिः शान्तिः शान्तिः॥

पुरुषसूक्तम्

ॐ सहस्रशीर्षा पुरुषः। सहस्राक्षः सहस्रपात्। स भूमिं विश्वतो वृत्वा। अत्यतिष्ठद्दशाङ्गुलम्। पुरुष एवेदगँ सर्वम्। यद्भूतं यच्च भव्यम्। उतामृतत्वस्येशानः। यदन्नेनातिरोहति। एतावानस्य महिमा। अतो ज्यायागंश्च पूरुषः॥ १॥ पादोऽस्य विश्वा भूतानि। त्रिपादस्यामृतं दिवि। त्रिपादूर्ध्व उदैत्पुरुषः। पादोऽस्येहाऽऽभवात्पुनः। ततो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विष्वङ्व्यक्रामत्। साशनानशने अभि। तस्मा" द्विराडजायत। विराजो अधि पूरुषः। स जातो अत्यरिच्यत। पश्चाद्भूमिमथो पुरः॥ २॥ यत्पुरुषेण हविषा"। देवा यज्ञमतन्वत। वसन्तो अस्यासीदाज्यम्"। ग्रीष्म इध्मश्शरद्धविः। सप्तास्यासन्परिधयः। त्रिः सप्त समिधः कृताः। देवा यद्यज्ञं तन्वानाः। अबध्नन्पुरुषं पशुम्। तं यज्ञं बरहिषि प्रौक्षन्। पुरुषं जातमग्रतः॥ ३॥ तेन देवा अयजन्त। साध्या ऋषयश्च ये। तस्मा" द्यज्ञात्सर्वहुतः। संभृतं पृषदाज्यम्। पशूगंस्तागंश्चक्रे वायव्यन्। आरण्यान्ग्राम्याश्च ये। तस्मा" द्यज्ञात्सर्वहुतः। ऋचः सामानि जज्ञिरे। छन्दागंसि जज्ञिरे तस्मा"त्। यजुस्तस्माद-जायत॥४॥ तस्मादश्वा अजायन्त॥ ये के चोभयादतः। गावो ह जज्ञिरे तस्मा"त्। तस्मा"ज्जाता अजावयः। यत्पुरुषं व्यदधुः। कतिधा व्यकल्पयन्। मुखं किमस्य कौ बाहू। कावूरू पादावुच्येते। ब्राह्मणो"ऽस्य मुखमासीत्। बाहू राजन्यः कृतः॥ ५॥

ऊरू तदस्य यद्वैश्यः पद्भ्यागं शूद्रो अजायत। चन्द्रमा मनसो जातः। चक्षोः सूर्यो अजायत। मुखादिन्द्रश्चाग्निश्च। प्राणाद्वायुरजायत। नाभ्या आसीदन्तरिक्षम्। शीर्ष्णो द्यौः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

समवर्तत। पद्भ्यां भूमिर्दिशः श्रोत्रात्। तथा लोकाग्ं अकल्पयन्॥ ६॥ वेदाहमेतं पुरुषं महान्तम्। आदित्यवर्णं तमसस्तुपारे। सर्वाणि रूपाणि विचित्य धीरः। नामानि कृत्वाऽभिवदन् यदास्ते। धाता पुरस्ताद्यमुदाजहार। शक्रः प्रविद्वान्प्रदिशश्चतस्रः। तमेवं विद्वानमृत इह भवति। नान्यः पन्था अयनाय विद्यते। यज्ञेन यज्ञमयजन्त देवाः। तानि धर्माणि प्रथमान्यासन्। ते ह नाकं महिमानः सचन्ते। यत्र पूर्वे साध्याः सन्ति देवाः॥ ७॥

अद्भ्यः संभूतः पृथिव्यै रसाच्च। विश्वकर्मणः समवर्तताधि। तस्य त्वष्टा विदधद्रूपमेति। तत्पुरुषस्य विश्वमाजानमग्रे। वेदाहमेतं पुरुषं महान्तम्। आदित्यवर्णं तमसः परस्तात्। तमेवं विद्वानमृत इह भवति। नान्यः पन्था विद्यतेऽयनाय। प्रजापतिश्चरति गर्भे अन्तः। अजायमानो बहुधा विजायते॥ ८॥

तस्य धीराः परिजानन्ति योनिम्। मरीचीनां पदमिच्छन्ति वेधसः। यो देवेभ्य आतपति। यो देवानां पुरोहितः। पूर्वो यो देवेभ्यो जातः। नमो रुचाय ब्राह्मये। रुचं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ब्राह्मं जनयन्तः। देवा अग्रे तदब्रुवन्। यस्त्वैवं ब्राह्मणो विद्यात्। तस्य देवा असन् वशे ॥ ९ ॥

हीश्च ते लक्ष्मीश्च पत्न्यौ। अहोरात्रे पार्श्वे। नक्षत्राणि रूपम्। अश्विनौ व्यात्तम्। इष्टं मनिषाण। अमुं मनिषाण। सर्वं मनिषाण॥ १० ॥

नारायणसूक्तम्

सहस्रशीर्षं देवं विश्वाक्षं विश्वशंभुवम्। विश्वं नारायणं देवमक्षरं परमं पदम्। विश्वतः परमान्नित्यं विश्वं नारायणगं् हरिम्। विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति। पतिं विश्वस्यात्मेश्वरगं् शाश्वतगं् शिवमच्युतम्। नारायणं महाज्ञेयं विश्वात्मानं परायणम्। नारायणपरो ज्योतिरात्मा नारायण परः। नारायणपरं ब्रह्म तत्त्वं नारायणः परः। नारायणपरो ध्याता ध्यानं नारायणः परः। यच्च किञ्चिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा॥ अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः। अनन्तमव्ययं कविगं् समुद्रेऽन्तं विश्वशंभुवम्। पद्मकोशप्रतीकाशगं् हृदयं चाप्यधोमुखम्। अधो निष्ट्या वितस्त्यान्ते नाभ्यामुपरि तिष्ठति। ज्वालमालाकुलं भाती

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विश्वस्यययतनं महत्। सन्ततगं शिलाभिस्तु लम्बत्या-कोशसन्निभम्। तस्यान्ते सुषिरगं सूक्ष्मं तस्मिन् सर्वं प्रतिष्ठितम्। तस्य मध्ये महानग्निर्विश्वार्चिर्विश्वतोमुखः। सोऽग्रभुग्विभजन्तिष्ठ-न्नाहारमजरः कविः। तिर्यगूर्ध्वमध-श्शायी रश्मयस्तस्य सन्तता। सन्तापयति स्वं देहमापाद-तलमस्तकः। तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थितः। नीलतोयद-मध्यस्था-द्विद्युल्लेखेव भास्वरा। नीवारशू-कवत्तन्वी पीता भास्वत्यणूपमा। तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः। स ब्रह्म स शिवः स हरिः सेन्द्रः सोऽक्षरः परमः स्वराट्॥

ऋतगं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्। ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः॥

ॐ नारायणाय विद्महे वासुदेवाय धीमहि। तन्नो विष्णुः प्रचोदयात्॥

विष्णुसूक्तम्

ॐ विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजागंसि यो अस्कभायदुत्तरगं सदस्थं विचक्रमाणस्त्रेधो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रुगायो विष्णो रराटमसि विष्णोः पृष्ठमसि विष्णोः श्नप्त्रे स्थो विष्णो स्स्यूरसि विष्णो र्ध्रुवमसि वैष्णवमसि विष्णवे त्वा॥

तदस्य प्रियमभिपाथो अश्याम्। नरो यत्र देवयवोमदन्ति। उरुक्रमस्य सहिबन्धुरित्था। विष्णोः पदे परमे मध्व उथ्सः। प्रतद्विष्णु स्स्तवते वीर्याय। मृगो न भीमः कुचरो गिरिष्ठाः। यस्योरुषु त्रिषु विक्रमणेषु। अधिक्षियन्ति भुवनानि विश्वा। परो मात्रया तनुवा वृधान। न ते महित्वमन्वश्नुवन्ति।

उभेते विद्म रजसी पृथिव्या विष्णो देवत्वम्। परमस्य विथ्से। विचक्रमे पृथिवी मेष एताम्। क्षेत्राय विष्णुर्मनुषे दशस्यन्। ध्रुवासो अस्य कीरयो जनासः। ऊरुक्षितिगं् सुजनिमाचकार। त्रिर्देवः पृथिवीमेष एताम्। विचक्रमे शतर्चसं महित्वा। प्रविष्णुरस्तु तवसस्तवीयान्। त्वेषग्गं्ह्यस्य स्थविरस्य नाम।

अतो देवा अवन्तुनो यतो विष्णु-र्विचक्रमे। पृथिव्यस्सप्तधामभिः। इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्यपांग् सुरे। त्रीणि पदा विचक्रमे विष्णुर्गोपा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अदा"भ्यः। ततो धर्मा"णि धारयन्। विष्णोः कर्मा"णि पश्यत यतो" व्रतानि" पस्पशे। इन्द्रस्य युज्यस्सखा" ॥

तद्विष्णो" : परमं पदगं् सदा" पश्यन्ति सूरयः। दिवीव चक्षुराततम्। तद्विप्रा"सो विपन्यवो" जागृवागं् सस्समिन्धते। विष्णो र्यत्परमं पदम्॥

पर्या"प्त्या अनन्तरायाय सर्व"स्तोमोऽति रात्र उत्तममह"र्भवति सर्वस्याप्त्यै सर्व"स्यजित्त्यै सर्व"मेव तेना"प्नोति सर्व" जयति॥

श्रीसूक्तम्

ॐ॥ हिर"ण्यवर्णां हरिणीं सुवर्ण"रजतस्त्रजाम्। चन्द्रां हिरण्मयीं लक्ष्मीं जात"वेदो म आव"ह॥ तां म आवह जात"वेदो लक्ष्मीमन"पगामि"नीम्। यस्यां हिर"ण्यं विन्देयं गामश्वं पुरुषानहम्॥ अश्वपूर्वां रथमध्यां हस्तिना"द-प्रबोधिनीम्। श्रियं देवीमुपह्वये श्रीर्मा देवीजुषताम्॥ का"सोस्मितां हिर"ण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्। पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम्। चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम्। तां पद्मिनीमीं शरणमहं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रपद्येऽअलक्ष्मीर्मे नश्यतां त्वां वृणे॥ आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः। तस्य फलानि तपसा नुदन्तु मायान्तरायश्च बाह्या अलक्ष्मीः॥ उपैतु मां देवसखः कीर्तिश्च मणिना सह। प्रादुर्भूतोस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे॥ क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम्। अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात्॥ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीगं् सर्वभूतानां तामिहोपह्वये श्रियम्। मनसः काममाकूतिं वाचः सत्यमशीमहि। पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः॥ कर्दमेन प्रजाभूता मयि संभव कर्दम। श्रियं वासय मे कुले मातरं पद्ममालिनीम्॥ आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे। निच देवीं मातरं श्रियं वासय मे कुले। आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां हेममालिनीम्। सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह॥ आर्द्रां यः करिणीं यष्टिं पिङ्गलां पद्ममालिनीम्। चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह। तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्। यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान्विन्देयं पुरुषानहम्॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यः शुचिः प्रयतो भूत्वा जुहुयाद्दाज्यमन्वहम्। श्रियः पञ्चदशर्चं च श्रीकामः सततं जपेत्। पद्मानने पद्म ऊरू पद्माक्षी पद्मसंभवे। त्वं मां भजस्व पद्माक्षी येन सौख्यं लभाम्यहम्॥ अश्वदायी गोदायी धनदायी महाधने। धनं मे जुषतां देवि सर्वकामांश्च देहि मे॥ पुत्र पौत्रधनं धान्यं हस्त्यश्वादिगवे रथम्। प्रजानां भवसि माता आयुष्मन्तं करोतु माम्॥ धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः। धनमिन्द्रो बृहस्पतिर्वरुणं धनमस्तु ते॥ वैनतेय सोमं पिब सोमं पिबतु वृत्रहा। सोमं धनस्य सोमिनो मह्यं ददातु सोमिनः॥ न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः। भवन्ति कृतपुण्यानां भक्तानां श्रीसूक्तं जपेत्सदा॥ वर्षन्तु ते विभावरि दिवो अभ्रस्य विद्युतः। रोहन्तु सर्वबीजान्यव ब्रह्म द्विषो जहि॥ पद्मप्रिये पद्मिनि पद्महस्ते पद्मालये पद्मदलायताक्षि। विश्वप्रिये विष्णु मनोऽनुकूले त्वत्पादपद्मं मयि सन्निधस्त्वा॥ या सा पद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी। गम्भीरा वर्तनाभिः स्तनभर नमिता शुभ्र वस्त्रोत्तरीया॥ लक्ष्मीर्दिव्यै र्गजेन्द्रैर्मणिगण खचितै स्स्नापिता हेमकुम्भैः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नित्यं सा पद्महस्ता मम वसतु गृहे सर्वमाङ्गल्ययुक्ता॥

लक्ष्मीं क्षीरसमुद्र राजतनयां श्रीरंगधामेश्वरीम्। दासीभूतसमस्त देव वनितां लोकैक दीपांकुराम्। श्रीमन्मन्दकटाक्षलब्ध विभव ब्रह्मेन्द्रगंगाधरां। त्वां त्रैलाक्य कुटुम्बिनीं सरसिजां वन्दे मुकुन्दप्रियाम्॥

सिद्धिलक्ष्मीर्मोक्षलक्ष्मी र्जयलक्ष्मीस्सरस्वती। श्रीलक्ष्मीर्वरलक्ष्मीश्च प्रसन्ना मम सर्वदा। वरांकुशौ पाशमभीतिमुद्रां करैर्वहन्तीं कमलासनस्थाम्। बालार्क कोटि प्रतिभां त्रिणेत्रां भजेहमाद्यां जगदीश्वरीं त्वाम्॥

सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थ साधिके। शरण्ये त्रयम्बके देवि नारायणि नमोऽस्तु ते॥

सरसिज-निलये सरोजहस्ते धवलतरांशुक गन्धमाल्य-शोभे। भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम्।

विष्णुपत्नीं क्षमां देवीं माधवीं माधवप्रियाम्। विष्णोः प्रियसखीं देवीं नमाम्यच्युत-वल्लभाम्॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

महालक्ष्मी च विद्महे विष्णुपत्नी च धीमहि। तन्नो लक्ष्मीः प्रचोदयात्। श्री-वर्चस्य-मायुष्य-मारोग्य माविधात् पवमानं महीयते। धनं धान्यं पशुं बहुपुत्रलाभं शतसंवत्सरं धीर्घमायुः। ऋणरोगादि-दारिद्य-पापक्षुदपमृत्यवः। भयशोकमनस्तापा नश्यन्तु मम सर्वदा॥

श्रियै जात श्रिय आनिर्याय श्रियं वयो जनितृभ्यो दधातु। श्रियं वसाना अमृतत्वमायन् भजंति सद्यः सविता विदध्यून्॥ श्रिय एवैनं तच्छ्रियामादधाति। सन्ततमृचा वषट्कृत्यंसन्धत्तं संधीयते प्रजया पशुभिः। य एवं वेद। ॐ महादेव्यै च विद्महे विष्णुपत्नी च धीमहि। तन्नो लक्ष्मीः प्रचोदयात्॥ (ऋ.सं. अष्टकम्. ४अ. ४परि. सू.११)

भूसूक्तम्

तैत्तिरीय संहिता. काण्डम्-१ प्रपाठक. ५ अनुवाक. ३तैत्तिरीय ब्राह्मणम् अष्टकम्. ३ प्रश्न. १ अनुवाक. २

ॐ॥ भूमिर्भूम्नाद्यौर्वरिणान्तरिक्षं महित्वा। उपस्थे ते देव्यदिते ऽग्निमन्नाद-मन्नाद्यायादधे। आऽयङ्गौः पृश्निरक्रमीदसनन्मातरं पुनः। पितरं च प्रयन्त्सुवः। त्रिगुंशद्धाम विराजति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वाक्पतङ्गाय शिश्रिये। प्रत्यस्य वह द्युभिः। अस्य प्राणादपानत्यन्तश्चरति रोचना। व्यख्यन् महिषः सुवः। यत्त्वा क्रुद्धः परोवपमन्युना यदवर्त्या। सुकल्पमग्ने तत्तव पुनस्त्वोद्दीपयामसि। यत्ते मन्युपरोप्तस्य पृथिवीमनुदध्वसे। आदित्या विश्वे तद्देवा वसवश्च समाभरन्। मनो ज्योतिर्जुषता माज्यं विच्छिन्नं यज्ञँ समिमं दधातु। बृहस्पतिस्तनुता-मिमन्नोविश्वे देवा इहमादयन्ताम्।

मेदिनी देवी वसुंधरा स्याद्वसुधा देवी वासवी। ब्रह्मवर्चसः पितृणागं श्रोत्रं चक्षुर्मनः। देवी हिरण्यगर्भिणी देवी प्रसूवरी। सदने सत्यायने सीद॥ समुद्रवती सावित्रीह नो देवी मह्यङ्गी। महीधरणी महोव्यथिष्ठा श्शृङ्गे शृङ्गे यज्ञे यज्ञे विभीषिणी। इन्द्रपत्नी व्यापिनी सुरसरिदिह। वायुमती जलशयनीश्रियंधाराजा सत्यन्धो परिमेदिनी। श्वोपरिधत्तं परिगाय।

विष्णुपत्नीं महीं देवीं माधवीं माधवप्रियाम्। लक्ष्मीं प्रियसखीं देवीं नमाम्यच्युत वल्लभाम्।

ॐ धनुर्धरायै विद्महे सर्वसिद्ध्यै च धीमहि। तन्नो धरा प्रचोदयात्। महीं देवीं विष्णुपत्नी मजूर्याम्। प्रतीची मेनागं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हविषा यजाम्। त्रेधा विष्णुरुरुगायो विचक्रमे। महीं दिवं पृथिवीमन्तरिक्षम्। तच्छ्रोणैति श्रव इच्छमाना। पुण्यग्गं श्लोकं यजमानाय कृण्वती॥ ॐ शान्तिः शान्तिः शान्तिः॥

नीळासूक्तम्

तैत्तिरीय संहिता. काण्डम्. ४ प्रपाठक. ४ अनुवाक. १२

ॐ॥ गृणाहि। घृतवती सवितराधिपत्यैः पयस्वतीरन्ति-राशानो अस्तु। ध्रुवा दिशां विष्णुपत्यघोरा-ऽस्येशानासहसोया मनोता"। बृहस्पति र्मातरिश्वोत वायुस्सन्धुवानावाता अभि नो गृणन्तु। विष्टम्भो दिवोधरुणः पृथिव्या अस्येश्याना जगतो विष्णुपत्नी॥

दुर्गासूक्तम्

तैत्तिरीयारण्यकम्: ४ प्रपाठकः १० अनुवाकः२

ॐ॥ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः। स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः॥ तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टा"म्। दुर्गां देवीगं शरणामहं प्रपद्ये सुतरसितरसे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नमः॥ अग्ने त्वं पारया नव्यो अस्मान्स्वस्तिभिरति दुर्गाणि विश्वा। पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शंयोः॥ विश्वानि नो दुर्गहा जातवेदः सिन्धुन्न नावा दुरितातिपर्षि। अग्ने अत्रिवन्मनसा गृणानोऽस्माकं बोध्यविता तनूनाम्॥ पृतनाजितगं सहमानमुग्रमग्निगं हुवेम परमात्सधस्थात्। स नः पर्षदतिदुर्गाणि विश्वाक्षामद्देवो अति दुरितात्यग्निः॥ प्रत्नोषि कमीड्यो अध्वरेषु सन्नाच्च होता नव्यश्च सत्सि। स्वाञ्चाऽग्ने तनुवं पिप्रयस्वास्मभ्यं च सौभगमायजस्व॥ गोभिर्जुष्टमयुजो निषिक्तं तवेन्द्र विष्णोरनुसंचरेम। नाकस्य पृष्ठमभिसंवसानो वैष्णवीं लोक इह मादयन्ताम्॥

ॐ कात्यायनाय विद्महे। कन्यकुमारि धीमहि। तन्नो दुर्गिः प्रचोदयात्॥ ॐ शान्तिः शान्तिः शान्तिः॥

मेधासूक्तम्

तैत्तिरीयारण्यकम्: ४ प्रपाठकः १० अनुवाकः ४१-४४

ॐ यश्छन्दसा-मृषभो विश्वरूपः। छन्दोभ्योऽध्यामृतात्संबभूव। स मेन्द्रो मेधया स्पृणोतु। अमृतस्य

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

देवधारणो भूयासम्। शरीरं मे विचर्षणम्। जिह्वा मे मधुमत्तमा। कर्णाभ्यां भूरिविश्रुवम्। ब्रह्मणः कोशोसि मेधया पिहितः। श्रुतं मे गोपाय।

ॐ शान्तिः शान्तिः शान्तिः॥

ॐ मेधादेवी जुषमाणा न आगा-द्विश्वाची भद्रा सुमनस्य माना। त्वया जुष्टा नुदमाना दुरुक्ता न् बृहद्वदेम विदथे सुवीराः। त्वया जुष्ट ऋषि-र्भवति देवि त्वया ब्रह्माऽऽगतश्री-रुत त्वया। त्वया जुष्ट-श्चित्रं विन्दते वसु सानो जुषस्व द्रविणो न मेधे॥

मेधां म इन्द्रो ददातु मेधां देवी सरस्वती। मेधां मे अश्विनावुभावाधत्तां पुष्करस्त्रजा। अप्सरासु च या मेधा गन्धर्वेषु च यन्मनः। दैवीं मेधा सरस्वती सा मां मेधा सुरभि-र्जुषतागुं स्वाहा॥

आमां मेधा सुरभि-र्विश्वरूपा हिरण्यवर्णा जगती जगम्या। ऊर्जस्वती पयसा पिन्वमाना सामां मेधा सुप्रतीका जुषन्ताम्॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु मयि मेधां मयि प्रजां मयीन्द्र इन्द्रियं दधातु मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु॥

देवीसूक्तम्

ऋग्वेद-संहिताः मण्डलम्-१० अष्टकम्-८ सूक्तम्-१२५

ॐ॥ अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः॥ अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा॥ १॥ अहं सोममाहनसं बिभर्म्यहं त्वष्टारमुत पूषणं भगम्॥ अहं दधामि द्रविणं हविष्मते सुप्राव्येए३यजमानाय सुन्वते॥ २॥ अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम्। तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयन्तीम्॥३॥ मया सोऽअन्नमत्ति यो विपश्यति यः प्राणिति यईं शृणोत्युक्तम्। अमन्तवोमान्त उपक्षियन्ति श्रुधिश्रुत श्रद्धिवंते वदामि॥४॥ अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः। यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम्॥५॥ अहं रुद्राय धनुरातनोमि ब्रह्मद्विषे शरवेहन्त वा उ। अहं जनाय समदं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कृणोम्यहं द्यावा पृथिवी आविवेश ॥ ६ ॥ अहं सुवे पितरमस्य मूर्धन् मम योनिरप्स्व (अ) न्तः समुद्रे। ततो वितिष्ठे भुवनानु विश्वो तामूं द्यां वर्ष्मणोपस्पृशामि ॥ ७ ॥ अहमेव वातऽइव प्रवा म्यारभमाणा भुवनानि विश्वा । परो दिवा परएना पृथिव्यै तावती महिना संबभूव ॥ ८ ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

॥ भाग्यसूक्तम् ॥

प्रातरग्निं प्रातरिन्द्रगं् हवामहे प्रातर्मित्रा वरुणा प्रातरश्विना । प्रातर्भगं् पूषणं ब्रह्मणस्पतिं प्रातस्सोममुत रुद्रगं् हुवेम् ॥१ ॥ प्रातर्जितं भगमुग्रगं् हुवेम वयं पुत्र-मदितेर्यो विधर्ता। आद्ध्रश्चिद्यं मन्यमानस्तुरश्चिद्राजा चिद्यंभगं भक्षीत्याह ॥२ ॥ भग प्रणेत-र्भग सत्यराधो भगेमां धियमुदवददन्नः। भगप्रणो जनय गोभि रश्वै-र्भगप्रनृभि-र्नृवन्तस्सयाम ॥३ ॥ उतेदानीं भगवन्तस्यामोत प्रपित्व उत मध्ये अह्नाँ । उतोदिता मघवन् सूर्यस्य वयं देवानागं् सुमतौ स्याम ॥४ ॥ भग एव भगवागं् अस्तु देवास्तेन वयं भगवन्तस्स्याम। तं त्वा भग सर्व इज्जोहवीमि सनो भग पुर

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु मयि मेधां मयि प्रजां मथीन्द्र इन्द्रियं दधातु मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु॥

देवीसूक्तम्

ऋग्वेद-संहिताः मण्डलम्-१० अष्टकम्-८ सूक्तम्-१२५

ॐ॥ अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः। अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा॥ १॥ अहं सोममाहनसं बिभर्म्यहं त्वष्टारमुत पूषणं भगम्॥ अहं दधामि द्रविणं हविष्मते सुप्राव्येए३ यजमानाय सुन्वते॥ २॥ अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम्। तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयन्तीम्॥३॥ मया सोऽअन्नमत्ति यो विपश्यति यः प्राणिति यईं शृणोत्युक्तम्। अमन्तवोमान्त उपक्षियन्ति श्रुधिश्रुत श्रद्धिवंते वदामि॥४॥ अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः। यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम्॥५॥ अहं रुद्राय धनुरातनोमि ब्रह्मद्विषे शरवेहन्तवा उ। अहं जनाय समदं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कृणोम्यहं द्यावा पृथिवी आविवेश ॥ ६ ॥ अहं सुवे पितरमस्य मूर्धन् मम योनिरप्स्व (अ) १न्तः समुद्रे। ततो वितिष्ठे भुवनानु विश्वो तामूं द्यां वर्ष्मणोपस्पृशामि ॥ ७ ॥ अहमेव वातऽइव प्रवा म्यारभमाणा भुवनानि विश्वा । परो दिवा परएना पृथिव्यै तावती महिना संबभूव ॥ ८ ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

॥ भाग्यसूक्तम् ॥

प्रातरग्निं प्रातरिन्द्रगं् हवामहे प्रातर्मित्रा वरुणा प्रातरश्विना । प्रातर्भगं् पूषणं ब्रह्मणस्पतिं प्रातस्सोममुत रुद्रगं् हुवेम् ॥१ ॥ प्रातर्जितं भगमुग्रगं् हुवेम वयं पुत्र-मदितेर्यो विधर्ता। आद्ध्रश्चिद्यं मन्यमानस्तुरश्चिद्राजा चिद्यंभगं भक्षीत्याह ॥२ ॥ भग प्रणेत-र्भग सत्यराधो भगेमां धियमुदवददन्नः। भगप्रणो जनय गोभि रश्वै-र्भगप्रनृभि-र्नृवन्तस्सयाम ॥३ ॥ उतेदानीं भगवन्तस्यामोत प्रपित्व उत मध्ये अह्नाँ । उतोदिता मघवन् सूर्यस्य वयं देवानागं् सुमतौ स्याम ॥४ ॥ भग एव भगवागं् अस्तु देवास्तेन वयं भगवन्तस्स्याम। तं त्वा भग सर्व इज्जोहवीमि सनो भग पुर

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एता भवेह॥५॥ समध्वरायोषसोऽनमन्त दधिक्रावेव शुचये पदाय। अर्वाचीनं वसुविंद भगन्नो रथमिवाश्वावाजिन आवहन्तु॥६॥ अश्वावती-र्गोमती-र्न उषासो वीरवतीरंसद-मच्छन्तु भद्राः। घृतं दुहाना विश्वतः प्रपीनायूयं पात स्वस्तिभिस्सदा नः॥७॥ यो मा ऽग्ने भागिनगं् सन्त-मथाभागं चिकीर्षति। अभागमग्ने तं कुरु मामग्ने भागिनं कुरु॥८॥

॥ इति भाग्यसूक्तम्॥

अनुज्ञा

ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्पतिः।
ध्रुवं त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवम्॥

देवीं वाचमजनयन्त देवाः। तांविश्वरुपाः पशवो वदन्ति। सानो मन्द्रेषमूर्जन्दुहाना। धेनुर्वागस्मानुप सुष्टुतैतु॥

पर्वत इवाविचाचलिः। इन्द्र इवेह ध्रुवस्तिष्ठ। इह राष्ट्रमुधारय। अभितिष्ठ पृतन्यतः। अधरे सन्तु शत्रवः। इन्द्र इव वृत्रहा तिष्ठ। सुमुहूर्तोऽस्तु। सुप्रतिष्ठितमस्तु। ऋध्यास्म हव्यैर्नम सोपसद्य। मित्रं देवं मित्रधेयन्नो अस्तु। अनूराधान् हविषा वर्धयन्तः। शन्तं जीवेम शरदः सवीराः। दीर्घायुष्य-मस्तु।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हरिः ओं नमो महद्भ्यः नमो अर्भकेभ्यः, नमो युवभ्यः नमः आशिनेभ्यः।

यजो म देवान् यदि शक्तवा म मा ज्यायसः शंश मावृक्षि देवाः॥

ॐ नमःस्सदसे नमस्सदस्पतये नमस्सखीनां पुरोगाणां चक्षुषे नमो दिवे नमः पृथिव्यै॥

सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यं।

सनिं मेधामयाशिषम्॥

सवेभ्यो ब्राह्मणेभ्यो नमः॥

अशेषे हे परिषद् भवत्पादमूले मया समर्पितां इमां सौवर्णीं दक्षिणां यत्किंचित् दक्षिणां यथोक्त दक्षिणामिव तांबूलं च स्वीकृत्य।

सर्वेषां महाजननां क्षेमस्थैर्य वीर्य विजय आयुरारोग्य ऐश्वर्याणां अहरहरभिवृद्ध्यर्थं धन कनक वस्तु गहनादि अष्टैश्वर्य समृद्ध्यर्थं आयुष्मत् सत्सन्तान प्राप्त्यर्थं सर्वमङ्गल प्राप्त्यर्थं सर्वारिष्ट शान्त्यर्थं सर्वाभीष्ट सिद्ध्यर्थं परकृत मन्त्र तन्त्र आभिचार विषचूर्णादि विभेदनार्थं भूतादि ग्रह निवृत्त्यर्थं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सर्वापच्छान्ति पूर्वक दीर्घायुर्विपुल धन सन्तति वृद्धि स्थिर लक्ष्मी शत्रु पराजयादि सदभीष्ट सिद्ध्यर्थं आदित्यात्मक श्री महादेवादि प्रसाद सिद्ध्यर्थं (श्री रुद्रैकादशिन्याख्य), श्री महारुद्राख्य, (अतिरुद्राख्य) महा प्रायश्चित्त शुभ कर्म, महार्णवोक्त रीत्या प्राच्योदीय्यङ्ग गोदान नान्दीश्राद्ध वैष्णव श्राद्ध दश दानादिभिः वसोर्धारया च सहितं कर्तुं योग्यता सिद्धिं अनु गृहाण॥

अथ विघ्नेश्वर पूजा

शुक्लां * शान्तये॥ ओं भूः * भूर्भुवस्सुवरोम्॥

ममोपात्त * प्रीत्यर्थं तदेव लग्नं सुदिनं तदेव तारा बलं चन्द्र बलं तदेव विद्याबलं दैव बलं तदेव लक्ष्मीपतेः अङ्घ्रियुगं स्मरामि करिष्यमाणस्य कर्मणः निर्विघ्नेन परिसमाप्त्यर्थं आदौ श्री महागणपति पूजां करिष्ये॥ अप उपस्पृश्य॥

गणानां त्वा गणपतिं ँ हवामहे कविं कवीनामुपमश्रवस्तमम्। ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आनः शृण्वन्नूतिभिस्सीद सादमं॥ अस्मिन् हरिद्रा बिम्बे सुमुखं श्री

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

महागणपतिं ध्यायामि। श्री महागणपतिमावाहयामि॥ श्री महागणपतये नमः। आसनार्थं अक्षतान् समर्पयामि॥

पाद्यं समर्पयामि।

अर्घ्यं समर्पयामि।

आचमनीयं समर्पयामि।

स्नापयामि।

स्नानानन्तरं आचमनीयं समर्पयामि।

वस्त्रोत्तरीयार्थं अक्षतान् समर्पयामि।

उपवीता भरणार्थं अक्षतान् समर्पयामि।

दिव्य परिमल गन्धान् धारयामि।

हरिद्रा चूर्णं, कुङ्कुमं समर्पयामि।

शोभनाक्षतान् समर्पयामि।

पुष्पमालां समर्पयामि।

पुष्पैः पूजयामि॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ सुमुखाय नमः
ॐ एकदन्ताय नमः
ॐ कपिलाय नमः
ॐ गजकर्णकाय नमः
ॐ लम्बोदराय नमः
ॐ विकटाय नमः
ॐ विघ्नराजाय नमः
ॐ गणाधिपाय नमः
ॐ धूमकेतवे नमः
ॐ गणाध्यक्षाय नमः
ॐ फालचन्द्राय नमः
ॐ गजाननाय नमः
ॐ वक्रतुण्डाय नमः
ॐ शूर्पकर्णाय नमः
ॐ हेरम्बाय नमः
ॐ स्कन्द पूर्वजाय नमः
ॐ गणञ्जयाय नमः
ॐ गणपतये नमः
ॐ हेरम्बाय नमः
ॐ धरणी धराय नमः
ॐ महागणपतये नमः
ॐ लक्ष्य प्रदाय नमः
ॐ क्षिप्रप्रसादनाय नमः
ॐ अमोघ सिद्धये नमः
ॐ अमृताय नमः
ॐ मन्त्राय नमः
ॐ चिन्तामणये नमः
ॐ निधये नमः
ॐ सुमङ्गलाय नमः
ॐ बीजाय नमः
ॐ आशापूरकाय नमः
ॐ वरदाय नमः
ॐ शिवाय नमः
ॐ काश्यपाय नमः
ॐ नन्दनाय नमः
ॐ वाचा सिद्धाय नमः
ॐ डुन्डि विनायकाय नमः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नाना विध पत्र पुष्पाणि समर्पयामि।

ओं धूपदीपार्थं अक्षतान् समर्पयामि॥

ओं धूपदीपानन्तरं आचमनीयं समर्पयामि॥

नैवेद्यं—ओं भूर्भुवस्सुवः तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि। धियो योनः प्रचोयदयात्। देव सवितः प्रसुव। सत्यं त्वर्तेन परिषिञ्चामि। अमृतोपसतरणमसि।

ओं प्राणाय स्वाहा, अपानाय स्वाहा, व्यानाय स्वाहा, उदानाय स्वाहा, समानाय स्वाहा, ब्रह्मणे स्वाहा, भीमहागणपतये नमः, नालिकेर खण्डद्वयं कदली फलं निवेदयामि। निवेदनानन्तरं आचमनीयं समर्पयामि।

पूगीफल समायुक्तं नागवल्ली दलैर्युतं।
कर्पूर चूर्ण संयुक्तं तांबूलं प्रति गृह्यताम्।

श्रीमहा गणपतये नमः, कर्पूर तांबूलं समर्पयामि।

कर्पूर नीराजनम्—ओं नमो व्रातपतये नमो गणपतये नमः प्रमथ पतये नमस्ते अस्तु लंबोदरायैकदन्ताय विघ्नविनाशिने शिव सुताय श्री वरद मूर्तये नमो नमः॥ कर्पूर नीराजनं दर्शयामि॥ नीराजनानन्तरं आचमनीयं समर्पयामि॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र पुष्पं समर्पयामि। स्वर्णपुष्पं समर्पयामि। समस्तोपचारान् समर्पयामि।

वक्र तुण्ड महाकाय सूर्य कोटि समप्रभ।
अविघ्नं कुरुमे देव सर्व कार्येषु सर्वदा॥

संकल्पः

दर्भेष्वासीः दर्भान् धारयमाणः पत्न्यासह।

शुक्लाम्बरधरं विष्णुं शशिवर्णम् चतुर्भुजम् प्रसन्नवधनम् ध्यायेत् सर्व विघ्नोप शान्तये।

ओं भूः .... भूर्भुवस्सुवरोम्। ममोपात्तसमस्त-अदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं शुभे शोभने मुहूर्ते अद्यब्रह्मणः द्वितीयपरार्धे श्वेतवराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे प्रथमे पादे जम्बूद्वीपे भारतवर्षे भरतखडे मेरोः दक्षिणे पार्श्वे विन्ध्यस्य उत्तरे आर्यावर्तैकदेशे इन्द्रप्रस्थमहाक्षेत्रे दक्षिणवाहिन्याः यतुनायाः पश्चिमे तीरे विक्रमशके बौद्धावतारे प्रभवादीनां षष्ठ्याः संवत्सरणां मध्ये बार्हस्पत्यमानेन..... नाम संवत्सरे, सौरचान्द्रमानाभ्यां..... नामसंवत्सरे दक्षिणायने/उत्तरायने.....ऋतौ.....मासे शुक्लपक्षे/कृष्णपक्षे शुभतिथौ..... वासरयुक्तायां.....

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नक्षत्रयुक्तायां शुभयोगशुभकरण एवंगुणविशेषणविशिष्टायां अस्यां वर्तमानायां..... शुभतिथौ आसेतु हिमाचल अन्तर्वर्तिनां सर्वेषां महाजनानां एतद्देश-प्रसूतानां महाजनानां विद्या ग्रहणार्थं उद्योगार्थं च अन्य देशवासिनां माणवकानां बालिकानां च वेदोक्त पूर्णायु रभिवृद्धिर्यर्थं सर्व मंगला वाह्यर्थं, विशिष्य श्रविष्ठा नक्षत्रे कुंभ राशौ आविर्भूतानां श्रीमत् जयेन्द्र सरस्वती संयमीन्द्राणां, उत्तराषाढ़ा नक्षत्रे मकर राशौ आविर्भूतानां भारती तीर्थ महा स्वामिनां श्रीमत् शंकर विजयेन्द्र सरस्वती संयमीन्द्राणां अस्मदाचार्य पादानां, मृगशिरो नक्षत्रे मिथुन राशौ आविभूतानां श्री शृंगपुरी निवासिनां जगद्गुरुणां आचार्य पादानां, सर्वेषां भारतीयानां महाजनानां कृत्तिकादि अपभरण्यन्तेषु अष्टा विंशति नक्षत्रेषु, मेषादि मीन पर्यन्तेषु द्वादश राशिषु जातानां शुभ नामधेयानां विनायकादि समस्त हरिहर देवता प्रसादेन वेदोक्त पूर्णायुषः अभिवृद्ध्यर्थं, अरोग दृढ़ गात्रता सिद्ध्यर्थं, देशेऽस्मिन् क्षाम क्षोभ निवृत्ति द्वारा सुवृष्ट्या सस्याभिवृद्ध्यर्थं, वापी कूप तटाकादिषु जल परिपूर्णता सिद्ध्यर्थं, अपौरुषेय वेद वचसां यथा—नियमं अभिवृद्धिर्यर्थं, वेदाऽभिवृद्ध्यर्थं वेद

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विदामभिवृद्ध्यर्थं, वेद वित्सु ब्राह्मणेषु श्रद्धा भक्ति अतिशय सिद्ध्यर्थं, राज्ञां स्व धर्म परिपालने प्रवृत्ति सिद्ध्यर्थं, अमात्य वर्गाणां मध्ये परस्परं वैमनस्य निवृत्तिद्वारा सौमनस्य सिद्ध्यर्थं, भारत देशस्य सीमासु देश संरक्षणार्थं अहोरात्रे जागरूकतया देश संरक्षणं कुर्वतां भटानां कायिक मानसिक धैर्य सिद्ध्यर्थं, बाहुबल सिद्ध्यर्थं, अन्यदेशीयैः अप्रति धृष्णुत्व सिद्ध्यर्थं, धेनूनां क्षीर समृद्ध्यर्थं, स्त्रीणां युवतीनां कन्यकानां सौन्दर्य सौशील्यादि शोभन गुणाभिवृद्ध्यर्थं, उद्वाहार्थं विद्यमानानां कुमाराणां कन्यकानां सत्कुलात् स्व वर्णे एव अनुरूप कन्या प्राप्तिमूलं अनुरूप वर प्राप्तिमूलं उद्वाह मंगल प्राप्त्यर्थं, विद्यार्थिनां विद्या मेधा प्रज्ञा प्रतिभाऽभिवृद्ध्यर्थं, उद्योगे विद्यमानानां उपर्युपरि उन्नत स्थान प्राप्ति द्वारा विशेषे कीर्ति लाभाऽभिवृद्ध्यर्थं, इदानीं असकृत् परिदृश्यमान भूकम्पन भूमिभेदन अग्निदाह वायु प्रकोप अतिवृष्ठि अनावृष्ट्यादि प्रयुक्त सकल विध उत्पात निवृत्त्यर्थं, बहु संघात मरण निवृत्त्यर्थं, लोक कल्याण सिद्ध्यर्थं, सर्वेषां महा जनानां क्षेम स्थैर्य वीर्य विजय आयुरारोग्य ऐश्वर्याणां अभिवृद्ध्यर्थं, आयुष्मत् सत्सन्तान समृद्ध्यर्थं, समस्त मंगला वाप्त्यर्थं..... ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सर्वेषां महा जनानां जन्माभ्यासात् जन्म प्रभृति एतत्क्षण पर्यन्तं बाल्ये वयसि कौमारे यौवने वार्धके च जाग्रत् स्वप्न सुषुप्त्यवस्थासु काम-क्रोध-लोभ-मोह-मद-मात्स्र्यादिभिः मनो व्यापारैः श्रवण स्पर्शन दर्शन रसन घ्राणनैः श्रोत्र त्वक् चक्षुः जिह्वा नासिकाख्य ज्ञानेन्द्रिय व्यापारैः वचनादान विहरणोत्सर्ग आनन्दनैः वाक्पाणि पाद पायूपस्थाख्य कर्मेन्द्रिय व्यापारैश्च संभावितानां; ब्रह्महत्या सुरापान स्वर्णस्तेय गुरुतल्प गमन तत् संसर्गाख्य पञ्च महा पातकानां; गर्भहनन गोवध शिवलिंग चालनादीनां अतिपातकानां; गुर्वधिक्षेप वेद निन्दा नराश्व रजत भूमि वज्र मणि स्त्री गो शतपल ताम्र निक्षेप हरणादीनां समपातकानां; मातृ पितृ गुरु त्याग तटाक आराम विक्रय आत्मार्थ पाक क्रियारम्भ सदा परान्न भोजन असच्छास्त्राभ्यास परवृत्ति छेदना दीनां उप पाताकनां; खराश्व उष्ट्र मृग इभ अश्वावि मीन-सर्प-महिष-वधादीनां संकली करणानां; कृमि कीट पक्षि जलचर वध फलकाष्ठ कुसुमस्तेयादीननां मलिनी-करणानां; निन्दित धनादान कुसीद जीवन असत्य भाषणादीनां अपात्री करणानां; मद्याद्यनाध्रेय पदार्थाघ्राण

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जिह्वत्वादीनां जाति भ्रंशकराणां; नग्न स्नान जनकादि एक वचंनान्त युष्मच्छब्द प्रयोग अस्नान भोजनादीनां प्रकीर्णकानां; एवं नवानां नवविधानां बहूनां बहुविधानां; ज्ञानतः सकृत्कृतानां, अज्ञानतः असकृत्कृतानां, ज्ञानतः अज्ञानतश्च अभ्यस्तानां, निरन्तराभ्यस्तानां, चिरकाला-भ्यस्तानां, सर्वेषां पापां सद्यः अपनोदनार्थं;

सर्वेषां महा जनानां जन्मनक्षत्र जन्मराशि वशात्, नाम नक्षत्र नाम राशि वशात्, जन्मानु जन्म त्रिजन्म होरा-द्रेक्काण-नवांश-द्वादशांश-त्रिंशांश-षष्ट्यंश-भावांश-अष्टवर्ग चक्र वशात्, सांघातिक सामुदायिक ग्रह उपग्रह भावग्रह अरिष्टग्रह मारक ग्रह क्रूर ग्रह क्षान्ति ग्रह क्षणिक ग्रह संयोग वीक्षण अर्धपात दृष्टि लत्ता वध वैनाशिक प्रत्यर व्यय षड्वर्गज रूप देह भावज वशात्, द्यून रिप्पारिष्ट अष्टम मारक नीच स्थान स्थितानां, मान्दि धूमकेत्वादि उपग्रह सहितानां, आदित्यादीनां नवानां ग्रहाणां मध्ये ये ये दुस्थानाधिपत्य दुष्ट ग्रह योगादि प्रयुक्त पाप दुष्टाः ये च निसर्गः पापाः तेषामानुकूल्य सिद्ध्यर्थं, शरीर वाक् कुटुंब बुद्धि कामायुर्भाव भाग्य धर्म कर्मायादि शुभस्थान स्थितानां, निसर्गतः शुभ राजयोगादि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

फलप्रदानां शुभानां ग्रहाणां अत्यन्तातिशय शुभफल प्रदातृत्व सिद्ध्यर्थं, प्रारब्ध कर्म वशात् अवश्यानु भाव्यतया प्राप्तानां परकृत क्रियमाण करिष्यमाण सकल मन्त्र तन्त्र यंत्र विषचूर्ण आभिचार कृत्याञ्जनादि प्रेरित आध्यात्मिक आधि दैविक आधि भौतिक अतर्क तापत्प्रद व्याधीनां आत्मात्मीय पीड़ा चिन्तन दर्शनादि जनितानां अन्ततः निवृत्ति द्वारा क्षिप्रा रोग्य मनः प्रसाद कुटुंब-वृद्धि परम स्वास्थ्यादि सिद्ध्यर्थं;

श्रुति स्मृति इतिहास पुराण प्रसिद्ध्यानां "किं जप्येन अमृतत्वं नो ब्रूहि" इति मोक्षसाधन जप्य प्रश्ने "एतानि हवा अमृतस्य नाम धेयानि एतेर्हवा अमृतो भवति" इति प्राधान्येन मोक्षसाधनत्वेन जापालोपनिषत् प्रति पादितानां, "शतशाखा गतं साक्षाच्छत रुद्रीय मुत्तमम्। तस्मा त्तज्जप मात्रेण सर्व पापैः प्रमुत्त्यते" इति स्कान्दान्तर्गत सूत-संहिता वचनावगत सर्व पापापनोदकत्वानां, "एक शतं यजुश्शाखाः तासु रुद्रोपनिषदाम्नायते" इति सर्व शाखा विराजमानत्वेन भट्ट भास्करादिभिः संस्तुतानां पूर्वोक्त जाबालोपनिषत्प्रश्न प्रतिवचनाभ्यां मोक्ष साधन, जप्योप निषदन्त रापेक्षया "तदा प्राह महादेवः राजानं प्रीतमानसः। इमानि मे रहस्यानि नामानि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रृणुचानघ। सर्व वेदेषु गीतानि संसार शमनानि च ! नम स्कुरुष्व सततं एभिर्नाम पदैः शुचिः॥ अध्यायं शतरुद्रीयं यजुषां सारमुत्तमम्। जपस्वानन्य चेतस्कः मय्येवासक्त मानसः॥ ब्रह्मचारी मिताहारः ब्रह्मनिष्ठस्समाहितः। जपेदामरणाद्रुद्रं स याति परमां गतिम्॥'' इति सर्व संसार दुःख मोचक परम शिव नाम निकुरुंब करंबितत्वेन तादृश नमस्कार करंबितत्वेन च परमगति प्रापकत्वादस्य रुद्राध्यायस्य न केवलं यजुस्सारत्वं अपितु सर्ववेदोत्त-मत्वमिति कूर्म पुराणोद्घोषितानां, ''यः शत रुद्रीय मधीते सोग्नि पूतो भवति, सुरापानात्पूतो भवति, ब्रह्महत्यायाः पूतो भवति, स्वर्णस्तेयात्पूतो भवति, तस्मादविमुक्त माश्रितो भवति, अत्याश्रमी सर्वदा सकृद्वा जपेत् अनेन ज्ञान माप्नोति संसारार्णव नाशनं'' इति कैवल्योपनिषदि ब्रह्महत्यादि महापातक कृत्यवदाचरित अकृत्यादि सर्व पाप निबर्हणत्वेन संसारार्णव नाशन आत्मज्ञान प्रदान साधनत्वेन च निर्दिष्टानां, ''सर्गात्पुरानिरालोके यदेत न्निष्कलं परम् ! चिदानन्दमरं ज्योति स्स आत्मा केवल श्शिवः॥ स एवादौ रजो रूपं सृष्ट्वा ब्राह्मण मात्मनः। सृष्टिकर्म नियुक्ताय तस्मै वेदांश्च दत्तवान्॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स एष मुनिभिः पूर्वैः मरीच्यत्रि पुरोगमैः। सह देवैः धृतस्तेभ्यः तच्छिष्या जगृहुश्शतम्॥ एषवः परमो मन्त्रः एषवः परमं तपः। रुद्राध्याय जपः पुंसां परं कैवल्य साधनम्। ये महापात-कैर्युक्ता उप पातकिनश्च ये। रुद्राध्याय जपात्सद्यः तेपि यान्ति परांगतिम्॥'' इति सृष्ट्यादौ श्री परमेश्वर मुखार विन्द निर्गतत्वेन, ब्रह्म मरी च्यत्रि प्रमुख मुनिवर परंपरागतत्वेन परम मन्त्रत्वेन परम तपस्त्वेन सर्वोपनिषत्सारत्वेन च ब्रह्मोत्तर खण्ड घण्टा घोषितानां, ''रुद्राध्याये भुवं प्राप्ते साक्षात्-कैवल्य साधने। भीताः प्रदुद्रुवुः सर्वे ते वै पातक नायकाः॥ यमे विज्ञापमायासुः सहतैश्चोप पातकैः। नरकस्य विवृद्ध्यर्थं साधिकारास्त्वया कृताः॥ अधुना वर्तितुं लोके न शक्तास्म स्वयं प्रभो। रुद्रजाप्यं प्रभावेन निर्दग्धाश्चैव विद्रुताः॥ ग्रामे ग्रामे नदी-तीरे पुण्येष्वायतनेषु च ! रुद्र जाप्येन पर्याप्ते कथं परिचरे महि॥ प्रायश्चित्त सहस्त्रं वा गणयामो न किञ्चन ! रुद्र जाप्यं क्षणेनापि सोढुं शक्ता वयं न च॥ महापातक मुख्यानां अस्माकं सोप जीविनाम् ! रुद्र जाप्यं परं घोरं रुद्र जाप्यं महद्विषम्॥'' इति निखिल पातक प्रायश्चित्तत्वेन स्व लोक परिपूरणकाम यम प्रेरित महापातकोप पातक रूप

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

किंकर पलायनात्मक परि भव जनकत्वेन यम भटाऽसह्य वेदनोत्पातकत्वेन इतर निखिल प्रायश्चित्तादप्युत्तमत्वेन च तत्र तत्र उपवर्णिनानां, ''वेदमेक गुणं जप्त्वा तदह्नैव विशुद्ध्यति। रुद्रैकादशिनीं जप्त्वा तत्क्षणादेव शुद्ध्यतिं !! वृक्षस्य मूल सेकेन शाखाः पुष्यन्ति वै यथा। शिवे रुद्र जपात्प्रीते प्रीतां एवास्य देवताः। अतो रुद्र जपादेन भुक्ति मुक्ति प्रसिद्ध्यतः॥'' इति सूत संहिता वचनेन, ''शत रुद्रान् जपेद्यस्तु ध्याय मानो महेश्वरम्। यश्च सागर पर्यन्तां स शैल वन काननाम् !! दद्यात् काञ्चन संयुक्तां भूमिमोषधि संयुताम्। तस्मादप्यधिकं तस्य सकृद्रुद्र जपाद्भवेत्। इति शैवपुराण वचनेन, ''सर्वोपनिषदां सारो रुद्राध्यायः समर्थितः! भोगार्थिनो मुमुक्षोर्वा प्रायश्चित्तार्थिनोपि वा !! रुद्रोपनिषदं मुक्त्वा गतिरन्या न विद्यते ! प्रयतः प्रातरुत्थाय यदधीते विशांपते॥ प्राञ्जलिः शत रुद्रीयं नास्य किञ्चन दुर्लभम्॥'' इत्यादि महाभारत वचनेन च सर्व किल्बिष मोचकत्वेन जपक्षण एव शुद्धि जनकत्वेन समस्त देवता प्रीति निष्पादकत्वेन भुक्ति मुक्ति प्रसाधकत्वेन अखण्ड भूमण्डल दान पुण्याधिक पुण्य प्रदत्वेन दुर्लभ समस्त वस्तु

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रापकत्वेन च निर्णीतानां, आदितो नमस्कार, अन्ततो नमस्कार, उभयतो नमस्कार, एकोन सप्तत्युत्तर शत संख्याक महामन्त्रात्मकानं आपस्तंब सूत्रकार पठित यज्ञ संयुक्त कल्पेषु महाग्नि चयनांग होमे विनियुक्तानामपि जाबाल मान्धातृ शौनक सायणाचार्य वसिष्ठ याज्ञवल्क्य अत्रि अङ्गिर प्रमुखै र्विरचितेषु अयज्ञ संयुक्त कल्पेष्वपि धर्मार्थ काम मोक्षादि समस्त ऐहिका मुष्मिक पुरुषार्थ साधकत्वेन प्रख्यापितानां, महाभारत स्कान्द वाय्वादि महापुराणेषु पुत्र पशु विद्यैश्वर्य प्रदत्वेन मुहु र्मुहु रुद्घोषितानां, तैत्तिरीय कृष्ण यजु श्शाखा मध्यगत अग्निकाण्ड मध्यवर्तिनां चतुर्वेद सार भूतानां श्रीमत् पञ्चाक्षर महामन्त्र गर्भितानां श्री रुद्र मन्त्राणां त्रेधाविभाग षोढाविभाग षोडशधा विभाग अष्टाचत्वारिंशद्धा विभाग एकोन सप्तत्यधिक शतधा विभागात्मकेषु पक्षेषु अष्टा चत्वारिंशद्धा विभाग पक्ष माश्रित्य दशांश होम विधानेन एभिः ब्राह्मणै स्सह आचार्य मुखेन महार्णवोक्त रीव्य प्राच्यो दीच्याङ्ग गोदान, नान्दी श्राद्ध, वैष्णव श्राद्ध, दशदानादिभिः सह वसोर्द्धारया च सह महा रुद्राख्य/रुद्रैकादशिन्याख्य/ अति रुद्राख्य महा प्रायश्चित्त शुभ कर्म करिष्ये॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मया संकल्पित श्रीमहारुद्राख्य शुभकर्मा आरंभ मुहूर्त लग्नापेक्षया आदित्यादीनां नवानां ग्रहाणामानुकूल्य सिद्धर्थं ग्रहप्रीतिदानं च करिष्ये॥ दर्भान् उत्तरतः निरस्य अप उपस्पृश्य गणानां त्वेति मन्त्रेण महा गणपतिं उद्वास्य॥

ग्रहप्रीतिः

हिरण्यगर्भं गर्भस्तं हेम बीजं विभावसोः।
अनन्त पुण्य फलदं अतश्शान्तिं प्रयच्छमे॥

इदं हिरण्यं सदक्षिणाकं सतांबूलं आदित्यादीनां नवानां ग्रहाणां आनुकूल्य सिद्ध्यर्थं नाना गोत्रेभ्यः ब्राह्मणेभ्यः संप्रददे नमम॥

गोदानं

हिरण्य गर्भ गर्भस्तं हेम बीजं विभावसोः।
अनन्त पुण्य फलदं अतश्शान्तिं प्रयच्छमे॥
यज्ञ साधन भूता या विश्वस्य अध प्रणाशिनी।
विश्वरूप धरोदेवः प्रीयतां अनया गवा॥
गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश।
तस्मादस्य प्रदानेन अतश्शान्तिं प्रयच्छमे॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मया संकल्पित (रुद्रैकादशिन्याख्य) (महारुद्राख्य) अतिरुद्राख्य महाप्रायश्चित्त शुभकर्म पूर्वांगत्वेन विहित गोदान प्रत्याम्नायत्वेन इदं नारिकेल पूर्णफलं सदक्षिणाकं सतांबूलं आदित्यात्मक श्रीरुद्र प्रीतिं कामयमानः तुभ्यमहं संप्रददे। न मम।

नान्दी श्राद्धम्॥

हिरण्य गर्भ गर्भस्थं हेम बीजं विभावसोः।
अनन्त पुण्य फलदं अतश्शान्तिं प्रयच्छमे॥

मया संकल्पित (रुद्रैकादशिन्यारव्य) (महारुद्रारव्य) अतिरुद्रारव्य महाप्रायश्चित्त शुभकर्माङ्गभूते अस्मिन्नाभ्युदैके सत्यवसु संज्ञकानां विश्वेषां देवानां नान्दीमुखानां तृप्त्यर्थं ये ये विहिताः या या विहिताश्च तेषां तेषां तासां तासां नान्दीमुखानां तृप्त्यर्थं अभ्युदय संरक्षक महाविष्णोश्च तृप्त्यर्थं इमानि हिरण्यानि सदक्षिणाकानि सतांबूलानि नाना गोत्रेभ्यः ब्राह्मणेभ्यः तेभ्यः संप्रददे। न मम॥ मया हिरण्येन कृतं आभ्येदैकं संपन्नं। इडादेवहूः मनुर्यज्ञनीर्बृस्पति रुक्था मदानि सँशिषद्विश्वे देवास्सक्तवाचः पृथवि मातर्मामा हिँसीर्मधु

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मनिष्ये मधु जनिष्ये मधुवक्ष्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासँ शुश्रूषेण्यां मनुष्येभ्यः तं मा देवा अवन्तु शोभायै पितरोऽनु मदन्तु। इड एहि अदित एहि सरस्वत्येहि शोभनं शोभनं। मनः समाधीयतां। प्रसीदन्तु भवन्तः। श्रीरस्त्विति भवन्तो ब्रुवन्तु। पुण्याहं भवन्तो ब्रुवन्तु।

वैष्णव श्राद्धम्

हिरण्य गर्भ गर्भस्थं हेम बीजं विभावसोः।
अनन्त पुण्य फलदं अतश्शान्तिं प्रयच्छमे॥

मया संकल्पित (रुद्रैकादशिन्यारव्य) (महारुद्रारव्य) अतिरुद्रारव्य महा प्रायश्चित्त शुभकर्मणि केशव, नारायण, माधव, गोविन्द, विष्णु, मधुसूदन, त्रिविक्रम, वामन, श्रीधर, हृषीकेश, पद्मनाभ, दामोदराणां (इति शुक्लपक्षे) (कृष्णपक्षे तु) सङ्कर्षण, वासुदेव, प्रद्युम्न, अनिरुद्ध, पुरुषोत्तम, अधोक्षज, नरसिंह, अच्युत, जनार्दन, उपेन्द्र, हरि, श्रीकृष्णानां तृप्त्यर्थं इदं हिरण्यं सदक्षिणाकं सतांबूलं नानागोत्रेभ्यः ब्रह्मणेभ्यः तेभ्यः तेभ्यः संप्रददे। न मम।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पूतत्व कृच्छ्रम्

हिरण्यगर्भ गर्भस्तं हेम बीजं विभावसोः। अनन्त पुण्य फलदं अनश्शान्तिं प्रयच्छमे॥ मया संकल्पित श्री महा रुद्राख्य शुभ कर्मणि पूतत्व सिद्ध्यर्थं प्राजापत्य कृच्छ्र प्रत्याम्नायं इदंहिरण्यं नानागोत्रेभ्यः ब्राह्मणेभ्यः संप्रदते न मम॥ दश दानं—हिरण्यगर्भ गर्भस्थं हम बीजं विभावसोः अनन्त पुण्य फलदं अतश्शान्तिम् प्रयच्छमे॥ मया संकल्पित महा रुद्राख्य शुभ कर्मणि पूर्वङ्गत्वेन विहित गो, भू, तिल, हिरण्याज्य, वासो, धान्य, गुढ, रौप्य, लवण दशदान प्रत्याम्नायं यथा शक्ति हिरण्यं नाना गोत्रेभ्यः ब्राह्मणेभ्यः संप्रददे। न मम॥

दश दानं

गोदानं

गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश।
तस्मादस्य प्रदानेन अतः शान्तिं प्रयच्छमे॥

भू दानम्

सर्वसस्या श्रया भूमिः वराहेण समुद्धृता।
अनन्त सस्य फलदा अतः शान्तिं प्रयच्छमे॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तिलदानं

तिलाः पापहराः नित्यं विष्णोर्देह समुद्भवाः।
तस्मादस्य प्रदानेन अतः शान्तिं प्रयच्छमे॥

हिरण्यदानं

हिरण्य गर्भ गर्भस्तं हेम बीजं विभावसोः।
अनन्त पुण्य फलदं अतश्शान्तिं प्रयच्छमे॥

आज्यदानं

कामधेनु समुद्भूतं सर्व क्रतुषु संस्थितं।
देवानामाज्य माहारं अतश्शान्तिं प्रयच्छमे॥

वस्त्र दानं

शीतवातोष्ण संत्राणं लज्जायाः रक्षणं परं।
देहालकंरणं वस्त्रं अतश्शान्तिं प्रयच्छमे॥

धान्य दानं

धन्यं करोषि दातारं इह लोके परत्र च।
प्राणिनां जीवनं धान्यं अतश्शान्तिं प्रयच्छमे॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गुड दानं

इक्षु खण्ड समुद्भूतं सर्व प्राणिमनो हरम्।
तस्मादस्य प्रदानेन अतश्शान्तिं प्रयच्छमे॥

रौप्य दानं

रुद्र नेत्र समुद्भूतं रजनं पितृवल्लभम्।
पितृप्रीतिकरं नित्यं अतश्शान्तिं प्रयच्छमे॥

लवण दानं

रसानामग्रजं श्रेष्ठं लवणं बलवर्धनम्।
तस्मादस्य प्रदानेन अतश्शान्तिं प्रयच्छमे॥

॥ उदकुंभं दीपं घण्टा पुस्तकं वस्त्रं इति पञ्चदानं॥

उदकुभं— ब्रह्मणा पथमं सृष्टाः अधमर्षण हेतवः।
आपोयुष्मत्प्रदानेन तृष्यन्तु ममदेवताः॥

दीपं— परमार्थ तनो दीप परमार्थ प्रकाशक।
आत्मानात्म विवेकं मे जनय त्वत्प्रसादनः॥

घण्टा— सर्व वाध्य मयी घण्टा सर्वाधौध विनाशिनी।
तम्मादस्य प्रदानेन अतश्शान्तिं प्रयच्छमे॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुस्तकं— पञ्चाशत् वर्ण संयुक्तं पुस्तकं विमलाक्षरम्।
पुस्तकं संप्रयच्छामि प्रीता भवतु भारती॥

वस्त्रदानं— शीतवलाष्ण सन्त्राणं लज्जायाः रक्षाणं परं।
देहालंकरण वस्त्रं अतः शान्तिं प्रयच्छमे॥

फलदानं— फलं मनोरथ फलं प्रददाति सदा नृणां।
पुत्र पौत्राभि वृद्धयर्थं श्रेयःपुष्टिं प्रयच्छमे॥

तांबूलदानं—तांबूलं श्रीकरं भद्रं ब्रह्म विष्णु शिवात्मकम्।
तस्मादस्य प्रदानेन अतश्शान्तिं प्रयच्छमे॥

पुण्याह वाचनम्

अद्य पूर्वोक्त एवं गुण विशेषण विशिष्टायां अस्यां... शुभतिथौ मण्टपादि शुध्दयर्थं सर्वोपकरण शुध्दयर्थं अभ्युदय कमांगं च स्वस्ति पुण्याह वाचनं करिष्ये॥

ओं भूर्भुवस्सुवः। आपो वा इदं सर्वं विश्वा भूतान्यायः प्राणावा आपः पशव आपोन्न मायोमृत मापः सम्राडापो विराडायः स्वराडापश्छन्दां स्यापो ज्योती ष्यापो यजूष्यापः सत्यमापः सर्वा देवता आपो भू र्भुवस्सुवराय ओम्॥ इमं मे वरुण श्रुधीहवमद्याच मृड्य। त्वामवस्युराचके। तत्वायामि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ब्रह्मणा वन्दमान स्तदाशास्ते यजमानो हविर्भिः। अहेडमानो वरुणेह बोधि उरु शँसमान आयुः प्रमोषीः॥ भूर्भुवस्सुवरों अस्मिन् कुंभे सकल तीर्थाधिपतिं वरुणं ध्यायामि।

वरुणं आवाहयामि।

वरुणाय नमः आसनं समर्पयामि।

वरुणाय नमः पाद्यं समर्पयामि।

वरुणाय नमः अर्घ्यं समर्पयामि।

वरुणाय नमः आचमनीयं समर्पयामि।

वरुणाय नमः स्नापयामि।

वरुणाय नमः स्नानानन्तरं आचमनीयं समर्पयामि।

वरुणाय नमः वस्त्रोत्तरीयं समर्पयामि।

वरुणाय नमः उपवीता भरणानि समर्पयामि।

वरुणाय नमः गन्धान् धारयामि।

वरुणाय नमः हरिद्रा कुंकुमं समर्पयामि।

वरुणाय नमः शोभनाऽक्षतान् समर्पयामि।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वरुणाय नमः पुष्पमालां समर्पयामि। पुष्पैः पूजयामि।

वरुणाय नमः

प्रचेतसे नमः

सुरूपिणे नमः

अपां पतये नमः

मकर वाहनाय नमः

जलाधि पतये नमः

पाश हस्ताय नमः

तीर्थ राजाय नमः

वरुणाय नमः नानाविध पत्र पुष्पाणि समर्पयामि। धूप दीपार्थं अक्षतान् समर्पयामि।

नैवद्यं। ओं भूर्भुवस्सुवः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो योनः प्रचोदयात्। देव सवितः प्रसुव।

सत्यं त्वर्तेन परिषिञ्चामि। अमृतोपस्तरणमसि। प्राणाय स्वाहा, अपानाय स्वाहा, व्यानाय स्वाहा। उदानाय स्वाहा, समानाय स्वाहा, ब्रह्मणे स्वाहा। वरुणाय नमः कदली फलं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

निवेदयामि। निवेदनानन्तरं आचमनीयं समर्पयामि। पूंगीफल समायुक्तं नागवल्ली दळेर्युतं। कर्पूर चूर्ण संयुक्तं तांबूलं प्रतिगृह्यतां॥ कर्पूर तांबूलं समर्पयामि। समस्तोपचारान् समर्पयामि। अस्मिन् पुण्याह वाचन जप कर्मणि सर्वेभ्यो ब्रह्मणेभ्यो नमः॥ भवद्भिः अनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये। ओं वाच्यतां। कर्मणः पुण्याहं भवन्तो ब्रुवन्तु। पुण्याहं कर्मणोस्तु। अद्यकृत अभ्युदय कर्मणे स्वस्ति भवन्तो ब्रुवन्तु। अभ्युदय कर्मणे स्वस्ति।

अभ्युदय कर्मणः ऋद्धिं भवन्तो ब्रुबन्तु कर्म ऋद्धयतां। आत्म शुद्धि कर्मणे, मण्टपादि सर्वोपकरण शुद्धि कर्मणे स्वस्ति भवन्तो ब्रुवन्तु। कर्मणे स्वस्ति। आत्म शुद्धि कर्मणः मण्डपादि सर्वोपकरण शुद्धि कर्मणश्च ऋद्धिं भवन्तो ब्रुवन्तु। कर्म ऋद्धयतां। ऋद्धिः समृद्धिस्स्तु। पुण्याहं समृद्धिरस्तु। शान्ति रस्तु। पुष्टिरस्तु। तुष्टिरस्तु। अविघ्नमस्तु। आयुष्यमस्तु। आरोग्य मस्तु। धन धान्य समृद्धिरस्तु। गो ब्रह्मणेभ्यः शुभं भवतु। ईशान्यां वहिर्देशे अरिष्ट निरसन मस्तु। आग्नेय्यां यत्पापं तत्प्रतिह्यमस्तु सर्व शोभन मस्तु। सर्वाः संपदस्सन्तु॥

ओं शान्तिः शान्तिः शान्तिः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुण्याहवाचनम्

हिरण्यवर्णाः शुचयः पावका यासु जात कश्यपो यास्विन्द्रः। अग्निं या गर्भं दधिरे विरूपास्तान आपश्शगं स्योना भवन्तु॥ यासागं राजा वरुणो याति मध्ये सत्यानृते अवपश्यं जनानाम्। मधुश्चुतश्शुचयो याः पावकास्ता न आपश्शगं स्योना भवन्तु॥ यासां देवा दिवि कृण्वन्ति भक्षं या अन्तरिक्षे बहुधा भवन्ति। याः पृथिवीं पयसोन्दन्ति शुक्रास्ता न आपश्शगं स्योना भवन्तु॥ शिवेन मा चक्षुषा पश्यतापश्शिवया तनुवोप स्पृशत त्वचं मे। सर्वागं अग्नीगं रप्सुषदो हुवे वो मयि वर्चो बलमोजो निधत्त॥

पवमानस्सुवर्जनः। पवित्रेण विचर्षणिः। यः पोता स पुनातु मा। पुनन्तु मो देवजनाः। पुनन्तु मनवो धिया। पुनन्तु विश्व आयवः। जातवेदः पवित्रवत्। पवित्रेण पुनाहि मा। शुक्रेण देवदीद्यत्। अग्ने क्रत्वा क्रतूगं रनु। यत्ते पवित्रमर्चिषि। अग्ने विततमन्तरा। ब्रह्म तेन पुनीमहे। उभाभ्यां देवसवितः। पवित्रेण सवेन च। इदं ब्रह्म पुनीमहे॥ वैश्वदेवी पुनती देव्यागात्। यस्यै बह्वीस्तनुवो वीतपृष्ठाः। तया मदन्तः सधमाद्येषु। वयगं स्याम पतयो रयीणाम्। वैश्वानरो रश्मिभि-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

र्मा पुनातु। वातः प्राणेनेषिरो मयो भूः। द्यावापृथिवी पयसा पयोभिः। ऋतावरी यज्ञिये मा पुनीताम्। बृहद्भिः सवितस्तृभिः। वऋषिष्ठै-र्देवमन्मभिः। अग्ने दक्षैः पुनाहि मा। येन देवा अपुनत। येनापो दिव्यंकशः। तेन दिव्येन ब्रह्मणा। इदं ब्रह्म पुनीमहे। यः पावमानीरध्येति। ऋषिभि-स्संभृतगं् रसम्। सर्वगं् स पूतमश्नाति। स्वदितं मातरिश्वना। पावमानीर्यो अध्येति। ऋषिभिस्संभृतगं् रसम्। तस्मै सरस्वती दुहे। क्षीरगं् सर्पि-र्मधूदकम्॥ पावमानीस्स्वस्त्ययनीः। सुदुघाहि पयस्वतीः। ऋषिभिस्संभृतो रसः। ब्राह्मणेष्वमृतगं् हितम्॥ पावमानीर्दिशन्तु नः। इमं लोकमथो अमुम्। कामान् समर्धयन्तु नः। देवी-र्देवैः समाभृताः। पावमानीस्स्वस्त्ययनीः। सुदुघाहि घृतश्चुतः। ऋषिभिः संभृतो रसः। ब्राह्मणेष्वमृतगं् हितम्। येन देवाः पवित्रेण। आत्मानं पुनते सदा। तेन सहस्रधारेण। पावमान्यः पुनन्तु मा। प्रजापत्यं पवित्रम्। शतोद्यामगं् हिरण्मयम्। तेन ब्रह्म विदो वयम्। पूतं ब्रह्म पुनीमहे। इन्द्रस्सुनीती सहमा पुनातु। सोमस्स्वस्त्या वरुणस्समीच्या। यमो राजा प्रमृणाभिः पुनातु मा। जातवेदा मोर्जयन्त्या पुनातु। भूर्भुवस्सुवः॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तच्छं योरावृणीमहे। गातुं यज्ञाय। गातुं यज्ञपतये। दैवी स्स्वस्तिरस्तु नः। स्वस्तिर्मानुषेभ्यः। ऊर्ध्वं जिगातु भेषजम्। शन्नो अस्तु द्विपदे। शं चतुष्पदे। ओं शान्तिः शान्तिः शान्तिः॥

वरुणाय नमः सकलाराधनैः स्वचितम्॥

तत्वायामि ब्रह्मणा वन्दमानः तदाशास्ते यजमानो हविर्भिः। अहेडमानो वरुणेह बोधि उरुशंसमान आयुः प्रमोषीः॥ अस्मात् कुंभात् सकल तीर्थाधिपतिं वरुणं यथास्थानं प्रतिष्ठापयामि। कुंभ तीर्थेन मण्टपादीन् प्रोक्ष्य, प्राश्य॥

आचार्य वरणं

मया संकल्पित श्रीमहा रुद्राख्य प्रार्याश्चत्त शुभकर्मणि सकल कर्म कर्तुं आचार्यं त्वां वृणे॥ सर्वेभ्यो ब्राह्मणेभ्यो नमः। श्रीमहारुद्राख्य शुभ कर्मकुरुध्वम्॥

(कलशादि पूजां कृत्वा, कुम्भस्थापनं कुर्यात्। तत्र मन्त्रः॥)

कलश पूजाः कलशं गन्ध पुष्पाक्षतैरभ्यर्च्य कलशस्य मुखे विष्णुः कण्ठे रुद्र समाश्रितः। मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कुक्षौ तु सागराः सर्वे सप्त द्वीपा वसुन्धरा। ऋग्वेदोथ यजुर्वेदः सामवेदोऽप्यथर्वणः।

अंगैश्च सहिताः सर्वे कलशांबु समाश्रिताः।
गंगेच यमुने चैव गोदावरि सरस्वती॥
नर्मदे सिंन्धि कावेरी जलऽस्मिन् सन्निधिं कुरु॥
आयान्तु देवपूजार्थं दुरितक्षय कारकाः।
कलशोदकेन पूजोपकरणानि प्रोक्ष्य॥
शंखं चन्द्रार्क दैवत्यं कुक्षौ वरुण दैवतम्।
पृष्टे प्रजापतिश्चैव अग्रे गंगा सरस्वति॥
त्रैलोक्ये यानि तीर्थानि वासुदेवस्य चाज्ञया।
शंखे तिष्टुतु विप्रेन्द्र तस्माच्छंखं प्रपूजयेन्॥

पाञ्चजन्याय विद्महे पावमानाय धीमहि। तन्नः शंखः प्रचोदयात्॥

अग्नेर्मन्वे प्रथमस्य प्रचेतसोयं पाञ्चजन्यं बहवः समिन्धते। विश्वस्यां विशि प्रक्विशि वाँ हवामहे सनोमुञ्चत्वꣳहसः। कलशे शंखोदकं पूरयित्वा गायत्र्या पुनः शंखं पूरयेत्॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आगमार्थं तु देवानां गमनार्थं तु रक्षसाम्।
कुर्वे घटां रवं तत्र देवताह्वान लांछनम्॥

इति घटां नादं कुर्यात्॥

ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतस्सुरुचो वेन आवः। सबुध्निया उपमा अस्य विष्ठास्सतश्च योनिमसतश्च विवः। नाके सुपर्णं मुपयत्पतन्तं हृदा वेनन्तो अभ्यचक्षतत्वा। हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्युम्। आप्यायस्व समेतु ते विश्वतः सोम वृष्णियम्। भवा वाजस्य संगथे। यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवनाऽऽविवेश तस्मै रुद्राय नमो अस्तु। (अप उपस्पृश्य)॥ २॥

इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढ-मस्य-पाꣳसुरे। इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसंगिरो रथीतमꣳरथी-नां वाजानाꣳ सत्पतिं पतिम्। आपो वा इदꣳसर्वं विश्वा-भूतान्यापः प्राणा वा आपः पशव आपोऽन्नमापोऽमृतमाप-स्संम्राडापो विराडापस्स्वराडाप-श्छन्दाꣳ स्यापो ज्योतीꣳष्यापो यजूꣳष्यापस्सत्यमापस्सर्वा देवता आपो भूर्भुवस्सुवराप

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ओम्॥ अपः प्रणयति। श्रद्धा वा आपः। श्रद्धामेवारभ्य प्रणीय प्रचरति। अपः प्रणयति। यज्ञो वा आपः। यज्ञमेवारभ्य प्रणीय प्रचरति। अपः प्रणयति। वज्रो वा आपः। वज्रमेव भ्रातृव्येभ्यः प्रहृत्य प्रणीय प्रचरति। अपः प्रणयति। आपो वै रक्षोघ्नीः। रक्षसामपहत्यै। अपः प्रणयति। आपो वै देवानां प्रियं धाम। देवानामेव प्रियं धाम प्रणीय प्रचरति। अपः प्रणयति। आपो वै सर्वादेवताः। देवता एवारभ्य प्रणीय प्रचरति। अपः प्रणयति। आपो वै शान्ताः। शान्ताभिरेवास्य शुचꣳ शमयति। देवो वः सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोस्सूर्यस्य रश्मिभिः॥ ३॥

स हि रत्नानि दाशुषे सुवाति सविता भगः। तं भागं चित्रमीमहे॥ कूर्चाग्रैः राक्षसान् घोरान् छिन्धि कर्मविघातिनः। त्वामर्पयामि कुम्भेऽस्मिन् साफल्यं कुरु कर्मणि। वृक्षराजसमुद्भूताः शाखायाः पल्लवत्वचः। युष्मान् कुम्भेष्वर्पयामि सर्वपापापनुत्तये। नालिकेरसमुद्भूत त्रिणेत्र हरसत्तम। शिखया दुरितं सर्वं पापं पीडां च मे नुद॥४॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(कुम्भेषु वरुणावाहनम्) सर्वे समुद्राः सरितः तीर्थानि च नदाः ह्रदाः। इमं मे वरुण श्रुधि हवमद्याच मृड्य। त्वामवस्यु राचके। तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशा स्ते यजमानो हविर्भिः। अहेडमानो वरुणेह बोध्युरुशꣳस मा न आयुः प्रमोषीः॥ ओं भूर्भुवस्सुवरोम्। एषु कुम्भेषु वरुणं ध्यायामि। वरुणमावाहयामि वरुणस्य इदमासनम्। वरुणाय नमः। सकलाराधानैः स्वर्चितम्॥ ५॥

॥ महान्यासः ॥

अथातः पंचागरुद्राणां न्यासपूर्वकं जपहोमार्चना-भिषेकविधिं व्याख्यास्यामः॥

नमस्ते रुद्रमन्यव उतो त इषवे नमः। नमस्ते अस्तु धन्वने बाहुभ्या-मुत ते नमः। या त इषुः शिवतमा शिवं बभूव ते धनुः। शिवा शरव्याया तव तया नो रुद्र मृडय॥

कं खं गं घं ङं। यरलवशषसहों। ओं नमो भगवते रुद्राय। पूर्वांग रुद्राय नमः॥१॥

अपैतु मृत्यु-रमृतन्न आगन्वैवस्वतो नो अभयं कृणोतु। पर्णं वनस्पतेरिवाभिनश्शीयताꣳ रयिस्स चतान्नः शचीपतिः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चं छं जं झं ञं। यरलवशषसहों। ओं नमो भगवते रुद्राय। दक्षिणांग रुद्राय नमः ॥२॥

निधनपतये नमः। निधनपतान्तिकाय नमः। ऊर्ध्वाय नमः। ऊर्ध्वलिंगाय नमः। हिरण्याय नमः। हिरण्यलिंगाय नमः। सुवर्णाय नमः। सुवर्णलिंगाय नमः। दिव्याय नमः। दिव्यलिंगाय नमः। भवाय नमः। भवलिंगाय नमः। शर्वाय नमः। शर्वलिंगाय नमः। शिवाय नमः। शिवलिंगाय नमः। ज्वलाय नमः। ज्वललिंगाय नमः। आत्माय नमः। आत्मलिंगाय नमः। परमाय नमः। परमलिंगाय नमः। एतत्सोमस्य सूर्यस्य सर्वलिंगꣳ स्थापयति पाणिमन्त्रं पवित्रम्॥

टं ठं डं ढं णं। यरलवशषसहों। ओं नमो भगवते रुद्राय। पश्चिमांग रुद्राय नमः ॥ ३ ॥

यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वाभुवनाविवेश तस्मै रुद्राय नमो अस्तु॥

तं थं दं धं नं। यरलवशषसहों। ओं नमो भगवते रुद्राय। उत्तरांग रुद्राय नमः ॥४॥

प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तकः। तेनान्नेनाप्यायस्व। नमो रुद्राय विष्णवे मृत्युर्मे पाहि॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पं फं बं भं मं। यरलवशषसहों। ओं नमो भगवते रुद्राय। ऊर्ध्वांग रुद्राय नमः ॥ ५ ॥

तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात् ॥

संवर्ताग्नि-तटित्प्रदीप्त-कनकप्रस्पर्धि-तेजोरुणं
गम्भीरध्वनि-सामवेदजनकं ताम्राधरं सुन्दरम्।
अर्धेन्दुद्युति-लोल-पिंगल जटा भार-प्रबोद्धोदकं
वन्दे सिद्धसुरासुरेन्द्र-नमितं पूर्वं मुखं शूलिनः ॥
ओं नमो भगवते रुद्राय। पूर्वाङ्ग मुखाय नमः ॥१ ॥

अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः। सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥

कालाभ्र-भ्रमरांजन-द्युतिनिभं व्यावृत्तपिंगेक्षणं
कर्णोद्भासित-भोगिमस्तकमणि-प्रोद्भिन्नदंष्ट्रांकुरम्।
सर्पप्रोतकपाल-शुक्तिशकल-व्याकीर्णताशेखरं
वन्दे दक्षिणमीश्वरस्य वदनं चाथर्वनादोदयम् ॥
ओं नमो भगवते रुद्राय। दक्षिणांग मुखाय नमः ॥ २ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सद्योजातं प्रपद्यामि सद्यो जाताय वै नमो नमः।
भवे भवे नातिभवे भवस्व माम्। भवोद्भवाय नमः॥

प्रालेयाचल-मिन्दुकुन्द-धवलं गोक्षीरफेनप्रभं
भस्माभ्यंगमनंगदेहदहन-ज्वालावलीलोचनम्।
विष्णुब्रह्ममरुद्गणार्चितपदं च ऋग्वेदनादोदयं
वन्देऽहं सकलं कलंकरहितं स्थाणोर्मुखं पश्चिमम्॥
ओं नमो भगवते रुद्राय। पश्चिमांग मुखाय नमः॥ ३॥

वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमस्सर्व-भूतदमनाय नमो मनोन्मनाय नमः॥

गौरं कुंकुम पंकिलं सुतिलकं व्यापाण्डुगण्डस्थलं
भ्रूविक्षेप-कटाक्षवीक्षणलसत्संसक्तकर्णोत्पलम्।
स्निग्धं बिम्बफलाधरं प्रहसितं नीलालकालकृंतं
वन्दे याजुष-वेदघोषजनकं वक्त्रं हरस्योत्तरम्॥
ओं नमो भगवते रुद्राय। उत्तरांग मुखाय नमः॥४॥

ईशानस्सर्वविद्याना-मीश्वरः सर्व भूतानां ब्रह्माधिपति-र्ब्रह्मणोधिपति-र्ब्रह्मा शिवो मे अस्तु सदाशिवोम्॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

व्यक्ताव्यक्तनिरूपितं च परमं षट्त्रिंशतत्त्वाधिकं
तस्मादुत्तर-तत्त्वमक्षरमिति ध्येयं सदा योगिभिः।
ओंकारादि-समस्तमन्त्रजनकं सूक्ष्मातिसूक्ष्मं परं
वन्दे पंचम-मीश्वरस्य वदनं ख-व्यापि तेजोमयम्॥
ओं नमो भगवते रुद्राय। ऊर्ध्वांग मुखाय नमः॥५॥

या ते रुद्र शिवा तनूरघोरापापकाशिनी। तया न स्तनुवा शन्तमया गिरिशन्ताभिचाकशीहि॥ शिखायै नमः॥

अस्मिन्महत्यर्णवेऽन्तरिक्षे भवा अधि। तेषाꣳसहस्र-योजनेऽवधन्वानि तन्मसि॥ शिरसे नमः॥

सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम्। तेषाꣳ सहस्रयोजने ऽवधन्वानि तन्मसि॥ ललाटाय नमः॥

हꣳसश्शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथि-र्दुरोणसत्। नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्॥ भ्रुवोर्मध्यमाय नमः॥

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुक्रमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात्॥ नेत्राभ्यां नमः॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च नमः सूद्याय च सरस्याय च नमो नाद्याय च वैशन्ताय च॥ कर्णाभ्यां नमः॥

मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः। वीरान्मानो रुद्र भामितो वधीर्हविष्मन्तो नमसा विधेम ते॥ नासिकाभ्यां नमः॥

अवतत्य धनुस्त्वꣳ सहस्राक्ष शतेषुधे। निशीर्य शल्यानां मुखा शिवो नः सुमना भव॥ मुखाय नमः॥

नीलग्रीवाशिशति कण्ठा"श्शर्वा अधः क्षमाचराः। तेषाꣳ सहस्रयोजनेऽवधन्वानि तन्मसि॥ कण्ठाय नमः॥

नीलग्रीवाश्शितिकण्ठा दिवꣳ रुद्रा उपश्रिताः। तेषाꣳ सहस्रयोजनेऽवधन्वानि तन्मसि॥ उपकण्ठाय नमः॥

नमस्ते अस्त्वायुधायानाततताय धृष्णवे"। उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने॥ बाहुभ्यां नमः॥

या ते हेति-र्मीढुष्टम हस्ते बभूव ते धनुः। तयाऽस्मान् विश्वतस्त्व मयक्ष्मया परिब्भुज॥ उपबाहुभ्यां नमः॥

CC-0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

परिणो रुद्रस्य हेतिर्वृणक्तु परित्वेषस्य दुर्मति-रघायोः। अवस्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृडय॥ मणिबन्धाभ्यां नमः॥

ये तीर्थानि प्रचरन्ति सृकावन्तो निषंगिणः। तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि॥ हस्ताभ्यां नमः॥

सद्यो जातं प्रपद्यामि सद्यो जाताय वै नमो नमः। भवे भवे नातिभवे भवस्व माम्। भवोद्भवाय नमः॥ अंगु-ष्ठभ्यां नमः॥

वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः॥ तर्जनीभ्यां नमः॥

अघोरेभ्योऽथघोरेभ्यो घोरघोरतरेभ्यः। सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः॥ मध्यमाभ्यां नमः॥

तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात्॥ अनामिकाभ्यां नमः॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ईशानः सर्वविद्याना-मीश्वरः सर्वभूतानां ब्रह्माधिपति-र्ब्रह्मणोऽधिपति-र्ब्रह्मा शिवो मे अस्तु सदाशिवोम्॥ कनिष्ठिकाभ्यां नमः॥

नमो हिरण्यबाहवे हिरण्यवर्णाय हिरण्यरूपाय हिरण्यपतयेऽम्बिकापतय उमापतये पशुपतये नमो नमः। करतलकर-पृष्ठभ्यां नमः।

नमो वः किरिकेभ्यो देवानाꣳ हृदयेभ्यः॥ हृदयाय नमः॥

नमो गणेभ्यो गणपतिभ्यश्च वो नमः। पृष्ठाय नमः॥

नमस्तक्षभ्यो रथकारेभ्यश्च वो नमः। कक्षाभ्यां नमः॥

नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमः॥ पार्श्वाभ्यां नमः॥

विज्यं धनुः कपर्दिनो विशल्यो बाणवाꣳउत। अनेशन्नस्येषव आभुरस्य निषंगथिः। जठराय नमः॥

हिरण्यगर्भस्समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्। सदाधार पृथिवीन्द्यामुतेमां कस्मै देवाय हविषा विधेम॥ नाभ्यै नमः॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मीढुष्टम शिवतम शिवोनस्सुमना भव। परमे वृक्ष आयुधं निधाय कृत्तिं वसान आचर पिनाकं बिभ्रदागहि॥ कठ्यै नमः॥

ये भूतानामधिपतयो विशिखासः कपर्दिनः। तेषाꣳ सहस्त्रयोजनेऽव धन्वानि तन्मसि। गुह्याय नमः॥

ये अन्नेषु विविध्यन्ति प्रात्रेषु पिबतो जनान्। तेषाꣳ सहस्त्रयोजनेऽव धन्वानि तन्मसि। अण्डाभ्यां नमः॥

स शिरा जातवेदा अक्षरं परमं पदम्। वेदानाꣳशिरसि माता आयुष्मन्तं करोतु माम्॥ अपानाय नमः॥

मानो महान्तमुत मानो अर्भकं मा न उक्षन्त-मुत मा न उक्षितम्। मा नो वधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः॥ ऊरु मध्यमाभ्यां नमः॥

एष ते रुद्रभागस्तञ्जुषस्व तेनावसेन परो मूजवतोऽतीहयवततधन्वा पिनाकहस्तः कृत्तिवासाः॥ जानुभ्यां नम॥

सꣳसृष्टजिथ्सोमपा बाहुशध्यूर्ध्वधन्वा प्रतिहिताभिरस्ता। बृहस्पते परिदीया रथेन रक्षोहाऽमित्राꣳ अपबाधमानः॥ जंघा-भ्यां नमः॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत्। सर्वो ह्येष रुद्र-स्तस्मै रुद्राय नमो अस्तु॥ गुल्फाभ्यां नमः॥

ये पथां पथिरक्षय ऐलबृदा यव्युधः। तेषाꣳ सहस्र योजनेऽवधन्वानि तन्मसि॥ पादाभ्यां नमः॥

अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक्। अहीꣳश्च सर्वाँ जम्भयन् सर्वाँश्च यातुधान्यः॥ कवचाय हुम्॥

नमो बिल्मिने च कवचिने च नमः श्रुताय च श्रुतसेनाय च॥ उपकावचाय हुम्॥

नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे। अथो ये अस्य सत्वानोऽहन्तेभ्यो करन्नमः॥ नेत्रत्रयाय वौषट्॥

प्रमुंच धन्वनस्त्वमुभयोरार्त्नियोर्ज्याम्। याश्च ते हस्त इषवः परा ता भगवो वप॥ अस्त्राय फट्॥

य एतावन्तश्च भूयाꣳसश्च दिशो रुद्रा वितस्थिरे। तेषाꣳसहस्रयोजनेऽवधन्वानि तन्मसि॥ इति दिग्बन्धः॥

ओं-मूर्ध्ने नमः। नं-नासिकाभ्यां नमः। मों-ललाटाय नमः। भं मुखाय नमः। गं-कण्ठाय नमः। वं-हृदयाय नमः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तें-दक्षिण हस्ताय नमः। रुं-वामहस्ताय नमः। द्रां-नाभ्यै नमः। यं-पादाभ्यां नमः॥

सद्योजातं प्रपद्यामि सद्यो जाताय वै नमो नमः। भवे भवे नातिभवे भवस्व मां। भवोद्भवाय नमः॥ पादाभ्यां नमः॥

वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नम स्सर्वभूतदमनाय नमो मनोन्मनाय नमः॥ मध्यमाभ्यां नमः॥

अघोरेऽभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः। सर्वेभ्यस्सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्य॥ हृदयाय नमः॥

तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात्॥ मुखाय नमः॥

ईशानस्सर्वविद्याना-मीश्वरस्सर्वभूतानां ब्रह्माधिपति-र्ब्रह्मणोधिपति-र्ब्रह्मा शिवो मे अस्तु सदाशिवोम्॥ मूर्ध्ने नमः॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अस्य श्री हंसगायत्री स्तोत्र महामन्त्रस्य अव्यक्त परब्रह्म ऋषिः, अव्यक्त गायत्री छन्दः, परमहंसो देवता॥ हंसां बीजम्, हंसीं-शक्तिः, हंसूं-कीलकम्॥ परमहंस-प्रसाद सिद्ध्यर्थे जपे विनियोगः॥

हंसां-अंगुष्ठाभ्यां नमः। हंसीं-तर्जनीभ्यां नमः। हंसूं-मध्यमाभ्यां नमः। हंसैं-अनामिकाभ्यां नमः। हंसौं-कनिष्ठिकाभ्यां नमः। हंसः-करतल-करपृष्ठाभ्यां नमः॥

हंसां-हृदयाय नमः। हंसीं-शिरसे स्वाहा। हंसूं-शिखायै वषट्। हंसैं-कवचाय हुं। हंसौं-नेत्रत्रयाय वौषट्। हंसः अस्त्राय फट्॥

भूर्भुवस्सुवरोमिति दिग्बन्धः॥ ध्यानम्॥ गमागमस्थं गमनादिशून्यं चिद्रूपदीपं तिमिरापहारम्। पश्यामि ते सर्व-जनान्तरस्थं नमामि हंसं परमात्मरूपम्॥ देहो देवालयः प्रोक्तो जीवो देवस्सनातनः। त्यजेदज्ञान निर्माल्यं सोऽहं भावेन पूजयेत्। हंसो हंसः परम हंसः, हंसस्सोहं सोहं हंसः। हंस हंसाय विद्महे परमहंसाय धीमहि। तन्नो हंसः प्रचोदयात्॥

हंस हंसेति यो ब्रूयांद्धसो नम सदाशिवः। एवं न्यास-विधिं कृत्वा ततः संपुटमारभेत्॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ओं भूर्भुवस्सुवरों * ओं लं-त्रातारमिंन्द्र मवितारमिन्द्रꣳ हवे हवे सुहवꣳ शूरमिन्द्रम्। हुवे नु शक्रं पुरुहूतमिन्द्रꣳ स्वस्ति नो मघवा धात्विन्द्रः॥ ओं लं-भूर्भुवस्सुवः-इन्द्राय वज्रहस्ताय सुराधिपतये ऐरावतावाहनाय सांगाय सायुधाय सशक्ति-सपरिवाराय सर्वालंकारभूषिताय उमामहेश्वर पार्षदाय नमः। पूर्व-दिग्भागे इन्द्राय ललाटस्थाने इन्द्राय नमः। इन्द्रः सुप्रीतो वरदो भवतु॥

ओं भूर्भुवस्सुवरो। नं, रं,-त्वन्नो अग्ने वरुणस्य विद्वान् देवस्य हेडोऽव यासिसीष्ठाः। यजिष्ठो वह्नितमश्शोशुचानो विश्वा द्वेषाꣳसि प्रमुमुग्ध्यस्मत्॥ नं, रं,-भूर्भुवस्सुवः-अग्नये शक्ति-हस्ताय तेजोऽधिपतयेऽजवाहनाय सागंय सायुधाय सशक्तये सपरिवाराय सर्वालंकार भूषिताय उमामहेश्वर पार्षादाय नमः। आग्नेयदिग्भागे अग्नये नमः। नेत्रयोस्थाने अग्नये नमः। अग्निः सुप्रीतो वरदो भवतु॥

ओं भूर्भुवस्सुवरों। मों हं-सुगन्नः पन्थामभयं कृणोतु। यस्मिन्नक्षत्रे यम एति राजा। यस्मिन्नेन-मभ्यषिंचन्त देवाः। तदस्य चित्रꣳहविषा यजाम॥ मों हं-भूर्भुवस्सुवः-यमाय दण्डहस्ताय धर्माधिपतये महिषवाहनाय सांगाय सायुधाय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सशक्तये संपरिवाराय सर्वालंकार भूषिताय उमा महेश्वर पार्षदाय नमः। दक्षिण-दिग्भागे यमाय नमः। कर्णयोस्थाने यमाय नमः। यमः सुप्रीतो वरदो भवतु॥

ओं भूर्भुवस्सुवरों भं षं-असुन्वन्त-मयजमानमिच्छ स्तेनस्येत्यान्तस्करस्यान्वेषि। अन्यमस्मदिच्छ सा त इत्या नमो देवि निर्ऋते तुभ्यमस्तु॥ भं षं-भूर्भुवस्सुवः। निऋतये खड्गह-स्ताय रक्षोधिपतये नरवाहनाय सांगाय सायुधाय सशक्तये सपरिवाराय सर्वालंकार भूषिताय उमामहेश्वर पार्षदाय नमः। निर्ऋतिदिग्भागे निर्ऋतये नमः। मुखस्थाने निर्ऋतये नमः। निर्ऋतिस्सुप्रीतो वरदो भवतु॥

ओं भूर्भुवस्सुवरों। गं वं-तत्त्वा यामि ब्रह्मणा वन्दमान-स्तदा शास्ते यजमानो हविर्भिः। अहेडमानो वरुणेहबोध्युरुशꣳ स मा न आयुः प्रमोषीः॥ गं वं-भूर्भुवस्सुवः-वरुणाय पाशह-स्ताय जलाधिपतये मकरवाहनाय सांगाय सायुधाय सशक्तये सपरिवाराय सर्वालंकार भूषिताय उमामहेश्वर पार्षदाय नमः। पश्चिमदिग्भागे वरुणाय नमः। बाहुस्थाने वरुणाय नमः। वरुणः सुप्रीतो वरदो भवतु॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ओं भूर्भुवस्सुवरों वं यं-आ नो नियुद्भिश्शतिनीभि-रध्वरम्। सहस्त्रिणीभि-रुपयाहि यज्ञम्। वायो अस्मिन् हविषि मादयस्व। यूयं पात स्वस्तिभिस्सदा नः॥ वं, यं-भूर्भुवस्सुवः-वायवे सांकुशध्वजहस्ताय प्राणाधिपतये मृग-वाहनाय सांगाय सायुधाय सशक्तये सपरिवाराय सर्वालंकार भूषिताय उमामहेश्वर पार्षदाय नमः। वायव्य दिग्भागे वायवे नमः। नासिकायो स्थाने वायवे नमः। वायुः सुप्रीतो वरदो भवतु॥

ओं भूर्भुवस्सुवरों। तें सं-वयंसोम व्रते तव। मनस्तनूषु बिभ्रतः। प्रजावन्तो अशीमहि॥ तें सं-भूर्भुवस्सुवः-सोमाय अमृतकलशहस्ताय नक्षत्राधिपतये अश्ववाहनाय सांगाय सायुधाय सशक्तये सपरिवाराय सर्वालंकार भूषिताय उमामहेश्वर पार्षदाय नमः। उत्तरदिग्भागे सोमाय नमः। हृदयस्थाने सोमाय नमः। सोमः सुप्रीतो वरदो भवतु॥

ओं भूर्भुवस्सुवरों। रुं शं-तमीशानं जगत-स्तस्थुषस्पतिम्। धियं जिन्वमवसे हूमहे वयम्। पूषा नो यथा वेदसामसद् वृधे। रक्षिता पायु-रदब्धस्स्वस्तये॥ रुंशं-भूर्भुवस्सुवः। ईशानाय त्रिशूलहस्ताय भूताधिपतये*

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वृषभवाहनाय सांगाय सायुधाय सशक्तये सपरिवाराय सर्वालंकार भूषिताय उमामहेश्वर पार्षदाय नमः। ईशानदिग्भागे ईशानाय नमः नाभिस्थाने । ईशानाय नमः। ईशानः सुप्रीतो वरदो भवतु॥

ओं भुर्भुवस्सुवरोम्। द्रां खं* अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भर हूतौ सजोषाः। यश्शंसते स्तुवते धायि पज्र इन्द्रज्येष्ठा अस्मां अवन्तु देवाः॥ द्रां खं-भूर्भुवस्सुवः-ब्रह्मणे पद्महस्ताय प्रजाधिपतये हंसवाहनाय सांगाय सायुधाय सशक्तये सपरिवाराय सर्वालंकार भूषिताय उमामहेश्वर पार्षदाय नमः। ऊर्ध्वदिग्भागे ब्रह्मणे नमः। मूर्धनिस्थाने ब्रह्मणे नमः। ब्रह्मा सुप्रीतो वरदो भवतु॥

ओं भूर्भुवस्सुवरों। यं ह्रीं-स्योना पृथिवि भवानृक्षरा निवेशनी। यच्छानश्शर्म सप्रथाः। यं ह्रीं- भूर्भुवस्सुवः-विष्णवे चक्र-हस्ताय नागाधिपतये गरुडवाहनाय सांगाय सायुधाय सशक्तये सपरिवाराय सर्वालंकार भूषिताय उमामहेश्वर पार्षदाय नमः। अधोदिग्भागे विष्णवे नमः। पादयोस्थाने विष्णवे नमः। विष्णुस्सुप्रीतो वरदो भवतु॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ षोडशांग-रौद्रीकरणम् ॥

ओं भूर्भुवस्सुवः। ओं अं। नमश्शंभवे च मयोभवे च नमश्शंकराय च मयस्कराय च नमश्शिवाय च शिवतराय च॥ *विभूरसि प्रवाहणो रौद्रेणानीकेन पाहि मा ऽग्ने पिपृहि मा मा मा हिंसीः॥ अं। भूर्भुवस्सुवरोम्। शिखास्थाने रुद्राय नमः॥

ओं भर्भूवस्सुवः। ओं आं। नमश्शंभवेच मयोभवे च नमश्शंकराय च मयस्कराय च नमश्शिवाय च शिवतराय च। वह्निरसि हव्यवाहनो रौद्रेणानीकेन पाहिमा ऽग्ने पिपृहि मा मा मा हिंसीः॥ आं ओं भूर्भुवस्सुवरोम्। शिरस्थाने रुद्राय नमः॥

ओं भूर्भुवस्सुवः। ओं इं। नमः शंभवे च मयोभवे च नमश्शंकराय च मयस्कराय च नमश्शिवाय च शिवतराय च। श्वात्रोसि प्रचेताः रौद्रेणानीकेन पाहिमा ग्ने पिपृहि मा मा मा हिंसीः। इं। भूर्भुवस्सुवरोम्॥ मूर्ध्निस्थाने रुद्राय नमः॥

ओं भूर्भुवस्सुवः। ओं ईं। नमः शंभवे च मयोभवे च नमश्शंकराय च मयस्कराय च नमश्शिवाय य शिवतराय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

च। तुथोसि विश्ववेदा रौद्रेणानीकेन पाहिमाग्ने पिपृहि मा मा मा हिंसीः। ईं। भूर्भुवस्सुवरोम्॥ ललाटस्थाने रुद्राय नमः॥

ओं भूर्भुवस्सुवः। ओं उं। नमः शंभवे च मयोभवे च नमश्शंकराय च मयस्कराय च नमश्शिवाय च शिवतराय च। उशिगसिकवी रौद्रेणानीकेन पाहिमाग्ने पिपृहि मा मा मा हिंसीः। उं। भूर्भुवस्सुवरोम्॥ भ्रूवोस्थाने रुद्राय नमः॥

ओं भूर्भूवस्सुवः। ओं ऊं। नमः शंभवे च मयोभवे च नमश्शंकराय च मयस्कराय च नमश्शिवाय च शिवतराय च। अंघारिरसि बंभारी रौद्रेणानीकेन पाहिमाग्ने पिपृहि मा मा मा हिंसीः। ऊं भूर्भुवस्सुवरोम्। मुखस्थाने रुद्राय नमः॥

ओं भूर्भुवस्सुवः। ओं ऋं। नमः शंभवे च मयोभवे च नमश्शंकराय च मयस्कराय च नमश्शिवाय च शिवतराय च। अवस्युरसि दुवस्वान् रौद्रेणानीकेन पाहिमाग्ने पिपृहि मा मा मा हिंसीः। ऋं भूभुवस्सुवरोम्॥ कण्ठस्थाने रुद्राय नमः॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ओं भूर्भुवस्सुवः। ओं ॠ। नमः शंभवे च मयोभवे च नमश्शंकराय च मयस्कराय च नमश्शिवाय च शिवतराय च। शुन्ध्यूरसि मार्जालीयो रौद्रेणानीकेन पाहिमाग्ने पिपृहि मा मा मा हिंसीः। ॠ। भूर्भुवस्सुवरोम्॥ बाह्वोस्थाने रुद्राय नमः॥

ओं भूर्भुवस्सुवः। ओं ऌ। नमः शंभवे च मयोभवे च नमश्शंकराय च मयस्कराय च नमश्शिवाय च शिवतराय च। सम्राडसि कृशानू रौद्रेणानीकेन पाहिमाग्ने पिपृहि मा मा मा हिंसीः। ऌ भूर्भुवस्सुवरोम्॥ उरस्थाने रुद्राय नमः॥

ओं भूर्भुवस्सुवः। ओं ॡ। नमः शंभवे च मयोभवे च नमश्शंकराय च मयस्कराय च नमश्शिवाय च शिवतराय च। परिषद्योसि पवमानो रौद्रेणानीकेन पाहिमाग्ने पिपृहि मा मा मा हिंसीः। ॡ ओं भूर्भुवस्सुवरोम्॥ हृदयस्थाने रुद्राय नमः॥

ओं भूर्भुवस्सुवः। ओं एं। नमः शंभवे च मयोभवे च नमश्शंकराय च मयस्कराय च नमश्शिवाय च शिवतराय च। प्रतक्वासि नभस्वान् रौद्रेणानीकेन पाहिमाग्ने पिपृहि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मा मा मा हिंसीः। एं। भूर्भुवस्सुवरोम्॥ नाभिस्थाने रुद्राय नमः॥

ओं भूर्भुवस्सुवः। ओं ऐं। नमः शंभवे च मयोभवे च नमश्शंकराय च मयस्कराय च नमश्शिवाय च शिवतराय च। असंमृष्टोसि हव्यसूदो रौद्रेणानीकेन पाहिमा ग्ने पिपृहि मा मा मा हिंसीः। ऐं। भूर्भुवस्सुवरोम्। कटिस्थाने रुद्राय नमः॥

ओं भूर्भुवस्सुवः। ओं ओं। नमः शंभवे च मयोभवे च नमश्शंकराय च मयस्कराय च नमश्शिवाय च शिवतराय च। ऋतधामासि सुवर्ज्योती रौद्रेणानीकेन पाहिमा ग्ने पिपृहि मा मा मा हिंसीः। ओं। भुर्भुवस्सुवरोम्। ऊर्वोस्थाने रुद्राय नमः॥

ओं भूर्भुवस्सुवः। ओं औं। नमः शंभवे च मयोभवे च नमश्शंकराय च मयस्कराय च नमश्शिवाय च शिवतराय च। ब्रह्मज्योतिरसि सुवर्धामा रौद्रेणानीकेन पाहिमा ग्ने पिपृहि मा मा मा हिंसीः। औं। भूर्भुवस्सुवरोम्। जान्वोस्थाने रुद्राय नमः॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ओं भुर्भुवस्सुवः। ओं अं। नमः शंभवे च मयोभवे च नमश्शंकराय च मयस्कराय च नमश्शिवाय च शिवतराय च। अजो स्येकपाद् रौद्रेणानीकेन पाहिमा ग्ने पिपृहि मा मा मा हिंसीः। अं ओं भूर्भुवस्सुवरोम्॥ जंघयोस्थाने रुद्राय नमः॥

ओं भूर्भुवस्सुवः। ओं अः। नमः शंभवे च मयोभवे च नमश्शंकराय च मयस्कराय च नमश्शिवाय च शिवतराय च। अहिरसि बुध्नियो रौद्रेणानीकेन पाहि मा ग्ने पिपृहि मा मा मा हिंसीः॥ अः। भूर्भुवस्सुवरोम्॥ पादयोस्थाने रुद्राय नमः॥

त्वगस्थिगतैः सर्वपापैः प्रमुच्यते। सर्वभूतेष्वपराजितो भवति। ततो भूतप्रेत-पिशाच-ब्रह्मराक्षस-यक्ष-यमदूत-शकिनी-डाकिनी-सर्प-श्वापद-वृश्चिक-तस्करा-द्युपद्रवा-द्युपघाताः। सर्वे ज्वलन्तं पश्यन्तु। मां रक्षन्तु॥ सर्वानू महाजनान् रक्षन्तु।

मनो ज्योतिर्जुषता-माज्य विच्छिन्नं यज्ञं समिमं दधातु। या इष्टा उषसो निम्रुचश्च तास्मन्दधामि हविषा घृतेन॥ गुह्याय नमः॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अबो॑द्ध्यग्निस्समिधा॒ जना॑नां॒ प्रति॑ धे॒नुमि॑वाय॒ती-मु॒षास॑म्। य॒ह्वा इ॑व॒ प्रव॒यामु॒ज्जिहा॑नाः॒ प्रभा॒नव॑स्सिस्रते॒ नाक॒मच्छ॑॥ नाभ्यै नमः॥

अ॒ग्निर्मू॒र्धा दि॒वः क॒कुत् पतिः॑ पृथि॒व्या अ॒यम्। अ॒पाꣳरेताꣳ॑सि जिन्वति॥ हृदयाय नमः॥

मू॒र्धानं॑ दि॒वो अ॑र॒तिं पृ॑थि॒व्या वै॑श्वान॒रमृ॒ताय॑ जा॒त-म॒ग्निम्। क॒विꣳस॒म्राज॒-मति॑थिं॒ ज॑नानामा॒सन्ना पात्रं॑ जनयन्त दे॒वाः॥ कण्ठाय नमः॥

मर्माणि ते॒ वर्म॑भिश्छादयामि॒ सोम॑स्त्वा॒ राजा॒ऽमृते॑ना॒भि व॑स्ताम्। उ॒रोर्वरी॑यो॒ वरि॑वस्ते अस्तु॒ जय॑न्तं॒ त्वा मनु॑मदन्तु दे॒वाः॥ मुखाय नमः॥

जा॒तवे॑दा॒ यदि॑ वा पाव॒कोऽसि॑। वै॒श्वा॒न॒रो यदि॑ वा वैद्यु॒तोऽसि॑। शंप्र॒जाभ्यो॒ यज॑मानाय लो॒कम्॥ ऊर्जं॒ पुष्टिं॒ दद॒द्भ्याव॑वृत्स्व॥ शिरसे नमः॥

ब्रह्मा॑त्म॒न्वद॑सृजत। तद॑कामयत। समा॒त्मना॑ पद्ये॒येति॑। आत्म॒न्नात्म॒न्नित्याम॑न्त्रयत। तस्मै॑ दश॒मꣳ हू॒तः प्रत्य॑शृणोत्। स दश॑हूतोऽभवत्। दश॑हूतो ह॒वै नामै॒षः। तं वा ए॒तं दश॑-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हूतꣳसन्तम्। दशहोतेत्याचक्षते परोक्षेण। परोक्षप्रिया इव हि देवाः॥

आत्मन्नात्मन्नित्यामन्त्रयत। तस्मै सप्तमꣳ हूतः प्रत्यशृणोत्। स सप्तहूतोऽभवत्। सप्तहूतोह वै नामैषः। तं वा एतꣳ सप्तहूतꣳसन्तम्। सप्तहोतेत्याचक्षते परोक्षेण। परोक्षप्रिया इव हि देवाः॥

आत्मन्नात्मन्नित्यामन्त्रयत। तस्मै षष्ठꣳहूतः प्रत्यशृणोत्। स षड्ढूतोऽभवत्। षड्ढूतो ह वै नामैषः। तं वा एतꣳ षड्ढूतꣳ सन्तम्। षडढोतेत्याचक्षते परोक्षेण। परोक्षप्रिया इव हि देवाः॥

आत्मन्नात्मन्नित्यामन्त्रयत। तस्मै पञ्चमꣳ हूतः प्रत्यशृणोत्। स पञ्चहूतोऽभवत्। पञ्चहूतो ह वै नामैषः। तं वा एतं पञ्चहूतꣳ सन्तम्। पञ्चहोतेत्याचक्षते परोक्षेण। परोक्षप्रिया इव हि देवाः॥

आत्मन्नात्मन्नित्यामन्त्रयत। तस्मै चतुर्थꣳ हूतः प्रत्यशृणोत्। स चतुर्हूतोऽभवत्। चतुर्हूतो ह वै नामैषः। तं वा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एतं चतु-र्हूतꣳसन्तम्। चतुर्होतेत्याचक्षते परोक्षेण। परोक्षप्रिया इव हि देवाः॥

तमब्रवीत्। त्वं वै मे नेदिष्ठꣳ हूतः प्रत्यश्रौषीः। त्वयै नानाख्यातार इति। तस्मान्नुहैनाꣳ श्चतुर्होतार इत्याचक्षते। तस्माच्छुश्रूषुः पुत्राणाꣳ हृद्यतमः। नेदिष्ठो हृद्यतमः। नेदिष्ठो ब्रह्मणो भवति। य एवं वेद॥ आत्मने नमः।

येनेदं भूतं भुवनं भविष्यत् परिगृहीतममृतेन सर्वम्। येन यज्ञस्तायते सप्तहोता तन्मे मनश्शिवसंकल्पमस्तु॥

येन कर्माणि प्रचरन्ति धीरा यतो वाचा मनसा चारु यन्ति। यत्सम्मित-मनुसंयन्ति प्राणिनस्तन्मे मनश्शिव-संकल्पमस्तु॥

येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः। यदपूर्वंयक्षमन्तः प्रजानां तन्मे मन श्शिवसंकल्प-मस्तु॥

यत्प्रज्ञान-मुत चेतो धृतिश्च यज्ज्योति रन्तरमृतं प्रजासु यस्मान्न ऋते किंचन कर्म क्रियते तन्मे मन श्शिवसंकल्प-मस्तु॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुषारथिरश्वानिव यन्मनुष्या न्नेनीयतेऽभीशुभिर्वाजिन इव। हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसंकल्पमस्तु॥

यस्मिन्नृचस्साम-यजूंषि यस्मिन् प्रतिष्ठता रथनाभाविवाराः। यस्मिंश्चित्तं सर्वमोतं प्रजानां तन्मे मनः शिवसंकल्पमस्तु॥

यदत्र षष्ठं त्रिशतं सुवीरं यज्ञस्य गुह्यं नवनावमाय्यम्। दश पंच त्रिंशतं यत्परं च तन्मे मनः शिवसंकल्पमस्तु॥

यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति। दूरंगमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु॥

येन द्यौः पृथिवी चान्तरिक्षं च ये पर्वताः प्रदिशो दिशश्च। येनेदं जगद्व्याप्तं प्रजानां तन्मे मनः शिवसंकल्पमस्तु॥

येनेदं विश्वं जगतो बभूव ये देवापि महतो जातवेदाः। तदेवाग्निस्तमसो ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु॥

ये मनो हृदयं ये च देवा ये दिव्या आपो ये सूर्यरश्मिः। ते श्रोत्रे चक्षुषी सञ्चरन्तं तन्मे मनः शिवसंकल्पमस्तु॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अचिन्त्यं चा प्रमेयं च व्यक्ताव्यक्तं परं च यत्। सूक्ष्मात् सूक्ष्मतरं ज्ञेयं तन्मे मन श्शिवसंकल्प-मस्तु॥

एका च दश शतं च सहस्रं चायुतं च नियुतं च प्रयुतं चार्बुदं च न्यर्बुदं च समुद्रश्च मध्यं चान्तश्च परार्धश्च तन्मे मन श्शिवसंकल्प-मस्तु॥

ये पंच पंचादश शतꣳ सहस्र-मयुतन्न्यर्बुदं च। ते अग्निचित्येष्टकास्तꣳ शरीरं तन्मे मन श्शिवसंकल्प-मस्तु॥

वेदाहमेतं पुरुषं महान्त-मादित्यवर्णन्तमसः परस्सात्। यस्य योनिं परिपश्यन्ति धीरास्तन्मे मन श्शिवसंकल्प-मस्तु॥

यस्येदं धीराः पुनन्ति कवयो ब्रह्माणमेतं त्वा वृणत इन्दुम्। स्थावरं जंगमं द्यौराकाशं तन्मे मन श्शिवसंकल्प-मस्तु॥

परात्परतरं चैव यत्पराच्चैव यत्परम्। यत्परात्परतो ज्ञेयं तन्मे मन श्शिवसंकल्प-मस्तु॥

परात्परतरो ब्रह्मा तत्परात्परतो हरिः। तत्परात्परतोऽधीशस्तन्मे मन श्शिवसंकल्प-मस्तु॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

या वेदादिषु गायत्री सर्वव्यापी महेश्वरी। ऋग्यजुस्स-माथर्वैश्च तन्मे मनः शिवसंकल्प-मस्तु॥

यो वै देवं महादेवं प्रणवं परमेश्वरम्। यस्मर्वे सर्ववेदैश्च तन्मे मनः शिवसंकल्प-मस्तु॥

प्रयतः प्रणवोङ्कारं प्रणवं पुरुषोत्तमम्। ओंकारं प्रणवात्मानं तन्मे मनः शिवसंकल्प-मस्तु॥

योऽसौ सर्वेषु वेदेषु पठ्यते ह्यज ईश्वरः। अकायो निर्गुणोह्यात्मा तन्मे मनः शिवसंकल्प-मस्तु॥

गोभिर्जुष्टं धनेन ह्यायुषा च बलेन च। प्रजया पशुभिः पुष्कराक्षं तन्मे मनः शिवसंकल्प-मस्तु॥

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् तन्मे मनः शिवसंकल्प-मस्तु॥

कैलास शिखरे रम्ये शंकरस्य शिवालये। देवतास्तत्र मोदन्ते तन्मे मनः शिवसंकल्प-मस्तु॥

विश्वत श्चक्षुरुत विश्वतो मुखो विश्वतो हस्त उत विश्वतस्पात्। संबाहुभ्यान्नमति संपतत्रै-र्द्यावापृथिवी जनयन् देव एकस्तन्मे मनः शिवसंकल्प-मस्तु॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चतुरो वेदानधीयीत सर्वशास्त्रमयं विदुः। इतिहास पुराणानां तन्मे मन श्शिवसंकल्प-मस्तु॥

मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्त-मुत मा न उक्षितम्। मा नो वधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषस्तन्मे मन श्शिवसंकल्प-मस्तु॥

मा न स्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः। वीरान्मा नो रुद्र भामितोऽवधी-र्हविष्मन्तो नमसा विधेम ते तन्मे मन श्शिवसंकल्प-मस्तु॥

ऋतꣳ सत्यं परं ब्रह्म पुरुषं कृष्णपिंगलम्। ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमस्तन्मे मन श्शिवसंकल्प-मस्तु॥

कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे। वोचेम शन्तमꣳहृदे। सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु तन्मे मन श्शिवसंकल्प-मस्तु॥

ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतस्सुरुचो वेन आवः। स बुध्निया उपमा अस्य विष्ठास्सतश्च योनि-मसतश्च विवस्तन्मे मन श्शिवसंकल्प-मस्तु॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव। य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम तन्मे मन श्शिवसंकल्प-मस्तु॥

य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः। यस्य छायाऽमृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम तन्मे मन श्शिवसंकल्प-मस्तु॥

यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवनाऽऽविवेश तस्मै रुद्राय नमो अस्तु तन्मे मन श्शिवसंकल्प-मस्तु॥

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्व भूतानां तामिहोपह्वये श्रियम्। तन्मे मन श्शिवसंकल्प-मस्तु॥

य इदं शिवसंकल्पं सदा ध्यायन्ति ब्राह्मणाः। ते परं मोक्षं गमिष्यन्ति तन्मे मनः शिवसङ्कल्पमस्तु॥

हृदयाय नमः॥

पुरुषसूक्तम्॥

सहस्रशीर्षा पुरुषः। सहस्राक्षः सहस्रपात्। स भूमिं विश्वतो वृत्वा। अत्यतिष्ठद्दशांगुलम्। पुरुष एवेदं सर्वम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यद्भूतं यच्च भव्यम्। उतामृतत्त्वस्येशानः। यदन्नेनातिरोहति। एतावानस्य महिमा। अतो ज्यायाꣳश्च पूरुषः। पादोऽस्य विश्वा भूतानि। त्रिपादस्यामृतं दिवि। त्रिपादूर्ध्व उदैत्पुरुषः। पादोस्येहा भवात्पुनः। ततो विष्वं व्यक्रामत्। साशनानशने अभि। तस्माद्विराडजायत। विराजो अधिपूरुषः। स जातो अत्यरिच्यत। पश्चाद्भूमिमथो पुरः। यत्पुरुषेण हविषा। देवा यज्ञमतन्वत। वसन्तो अस्यासीदाज्यम्। ग्रीष्म इध्मश्शरद्धविः। सप्तास्यासन् परिधयः। त्रिस्सप्तसमिधः कृताः। देवा यद्यज्ञं तन्वानाः। अबध्नन् पुरुषं पशुम्। तं यज्ञं बर्हिषि प्रौक्षन्। पुरुषं जातमग्रतः। तेन देवा अयजन्त। साध्या ऋषयश्च ये। तस्माद्यज्ञात्सर्वहुतः। संभृतं पृषदाज्यम्। पशूꣳ स्ताꣳश्चक्रे वायव्यान्। आरण्यान् ग्राम्याश्च ये। तस्माद्यज्ञात्सर्वहुतः। ऋचस्सामानि जज्ञिरे॥ छन्दाꣳसि जज्ञिरे तस्मात्। यजुस्तस्मादजायत। तस्मादश्वा अजायन्त। ये के चोभयादतः। गावो ह जज्ञिरे तस्मात्। तस्माज्जाता अजावयः। यत्पुरुषं व्यदधुः। कतिधा व्यकल्पयन्। मुखं किमस्य कौ बाहू। कावूरू पादा वुच्येते। ब्राह्मणोऽस्य मुखमासीत्। बाहू राजन्यः कृतः। ऊरू तदस्य यद्वैश्यः। पद्भ्याꣳ शूद्रो अजायत।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चन्द्रमा मनसो जातः। चक्षोस्सूर्यो अजायत। मुखादिन्द्रश्चाग्निश्च। प्राणाद्वायुरजायत। नाभ्यां आसीदन्तरिक्षम्। शीर्ष्णो द्यौस्समवर्तत। पद्भ्यां भूमिर्दिशः श्रोत्रात्। तथा लोकाः अकल्पयन्। वेदाहमेतं पुरुषं महान्तम्। आदित्यवर्णं तमसस्तु पारे। सर्वाणि रूपाणि विचित्य धीरः। नामानि कृत्वाऽभिवदन् यदास्ते। धाता पुरस्ताद्यमुदाजहार। शक्रः प्रविद्वान् प्रदिश श्चतस्रः। तमेवं विद्वानमृत इह भवति। नान्यः पन्था अयनाय विद्यते। यज्ञेन यज्ञमयजन्त देवाः। तानि धर्माणि प्रथमानयासन्। तेह नाकं महिमानस्सचन्ते। यत्र पूर्वे साध्याः सन्ति देवाः॥

शिरसे स्वाहा॥

उत्तरनारायणम्॥

अद्भ्यः संभूतः पृथिव्यै रसाच्च। विश्वकर्मणस्समवर्तताधि। तस्य त्वष्टा विदधद्रूपमेति। तत्पुरुषस्य विश्वमाजानमग्रे। वेदाहमेतं पुरुषं महान्तम्। आदित्यवर्णं तमसः परस्तात्। तमेवं विद्वानमृत इह भवति। नान्यः पन्था विद्यतेऽयनाय। प्रजापतिश्चरति गर्भे अन्तः। अजायमानो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बहुधा विजायते। तस्य धीराः परिजानन्ति योनिम्। मरीचीनां पदमिच्छन्ति वेधसः। यो देवेभ्य आतपति। यो देवानां पुरोहितः। पूर्वो यो देवभ्यो जातः। नमो रुचाय ब्राह्मये। रुचं ब्राह्मं जनयन्तः। देवा अग्रे तदब्रुवन्। यस्त्वैवं ब्राह्मणो विद्यात्। तस्य देवा असन्वशे। ह्रीश्च ते लक्ष्मीश्च पत्न्यौ। अहोरात्रे पार्श्वे। नक्षत्राणि रूपम्। अश्विनौ व्यात्तम्। इष्टं मनिषाण। अमुं मनिषाण। सर्वं मनिषाण॥

शिखायै वषट्॥

आशुश्शिशानो वृषभो न युध्मो घनाघनः क्षोभणश्चर्षणीनाम्। सक्रन्दनोऽनिमिष एक वीरश्शतꣳ सेना अजयत्साकमिन्द्रः। संक्रन्देनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना। तदिन्द्रेण जयत तत्सहध्वं युधो नर इषुहस्तेन वृष्णा। स इषुहस्तैः स निषंगिभिर्वशी सꣳस्त्रष्टा सयुध इन्द्रो गणेन। सꣳसृष्टजित्सोमपा बाहुशर्ध्यूर्द्धधन्वा प्रतिहिताभि रस्ता। बृहस्पते परिदीया रथेन रक्षोहाऽमित्राꣳ अप बाधमानः। प्रभजन्त्सेनाः प्रमृणो युधा जयन्नस्माकमेद्ध्यविता रथानाम्। गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा। इमꣳसजाता अनुवीरयध्वमिन्द्रꣳ सखायोऽनु

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सꣳरभध्वम्। बलविज्ञायस्स्थविरः प्रवीरस्सहस्वान् वाजी सहमान उग्रः। अभिवीरो अभिसत्वा सहोजा जैत्रमिन्द्र रथमातिष्ठ गोवित्। अभिगोत्राणि सहसा गाहमोनोऽदायो वीरश्शतमन्युरिन्द्रः। दुश्च्यवनः पृतनाषाडयुध्योऽस्माकꣳ सेना अवतु प्रयुत्सु। इन्द्र आसां नेता बृहस्पति-र्दक्षिणा यज्ञः पुर एतु सोमः। देवसेनानामभिभं-जतीनां जयन्तीनां मरुतो यन्त्वग्रे। इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुताꣳ शर्द्ध उग्रम्। महामनसां भुवनच्य-वानां घोषो देवानां जयता-मुदस्थात्। अस्माक-मिन्द्रस्समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु। अस्माकं वीरा उत्तरे भवन्त्वस्मानु देवा अवता हवेषु। उद्धर्षय मघवन्नायुधान्युत्सत्वनां मामकानां महाꣳसि। उद्वृत्रहन्वाजिनां वाजिनान्युद्रथानां जयतामेतु घोषः। उपप्रेत जयता नरस्स्थिरावस्सन्तु बाहवः। इन्द्रो वः शर्म यच्छत्वनाधृष्या यथाऽसथ। अवसृष्टा परापत शरव्ये ब्रह्म संशिता। गच्छामित्रान् प्रविश मैषां कंचनोच्छिषः। मर्माणि ते वर्मभिश्छादयामि सोमस्त्वा राजाऽमृतेनाभिवस्ताम्। उरोर्वरीयो वरिवस्ते अस्तु जयन्तं त्वामनु मदन्तु देवाः। यत्र

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बाणास्संपतन्ति कुमारा विशिखा इव। इन्द्रो नस्तत्र वृत्रहा विश्वाहा शर्म यच्छतु॥

कवचाय हुं॥

प्रतिपूरुष-मेककपालान्निर्वपत्येकमतिरिक्तं यावन्तो गृह्यास्समस्तेभ्यः कमकरं पशूनाꣳ शर्मासि शर्म यजमानस्य शर्म मे यच्छैक एव रुद्रो न द्वितीयाय तस्थ आखुस्ते रुद्र पशुस्तं जुषस्वैष ते रुद्र भागः सह स्वस्त्राम्बिकया तं जुषस्व भेषजं गवेऽश्वाय पुरुषाय भेषजमथो अस्मभ्यं भेषजꣳ सुभेषजं यथाऽसति। सुगं मेषाय मेष्या अवाम्ब रुद्रमदिमह्यव देवं त्र्यम्बकम्। यथा नः श्रेयसः करद्यथा नो वस्य सः करद्यथानः पशुमतः करद्यथा नो व्यवसाययात्। त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात्। एषते रुद्र भागस्तं जुषस्व तेनावसेन परो मूजवतो ऽतीह्यवतत धन्वा पिनाकहस्तः कृत्तिवासाः॥

प्रतिपूरुषमेककपालान्निर्वपति। जाता एव प्रजा रुद्रान्निरवदयते। एकमतिरिक्तम्। जनिष्यमाणा एव प्रजा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रुद्रान्नि-रवदयते। एककपाला भवन्ति। एकधैव रुद्रं निरवदयते। नाभिघारयति। यदभिघारयेत्। अन्तरवचारिणꣳ रुद्रं कुर्यात्। एकोल्मुकेन यन्ति। (१) तद्धि रुद्रस्य भागधेयम्। इमां दिशं यन्ति। एषा वै रुद्रस्य दिक्। स्वायामेव दिशि रुद्रं निरवदयते। रुद्रो वा अपशुकाया आहुत्यै नातिष्ठत। असौ ते पशुरिति निर्दिशेद्यं द्विष्यात्। यमेव द्वेष्टि। तमस्मै पशुं निर्दिशति। यदि न द्विष्यात्। आखुस्ते पशुरिति ब्रूयात्। (२) न ग्राम्यान् पशून् हिनस्ति। नारण्यान्। चतुष्पथे जुहोति। एष वा अग्नीनां पड्वीशो नाम। अग्निवत्येव जुहोति। मध्यमेन पर्णेन जुहोति। स्त्रुग्घ्येषा। अथो खलु। अन्तमेनैव होतव्यम्। अन्तत एव रुद्र निरवदयते। (३) एष ते रुद्र भागः सह स्वस्त्रा ऽम्बिकयेत्याह। शरद्वा अस्याम्बिका स्वसा। तया वा एष हिनस्ति। यꣳ हिनस्ति। तयैवैनꣳ सह शमयति। भेषजंगव इत्याह। यावन्त एव ग्राम्याः पशवः। तेभ्यो भेषजं करोति। अवाम्ब रुद्रमदिमहीत्याह। आशिषमेवैतामाशास्ते। (४) त्र्यम्बकं यजामह इत्याह। मृत्योर्मुक्षीय माऽमृतादिति वा वै तदाह। उत्किरन्ति। भगस्य लीप्सन्ते। मूते कृत्वा सजन्ति। यथा जनं यतेऽवसंकरोति। तादृगेव तत्। एष ते रुद्र भाग

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इत्याह निरवत्त्यै। अप्रतीक्षमायन्ति। अपः परिषिंचति। रुद्रस्यान्तर्हित्यै। प्रवा एते ऽस्माल्लोकाच्च्यवन्ते। ये त्र्यम्बकैश्चरन्ति। आदित्यं चरुं पुनरेत्य निर्वपति। इयं वा अदितिः। अस्यामेव प्रतितिष्ठन्ति॥ ५॥

नेत्रत्रयाय वौषट्॥

त्वमग्ने रुद्रो असुरो महो दिवस्त्वꣳ शर्धो मारुतं पृक्ष ईशिषे। त्वं वातैररुणैर्यासि शंगयस्त्वं पूषा विधतः पासि नुत्माना। आ वो राजानमध्वरस्य रुद्रꣳ होतारꣳ सत्ययजꣳरोदस्योः। अग्निं पुरा तनयित्नोरचित्ता-द्धिरण्यरूप-मवसे कृणुध्वम्। अग्निर्होता निषसादा यजीयानुपस्थे मातुः सुरभावु लोके। युवा कविः पुरुनिष्ठः (१) ऋतावा धर्ताकृष्टीना मुत मध्य इद्धः। साध्वीमकर्देववीतिन्नो अद्य यज्ञस्य जिह्वामविदाम गुह्याम्। स आयुरागात् सुरभिर्वसानो भद्रामकर्देवहूतिं नो अद्य। अक्रन्ददग्निस्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समंजन्। सद्यो जज्ञानो विहीमिद्धो अख्यदा रोदसी भानुना भात्यन्तः। त्वे वसूनि पुर्वणीक (२) होतर्दोषा वस्तो रेरिरे यज्ञियासः। क्षामेव विश्वा भुवनानि यस्मिन्त्सꣳ सौभगानि दधिरे पावके। तुभ्यं ता अंगिरस्तम विश्वाः

CC-0. In Public Domain. Panikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुक्षितयः पृथक्। अग्ने कामाय येमिरे। अश्याम तं काममग्ने तवोत्यश्याम रयिꣳ रयिवः सुवीरम्। अश्याम वाजमभिवाजयन्तोशयाम द्युम्नमजरा जरन्ते। श्रेष्ठं यविष्ठ भारताग्ने द्युमन्तमाभर। (३) वसो पुरुस्पृहꣳरयिम्। सश्चितानस्तन्यतू रोचनस्था अजरेभि-र्नानदद्भि-र्यविष्ठः। यः पावकः पुरुतमः पुरूणि पृथून्यग्नि रनुयाति भर्वन्। आयुष्टे विश्वतो दधदयमग्नि वरेण्यः। पुनस्ते प्राण आयति परा यक्ष्मꣳ सुवामि ते। आयुर्दा अग्ने हविषो जुषाणो घृतप्रतीको घृतयोनिरेधि। घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभि (४) रक्षतादिमम्। तस्मै ते प्रतिहर्य ते जातवेदो विचर्षणे। अग्ने जनामि सुष्टुतिम्। दिवस्परि प्रथमं जज्ञे अग्निरस्मद् द्वितीयं परि जातवेदाः। तृतीयमप्सु नृमणा अजस्त्रमिन्धान एनं जरते स्वाधीः। शुचिः पावक वन्द्योऽग्ने बृहद्विरोचसे। त्वं घृतेभिराहुतः। दृशानो रुक्म उर्व्या व्यद्यौद् दुर्मर्षमायुः श्रिये रुचानः अग्निरमृतो अभवद्वयोभिः। (५) यदेनं द्यौरजनयत् सुरेताः। आ यदिषे नृपतिं तेज आनट् शुचिरेतो निषिक्तं द्यौरभीके। अग्निः शर्ध-मनवद्यं युवानꣳ स्वाधियं जनयत् सूदयच्च। स तेजीयसा मनसा त्वोत उत शिक्ष स्वपत्यस्य

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शिक्षोः। अग्ने रायो नृतमस्य प्रभूतौ भूयाम ते सुष्टुतयश्च वस्वः। अग्ने सहन्त-माभर द्युम्नस्य प्रासहा रयिम्। विश्वायः (६) चर्षणीरभ्यासा वाजेषु सासहत्। तमग्ने पृतनासहꣳ रयिꣳ सहस्व आभर। त्वꣳहि सत्यो अद्भुतो दाता वाजस्य गोमतः। उक्षान्नाय वशान्नाय सोमपृष्ठाय वेधसे। स्तोमैर्विधेमाग्नये। वह्नाहि सूनो अस्यद्य सद्वा चक्रे अग्निर्जनुषा ज्मान्नम्। स त्वन्न ऊर्जसन ऊर्जं धा राजेवजे-रवृके क्षेष्यन्तः। अग्न आयूꣳषि (७) पवस आसुवोर्ज मिषं च नः। आरे बाधस्व दुच्छुनाम्। अग्ने पवस्व स्वपा अस्मे वर्चस्सुवीर्यम्। दधत् पोषꣳ रयिं मयि। अग्ने पावक रोचिषा मन्द्रया देवजिह्वया। आ देवान् वक्षि यक्षि च। स नः पावक दीदिवोऽग्ने देवाꣳ इहावह। उप यज्ञꣳ हविश्च नः। अग्निः शुचिव्रततमः शुचिर्विप्रः शुचिः कविः। शुचीरोचत आहुतः। उदग्ने शुचयस्तव शुक्रा भ्राजन्त ईरते। तव ज्योतीꣳ-ष्यर्चयः॥

त्वमग्ने रुद्रो असुरो महो दिवः। त्वꣳ शर्द्धो मारुतं पृक्ष ईशिषे। त्वं वातैररुणै-र्यासि शंगयः। त्वं पूषा विधतः पासि नुत्मना। देवा देवेषु श्रयद्ध्वम्। प्रथमा द्वितीयेषु

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रयद्ध्वम्। द्वितीयास्तृतीयेषु श्रयद्ध्वम्। तृतीयाश्चतुर्थेषु श्रयद्ध्वम्। चतुर्थाः पंचमेषु श्रयद्ध्वम्। पंचमाः षष्ठेषु श्रयद्ध्वम् (१) षष्ठाः सप्तमेषु श्रयद्ध्वम्। सप्तमा अष्टमेषु श्रयद्ध्वम्। अष्टमा नवमेषु श्रयद्ध्वम्। नवमा दशमेषु श्रयद्ध्वम्। दशमा एकादशेषु श्रयद्ध्वम्। एकादशा द्वादशेषु श्रयद्ध्वम्। द्वादशास्त्रयोदशेषु श्रयद्ध्वम्। त्रयोदशाश्चतुर्दशेषु श्रयद्ध्वम्। चतुर्दशाः पंचदशेषु श्रयद्ध्वम्। पंचदशाः षोडशेषु श्रयद्ध्वम् (२) षोडशाः सप्तदशेषु श्रयद्ध्वम्। सप्तदशा अष्टादशेषु श्रयद्ध्वम्। अष्टादशा एकान्नविंशेषु श्रयद्ध्वम्। एकान्नविंशा विंशेषु श्रयद्ध्वम्। विंशा एकविंशेषु श्रयद्ध्वम्। एकविंशा द्वाविंशेषु श्रयद्ध्वम्। द्वाविंशास्त्रयो विंशेषु श्रयद्ध्वम्। त्रयोविंशाश्चतुर्विंशेषु श्रयदध्वम्। चतुर्विंशाः पंचविंशेषु श्रयद्ध्वम्। पंचविंशाष्षड्विंशेषु श्रयद्ध्वम् (३) षडिवंशास्सप्त विंशेषु श्रयद्ध्वम्। सप्तविंशा अष्टाविंशेषु श्रयद्ध्वम्। अष्टाविंशा एकान्नत्रिंशेषु श्रयद्ध्वम्। एकान्नत्रिंशास्त्रिंशेषु श्रयद्ध्वम्। त्रिंशा एकत्रिंशेषु श्रयद्ध्वम्। एकत्रिंशा द्वा त्रिंशेषु श्रयद्ध्वम्। द्वात्रिंशास्त्रयस्त्रिंशेषु

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रयद्ध्वम्। देवा स्त्रिरेकाददशास्त्रिस्त्र-यस्त्रिꣳशाः। उत्तरे भवत। उत्तर वर्त्मान उत्तर सत्त्वानः। यत्काम इदं जुहोमि। तन्मे समृद्ध्यतां। वयꣳस्याम पतयो रयीणाम्। भूर्भुवस्वस्स्वाहा॥

अस्त्राय फट्।

सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः। भवे भवे नातिभवे भवस्व माम्। भवोद्भवाय नमः।

वामदेवाय नमो ज्येष्ठाय नम-श्श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नम स्सर्वभूतदमनाय नमो मनोन्मनाय नमः॥ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः। सर्वेभ्य-स्सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः॥ तत्पुरुषाय विद्महे महादेवाय धीमही। तन्नो रुद्रः प्रचोदयात।

ईशान-स्सर्वविद्याना मीश्वर-स्सर्वभूतानां ब्रह्माऽधिपतिर्ब्रह्मणोऽधिपति-र्ब्रह्मा शिवो मे अस्तु सदाशिवोम्॥

(उरसा शिरसा दृष्ट्या मनसा वचसा तथा। पद्भ्यां कराभ्यां कर्णाभ्यां प्रणामोऽष्टांग उच्यते॥)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हिरण्यगर्भस्समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्। स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥ उरसा उमामहेश्वराभ्यां नमः॥

यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव। य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम॥ शिरसा उमामहेश्वराभ्यां नमः॥

ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतस्सुरुचो वेन आवः। सबुध्निया उपमा अस्य विष्ठास्सतश्च योनिमसतश्च विवः॥ दृष्ट्याउमामहेश्वराभ्यां नमः॥

मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम्। पिपृतान्नो भरीमभिः॥ मनसा उमामहेश्वराभ्यां नमः॥

उपश्वासय पृथिवीमुत द्यां पुरुत्रा ते मनुतां विष्ठितं जगत्। स दुन्दुभे सजूरिन्द्रेण देवैर्दूराद्दवीयो अपसेध शत्रून्॥ वचसा उमामहेश्वराभ्यां नमः॥

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान्। युयोध्यस्मज्जुहुराणमेनो भूयिष्ठान्ते नमउक्तिं विधेम॥ पद्मयाँ उमामहेश्वराभ्यां नमः॥

CC-0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

या ते अग्ने रुद्रिया तनूस्तया नः पाहि तस्यास्ते स्वाहा। कराभ्याँ उमामहेश्वराभ्यां नमः॥

इमं यम प्रस्तरमाहि सीदांगिरोभिः पितृभिस्संविदानः। आ त्वा मन्त्राः कविशस्ता वहन्त्वेना राजन् हविषा मादयस्व॥ कर्णाभ्याँ उमामहेश्वराभ्यां नमः॥

(अथात्मानं शिवात्मानं श्रीरुद्ररूपं ध्यायेत्)

शुद्धस्फटिक-संकाशं त्रिनेत्रं पंचवक्त्रकम्।
गंगाधरं दशभुजं सर्वाभरण-भूषितम्॥
नीलग्रीवं शशांकांकं नाग-यज्ञोपवीतिनम्।
व्याघ्रचर्मोत्तरीयं च वरेण्य-मभयप्रदम्॥

कमण्डल्वक्षसूत्राणां धारिणं शूलपाणिनम्।
ज्वलन्तं पिंगलजटं-शिखामध्योद-धारिणम्॥
वृषस्कन्धसमारूढं उमादेहार्ध-धारिणम्।
अमृतेनाप्लुतं शान्तं दिव्य-भोग-समन्वितम्॥
दिग्देवता-समायुक्तं सुरासुर-नमस्कृतम्।
नित्यं च शाश्वतं शुद्धं ध्रुवमक्षर-मव्ययम्॥

सर्व व्यापिन-मीशानं रुद्रं वै विश्वरूपिणम्।
एवं ध्यात्वा द्विजस्सम्यक् ततो यजन-मारभेत्॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रजनने ब्रह्मा तिष्ठतु। पादयो-र्विष्णुस्तिष्ठतु। हस्त-यो-र्हरस्तिष्ठतु। बाह्वो-रिन्द्रस्तिष्ठतु। जठरेऽग्निस्तिष्ठतु। हृदये शिवस्तिष्ठतु। कण्ठे वसवस्तिष्ठन्तु। वक्त्रे सरस्वती तिष्ठतु। नासिकयो-र्वायुस्तिष्ठतु। नयनयो-श्चन्द्रादित्यौ तिष्ठेताम्। कर्णयोरश्विनौ तिष्ठेताम्। ललाटे रुद्रास्तिष्ठन्तु। मूर्ध्न्यादित्या-स्तिष्ठन्तु। शिरसि महादेवस्तिष्ठतु। शिखायां वामदेवस्तिष्ठतु। पृष्ठे पिनाकी तिष्ठतु। पुरतः शूली तिष्ठतु। पार्श्वयोः शिवाशंकरौ तिष्ठेताम्। सर्वतो वायुस्तिष्ठतु। ततो बहिः सर्व-तोऽग्निर्ज्वालामाला-परिवृतस्तिष्ठतु। सर्वेष्वंगेषु सर्वा देवता यथास्थानं तिष्ठन्तु। मां रक्षन्तु। सर्वान् महाजनान् रक्षन्तु॥

अग्निर्मे वाचि श्रितः। वाग्घृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि॥ वायुर्मे प्राणे श्रितः। प्राणो हृदये।

हृदयं मयि। अहममृते। अमृतं ब्रह्मणि॥ सूर्यो मे चक्षुषि श्रितः। चक्षुर्हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि॥ चन्द्रमा मे मनसि श्रितः। मनो हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि॥ दिशो मे श्रोत्रे श्रिताः। श्रोत्रꣳहृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि॥ आपो मे। रेतसि श्रिताः। रेतो हृदये। हृदयं मयि। अहममृते। अमृतं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ब्रह्मणि॥ पृथिवी मे शरीरे श्रिता। शरीरꣳहृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि॥ ओषधिवनस्पतयो मे लोमसु श्रिताः। लोमानि हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि॥ इन्द्रो मे बले श्रितः। बलꣳहृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि॥ पर्जन्यो मे मूर्ध्नि श्रितः। मूर्धा हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि॥ ईशानो मे मन्यौ श्रितः। मन्युर्हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि॥ आत्मा म आत्मनि श्रितः। आत्मा हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि॥

पुनर्म आत्मा पुनरायुरागात्। पुनः प्राणः पुनराकूतमागात्। वैश्वानरो रश्मिभिर्वा वृधानः। अन्तस्तिष्ठत्वमृतस्य गोपाः॥ आराधिनो मनुष्यैस्त्वं सिद्धै देवा सुरादिभिः आराधयामि भक्त्या त्वा मां गृहण महेश्वर॥

॥ कलशेषु ध्यानम्॥

ध्यायेन्निरामयं वस्तु सर्गस्थिति-लयादिकम्।
निर्गुणं निष्कलं नित्यं मनोवाचामगोचरम्॥
गंगाधरं शशिधरं जटामकुटशोभितम्।
श्वेतभूति-त्रिपुण्ड्रेण विराजित-ललाटकम्॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लोचनत्रय-संपन्नं स्वर्णकुण्डल-शोभितम्।
स्मेराननं चतुर्बाहु मुक्ताहारोपशोभितम्॥
अक्षमालां सुधाकुंभं चिन्मयीं मुद्रिकामपि।
पुस्तकं च भुजै-र्दिव्यै-र्दधानं पार्वतीपतिम्॥
श्वेमाम्बरधरं श्वेतं रत्नसिंहासने-स्थितम्।
सर्वाभीष्ट-प्रदातारं वटमूल-निवासिनम्॥
जपाकुसुम-साहस्त्र-समान-श्रिय-मीश्वरीम्।
सुवर्ण-रत्नखचित-मकुटेन विराजिताम्॥
ललाटपट्टसंराजत्-संलग्न-तिलकांचिताम्।
राजीवायत-नेत्रान्तां नीलोत्पलदलेक्षणाम्॥
सन्तप्त-हेमखचित-ताटंकाभरणान्विताम्।
ताम्बूल-चर्वण-रत-रक्तजिह्वा-विराजिताम्॥
पताकाभरणोपेतां मुक्ताहारोपशोभिताम्।
स्वर्णकंकण-संयुक्तै-श्चतुर्भि-र्बाहुभि-र्युताम्॥
सुवर्णरत्नखचित-कांचीदाम-विराजिताम्।
कदलीललितस्तम्भ-सन्निभोरु-युगान्विताम्॥
श्रिया विराजितपदां भक्तत्राणपरायणाम्।
अन्योन्याश्लिष्टहृद्बाहु-गौरीशंकर-संज्ञकम्॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सनातनं परं ब्रह्म परमात्मान-मव्ययम्।

आवाहयामि जगता-मीश्वरं परमेश्वरम्॥

आवाहनम्॥

आ त्वा वहन्तु हरयस्सचेतसः श्वेतैरश्वैस्सह केतुमद्भिः। वाताजितै-र्बलवद्भि-र्मनोजवै-रायाहि शीघ्रं मम हव्याय शर्वोम्॥ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्यो-र्मुक्षीय माऽमृतात्॥ गौरी मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी। अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन्॥

ओं नमस्ते रुद्रमन्यव उतो त इषवे नमः। नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः॥ ओं ह्रीं नमः शिवाय। सद्योजातं प्रपद्यामि। ओं भूर्भुवस्सुवरों। अस्मिन् कुम्भे (अस्यां प्रतिमायां) धी देवी समेत महादेवं ध्यायामि। आवाहयामि॥ वृत्ति देवी समेत शिवं ध्यायामि। आवाहयामि॥ उशना देवी समेत रुद्र ध्यायामि। आवाहयामि॥ उमा देवी शंकरं ध्यायामि। आवाहयामि॥ नियुद्देवी समेत नीललोहितं ध्यायामि। आवाहयामि॥ सर्पि देवी समेत ईशानं ध्यायामि। आवाहयामि॥ इळा देवी समेत विजयं ध्यायामि।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आवाहयामि॥ अंबिका देवी समेत भीमं ध्यायामि। आवाहयामि॥ इरावती देवी सेमत देवदेवं ध्यायामि। आवाहयामि॥ सुधा देवी समेत भवं ध्यायामि। आवाहयामि॥ दीक्षा देवी समेत उद्भवः ध्यायामि आवाहयामि॥ (इति तत्तत् कलशेषु आवाह्य)॥

प्राणप्रतिष्ठा॥

आदित्यात्मक-श्रीमहादेवादि प्राणप्रतिष्ठा-महामन्त्रस्य ब्रह्म-विष्णु-महेश्वरा ऋषयः। ऋग्यजुस्सामाथर्वाणि छन्दांसि। सकलजगत्सृष्टि-स्थिति-संहार कारिणी प्राणशक्तिः परादेवता। आं बीजम्। हीं शक्तिः। क्रों कीलकम्। आदित्यात्मक-महादेवादि प्राणप्रतिष्ठार्थे जपे विनियोगः॥

आं-अंगुष्ठाभ्यां नमः। ह्रीं तर्जनीभ्यां नमः। क्रों-मध्य-माभ्यां नमः। आं- अनामिकाभ्यां नमः। ह्रीं कनिष्ठि-काभ्यां नमः। क्रों-करतलकरपृष्ठाभ्यां नमः॥

आं-हृदयाय नमः। हीं-शिरसे स्वाहा। क्रों- शिखायै वषट्। आं-कवचाय हुं। हीं-नेत्रत्रयाय वौषट्। क्रों- अस्त्राय फट्। भूर्भुवस्सुवरोमिति दिग्बन्धः॥ ध्यानम्॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रक्ताम्भोधिस्थ-पोतोल्लस-दरुण-सरोजाधिरूढा-कराब्जैः पाशं कोदण्डमिक्षूद्भव मळिगुण-मप्यंकुशं पंचबाणान्।

बिभ्राणासृक्कपालं त्रिनयन लसिता पीनवक्षोरुहाढ्या देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः॥

लं-पृथिव्या-त्मिकायै गन्धं समर्पयामि। हं आकाशात्मि कायैपुष्पैः पूजयामि। यं वाय्वात्मिकायै धूपमाघ्रापयामि। रं-अग्न्यत्मिकायै दीपं दर्शयामि। वं-अमृतात्मिकायै अमृतं महानैवेद्यं निवेदयामि। सं-सर्वात्मिकायै सर्वोपचार पूजां समर्पयामि॥

आं-ह्रीं- क्रों, क्रों-ह्रीं-आं यरलवशषसहों। क्षं हंसः सोहं, सोहं हंसः। आदित्यात्मक-महादेवादि प्राणा इह प्राणाः॥

आं-ह्रीं-क्रों, क्रों-ह्रीं आं यरलवशषसहों। हंसः सोहं, सोहं हंसः। आदित्यात्मक महादेवादि जीव इह स्थितः॥

आं- ह्रीं-क्रों, क्रों-ह्रीं-आं यरलवशषसहों। हंस सोहं, सोहं हंसः। आदित्यात्मक-महादेवादि सर्वेन्द्रियाणि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वाङ्मनश्चक्षु-श्रोत्र-जिह्वा-घ्राण- प्राणापान-व्यानोदान-समाना इहैवागत्य इहैवास्मिन् कुम्भे सुखं चिरं तिष्ठन्तु स्वाहा॥

असुनीते पुनरस्मासु चक्षुः पुनः प्राणमिह नो धेहि भोगम्। ज्योक् पश्येम सूर्यमुच्चरन्त-मनुमते मृडयानस्स्वस्ति॥

आवाहितो भव। स्थापिता भव। सन्निहितो भव सन्निरुद्धो भव। अवकुण्ठितो भव। सुप्रीतो भव। सुप्रसन्नो भव। वरदो भव। प्रसीद प्रसीद॥ स्वामिन् सर्वजगन्नाथ यावत्पूजावसानकम्। तावत्त्वं प्रीतिभावेन कुम्भेऽस्मिन् सन्निधिं कुरु॥ आदित्यात्मक महादेवादि प्राणान् प्रतिष्ठापयामि॥ (पंचो-पचार पूजा॥ त्रिमधुरंनिवेदायामि॥)

या त इषुः शिवतमा शिवं बभूव ते धनुः। शिवा शरव्या या तव तया नो रुद्र मृडय॥ ओं ह्रीं नमः शिवाय। सद्योजाताय वै नमो नमः। रत्नसिंहासनं समर्पयामि॥

या ते रुद्र शिवा तनूरघोराऽपापकाशिनी। तया नस्तनुवा शन्तमया गिरिशन्ताभिचाकशीहि॥ ओं ह्रीं नमः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शिवाय। भवे भवे नातिभवे भवस्व माम्। पादयोः पाद्यं समर्पयामि॥

यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे। शिवां गिरित्र तां कुरु मा हिꣳसीः पुरुषं जगत्। ओं ह्रीं नमः शिवाय। भवोद्भवाय नमः। अर्घ्यं समर्पयामि॥

शिवेन वचसा त्वा गिरिशाच्छा वदामसि। यथा नः सर्वनिज्जगदयक्ष्मꣳ सुमना असत्। ओं ह्रीं नमः शिवाय। वामदेवाय नमः। आचमनीयं समर्पयामि॥

अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक्। अहीꣳश्च सर्वाञ्जंभयन्थ्सर्वाश्च यातुधान्यः। ओं ह्रीं नमः शिवाय। ज्येष्ठाय नमः। मधुपर्कं समर्पयामि॥

असौ यस्ताम्रो अरुण उत बभ्रुस्सुमंगलः। ये चेमाꣳरुद्रा अभितो दिक्षु श्रितास्सहस्रशोऽवैषाꣳ हेड ईमहे। ओं ह्रीं नमः शिवाय। श्रेष्ठाय नमः। स्नानं समर्पयामि। स्नानानन्तरं आचमनीयं समर्पयामि॥

असौ योऽवसर्पति नीलग्रीवो विलोहितः। उतैनं गोपा अदृशन्नदृशन्नुदहार्यः। उतैनं विश्वा भूतानि स दृष्टो मृडयाति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नः। ओं ह्रीं नमः शिवाय। रुद्राय नमः। वस्त्रोत्तरीयं समर्पयामि॥

नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे। अथो ये अस्य सत्वानोऽहं तेभ्योऽकरन्नमः। ओं ह्रीं नमः शिवाय। कालाय नमः। यज्ञोपवीताभरणानि समर्पयामि॥

प्रमुंच धन्वनस्त्व- मुभयोरार्त्नियोर्ज्याम्। याश्च ते हस्त इषवः परा ता भगवो वप। ओं ह्रीं नमः शिवाय। कल-विकरणाय नमः। गन्धान् धारयामि। गन्धस्योपरि अक्षतान् समर्पयामि॥

अवतत्य धनुस्त्वꣳ सहस्राक्ष शतेषुधे। निशीर्य शल्यानां मुखा शिवो नः सुमना भव। ओं ह्रीं नमः शिवाय। बलविकरणाय नमः। पुष्पैः पूजयामि।

ओं भवाय देवाय नमः। ओं शर्वाय देवाय नमः। ईशानाय देवाय नमः। पशुपतये देवाय नमः। रुद्राय देवाय नमः। अग्राय देवाय नमः। भीमाय देवाय नमः। महते देवाय नमः॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ओं भवस्य देवस्य पत्नयै नमः। शर्वस्य पत्नयै नमः। इशानस्य पत्नयै नमः। पशुपतेः पत्नयै नमः। रुद्रस्य पत्नयै नमः। उग्रस्य पत्नयै नमः। भीमस्य पत्नयै नमः। महतो पत्नयै नमः॥

निधनपतये नमः। निधनपतान्तिकाय नमः। ऊर्ध्वाय नमः। ऊर्ध्वलिंगाय नमः। हिरण्याय नमः। हिरण्यलिंगाय नमः। सुवर्णाय नमः। सुवर्णलिंगाय नमः। दिव्याय नमः। दिव्यलिंगाय नमः। भवाय नमः। भवलिंगाय नमः। शर्वाय नमः। शर्वलिंगाय नमः। शिवाथ नमः। शिवलिंगाय नमः। ज्वलाय नमः। ज्वललिंगाय नमः। आत्माय नमः। आत्मलिंगाय नमः। परमाय नमः। परमलिंगाय नमः। एतत्सोमस्य सूर्यस्य सर्वलिंगꣳस्थापयति पाणिमन्त्रं पवित्रम्॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ शिवाष्टोत्तरशत-नामावळिः ॥

ॐ शिवाय नमः
ॐ महेश्वराय नमः
ॐ शंभवे नमः
ॐ पिताकिने शशिरोखराय नमः
ॐ वामदेवाय नमः
ॐ विरूपाक्षाय नमः
ॐ कपर्दिने नमः
ॐ नीललोहिताय नमः
ॐ शंकराय नमः (१०)
ॐ शूलपाणये नमः
ॐ खट्वांगिने नमः
ॐ विष्णुवल्लभाय नमः
ॐ शिपिविष्टाय नमः
ॐ अंविकानाथाय नमः
ॐ श्रीकण्ठाय नमः
ॐ भक्तवत्सलाय नमः
ॐ शर्वाय नमः
ॐ त्रिलोकेशाय नमः (२०)
ॐ शितिकण्ठाय नमः
ॐ शिवाप्रियाय नमः
ॐ उग्राय नमः
ॐ कपालिने नमः
ॐ कामारय नमः
ॐ अन्धकासुर सूदनाय नमः
ॐ गङ्गाधराय नमः
ॐ ललाटाक्षाय नमः
ॐ कालकालाय नमः
ॐ कृपानिधये नमः (३०)
ॐ भीमाय नमः
ॐ परशुहस्ताय नमः
ॐ मृगपाणये नमः
ॐ जटाधराय नमः
ॐ कैलासवासिने नमः
ॐ कवचिने नमः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ कठोराय नमः

ॐ त्रिपुरान्तकाय नमः

ॐ वृषांकाय नमः

ॐ वृषभारूढाय नमः (४०)

ॐ भस्मोद्धूलित विग्रहाय नमः

ॐ सामप्रियाय नमः

ॐ स्वरमयाय नमः

ॐ त्रयीमूर्तये नमः

ॐ अनीश्वराय नमः

ॐ सर्वज्ञाय नमः

ॐ परमात्मने नमः

ॐ सोमसूर्याग्निलोचनाय नमः

ॐ हविषे नमः

ॐ यज्ञमयाय नमः (५०)

ॐ सोमायपंचवक्त्राय नमः

ॐ सदाशिवाय नमः

ॐ वीश्वेश्वराय नमः

ॐ वीरभद्राय नमः

ॐ गणनाथाय नमः

ॐ प्रजापतये नमः

ॐ हिरण्यरेतसे नमः

ॐ दुर्धर्षाय नमः

ॐ गिरीशाय नमः (६०)

ॐ गिरिशाय नमः

ॐ अनघाय नमः

ॐ भुजङ्गभूषणाय नमः

ॐ भर्गाय नमः

ॐ गिरिधन्वने नमः

ॐ गिरिप्रियाय नमः

ॐ कृत्तिवाससे नमः

ॐ पुरारातये नमः

ॐ भगवते नमः

ॐ प्रमथाधिपाय नमः (७०)

ॐ मृत्युंजयाय नमः

ॐ सूक्ष्मतनवे जगद्व्यापिने नमः

ॐ जगद्गुरवे नमः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ व्योमकेशाय नमः
ॐ महोसेनजनकाय नमः
ॐ चारुविक्रमाय नमः
ॐ रुद्राय नमः
ॐ भूतपतये नमः
ॐ स्थाणवे नमः (८०)
ॐ अहये बुध्न्याय नमः
ॐ दिगंबराय नमः
ॐ अष्टमूर्तये नमः
ॐ अनेकात्मने नमः
ॐ सात्विकाय शुद्धविग्रहाय नमः
ॐ शाश्वताय नमः
ॐ खण्डपरशव नमः
ॐ अजाय नमः
ॐ पाशविमोचकाय नमः (९०)
ॐ मृडाय नमः
ॐ पशुपतये नमः
ॐ देवाय नमः
ॐ महादेवाय नमः
ॐ अव्ययाय नमः
ॐ हरये नमः
ॐ भगनेत्रभिदे नमः
ॐ अव्यक्ताय नमः
ॐ दक्षाध्वरहराय नमः
ॐ हराय नमः (१००)
ॐ पूषदन्तभिदे नमः
ॐ अव्यक्ताय नमः
ॐ सहस्त्राक्षाय नमः
ॐ सहस्त्रपदे नमः
ॐ अपवर्गप्रदाय नमः
ॐ अनन्ताय नमः
ॐ तारकाय नमः
ॐ परमेश्वराय नमः (१०८)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्री गणेश अष्टोत्तरशतनामावळि

ॐ गजाननाय नमः

ॐ गणाध्यक्षाय नमः

ॐ विघ्नराजाय नमः

ॐ विनायकाय नमः

ॐ द्वैमातुराय नमः

ॐ सुमुखाय नमः

ॐ प्रमुखाय नमः

ॐ सन्मुखाय नमः

ॐ कृत्तिने नमः

ॐ ज्ञानदीपाय नमः (१०)

ॐ सुखनिधये नमः

ॐ सुराध्यक्षाय नमः

ॐ सुरारिभिदे नमः

ॐ महागणपतये नमः

ॐ मान्याय नमः

ॐ महन्मायाय नमः

ॐ मृडात्मजाय नमः

ॐ पुराणाय नमः

ॐ पुरुषाय नमः

ॐ पूष्णे नमः(२०)

ॐ पुष्करिणे नमः

ॐ पुण्यकृते नमः

ॐ अग्रगण्याय नमः

ॐ अग्रपूज्याय नमः

ॐ अग्रगामिने नमः

ॐ मन्त्रकृते नमः

ॐ चामीकरप्रभाय नमः

ॐ सर्वस्मै नमः

ॐ सर्पोपास्याय नमः

ॐ सर्वकर्त्रे नमः(३०)

CC-0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ सर्वनेत्रे नमः
ॐ सर्व सिद्धिप्रदाय नमः
ॐ सर्व सिद्धाय नमः
ॐ सर्ववन्द्याय नमः
ॐ महाकाळाय नमः
ॐ महाबलाय नमः
ॐ हेरम्बाय नमः
ॐ लम्बजठराय नमः
ॐ हस्वग्रीवाय नमः
ॐ महोदराय नमः(४०)
ॐ मदोत्कटाय नमः
ॐ महावीराय नमः
ॐ मन्त्रिणे नमः
ॐ मंगळदाय नमः
ॐ प्रमदार्च्याय नमः
ॐ प्राज्ञाय नमः
ॐ प्रमोदाय नमः
ॐ मोदक प्रियाय नमः
ॐ धृतिमते नमः
ॐ मतिमते नमः(५०)

ॐ कामिने नमः
ॐ कपित्थप्रियाय नमः
ॐ ब्रह्मचारिणे नमः
ॐ ब्रह्मरूपिणे नमः
ॐ ब्रह्मविदे नमः
ॐ ब्रह्मवन्दिताय नमः
ॐ जिष्णवे नमः
ॐ विष्णुप्रियाय नमः
ॐ भक्तजीविताय नमः
ॐ जितमन्मथाय नमः(६०)
ॐ ऐश्वर्यदाय नमः
ॐ गुहज्यायसे नमः
ॐ सिद्धसेविताय नमः
ॐ विघ्नहर्त्रे नमः
ॐ विघ्नकर्त्रे नमः
ॐ विश्वनेत्रे नमः
ॐ विराजे नमः
ॐ स्वराजे नमः
ॐ श्रीपतये नमः
ॐ वाक्पतये नमः(७०)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ श्रीमते नमः
ॐ श्रृंगारिणे नमः
ॐ श्रितवत्सलाय नमः
ॐ शिवप्रियाय नमः
ॐ शीघ्रकारिणे नमः
ॐ शाश्वताय नमः
ॐ शिवनन्दनाय नमः
ॐ बलोद्धताय नमः
ॐ भक्तनिधये नमः
ॐ भावगम्याय नमः(८०)
ॐ भवात्मजाय नमः
ॐ महते नमः
ॐ मंगळदायिने नमः
ॐ महेशाय नमः
ॐ महिताय नमः
ॐ सत्यधर्मिणे नमः
ॐ सदाधाराय नमः
ॐ सत्याय नमः
ॐ सत्यपराक्रमाय नमः
ॐ शुभांगाय नमः(९०)
ॐ शुभ्रदन्ताय नमः
ॐ शुभदाय नमः
ॐ शुभविग्रहाय नमः
ॐ पञ्चपातकनाशिने नमः
ॐ पार्वतीप्रियनन्दनाय नमः
ॐ विश्वेशाय नमः
ॐ विबुधाराध्यपदाय नमः
ॐ वीरवराग्रगाय नमः
ॐ कुमार गुरुवन्द्याय नमः
ॐ कुञ्जरासुरभञ्जनाय नमः(१००)
ॐ वल्लभावल्लभायं नमः
ॐ वरायकाम्बुजाय नमः
ॐ सुधा कलश हस्ताय नमः
ॐ सुधाकर कलाधराय नमः
ॐ पञ्चहस्ताय नमः
ॐ प्रधानेशाय नमः
ॐ पुरातनाय नमः
ॐ वरसिद्धिविनायकाय नमः(१०८)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्री आञ्जनेय अष्टोत्तरशतनामावळि

ॐ आञ्जनेयाय नमः

ॐ महावीराय नमः

ॐ हनुमते नमः

ॐ मारुतात्मजाय नमः

ॐ तत्वज्ञान प्रदाय नमः

ॐ सीतादेवी मुद्राप्रदायकाय नमः

ॐ अशोक वनिकाच्छेद्रे नमः

ॐ सर्वमाया विभञ्जनाय नमः

ॐ सर्वबन्ध विमोक्त्रे नमः

ॐ रक्षोविध्वंस कारकाय नमः(१०)

ॐ परविद्यापरीहाराय नमः

ॐ परशौर्य विनाशनाय नमः

ॐ परमन्त्र निराकत्रे नमः

ॐ परयन्त्र प्रभेदकाय नमः

ॐ सर्वग्रह विनाशिने नमः

ॐ भीमसेन सहायकृते नमः

ॐ सर्व दुःख हराय नमः

ॐ सर्व लोकसंचारिणे नमः

ॐ मनोजवाय नमः

ॐ पारिजात द्रुमूलस्थाय नमः(२०)

ॐ सर्वमन्त्र स्वरूपवते नमः

ॐ सर्वयन्त्र स्वरूपिणे नमः

ॐ सर्वतन्त्रात्मकाय नमः

ॐ कपीश्वराय नमः

ॐ महाकायाय नमः

ॐ सर्वरोग हराय नमः

ॐ प्रभवे नमः

ॐ फलसिद्धिकराय नमः

ॐ सर्वविद्यासम्पत्प्रदायकाय नमः

ॐ कपिसेना नायकाय नमः(३०)

ॐ भविष्यत् चतुराननाय नमः

ॐ कुमार ब्रह्मचारिणे नमः

ॐ रत्नकुण्डल दीप्तिमते नमः

ॐ सञ्चलध्वान्त सन्नद्ध लंबमान शिखोज्वलाय नमः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ गन्धर्व विद्यातत्वज्ञाय नमः
ॐ महाबल पराक्रमाय नमः
ॐ कारागृह विमोक्त्रे नमः
ॐ श्रृंखला बन्धमोचकाय नमः
ॐ सागरोत्तारकाय नमः
ॐ प्राज्ञाय नमः (४०)
ॐ रामदूताय नमः
ॐ प्रतापवते नमः
ॐ वानराय नमः
ॐ केसरी सुताय नमः
ॐ सीताशोक निवारणय नमः
ॐ अञ्जनागर्भ संभूताय नमः
ॐ बालार्क सदृशाननाय नमः
ॐ विभीषण प्रियकराय नमः
ॐ दशग्रीव कुलान्तकाय नमः
ॐ लक्ष्मण प्राणदात्रे नमः (५०)
ॐ वज्रकायाय नमः
ॐ महाद्युतये नमः
ॐ चिरंजीविने नमः
ॐ रामभक्ताय नमः
ॐ दैत्यकार्य विघातकाय नमः
ॐ अक्षहन्त्रे नमः
ॐ काञ्चनाभाय नमः
ॐ पञ्चवक्त्राय नमः
ॐ महातपसे नमः
ॐ लंगिणी भञ्जनाय नमः (६०)
ॐ श्रीमते नमः
ॐ सिंहिका प्राणा भञ्जनाय नमः
ॐ गन्धमादन शैलस्थाय नमः
ॐ लंकापुर विदाहकाय नमः
ॐ सुग्रीव सचिवाय नमः
ॐ धीराय नमः
ॐ शूराय नमः
ॐ दैत्यकुलान्तकाय नमः
ॐ सुरार्चिताय नमः
ॐ महातेजसे नमः (७०)
ॐ रामचूड़ामणि प्रदाय नमः
ॐ कामरूपिणे नमः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ पिंगलाक्षाय नमः

ॐ वार्द्धिमैनाक पूजिताय नमः

ॐ कबळीकृत मार्ताण्ड मण्डलाय नमः

ॐ विजितेन्द्रियाय नमः

ॐ राम सुग्रीव सन्धात्रे नमः

ॐ महारावण मर्दनाय नमः

ॐ स्फटिकाभाय नमः

ॐ वागधीशाय नमः (८०)

ॐ नवव्याकृति पण्डिताय नमः

ॐ चतुर्बाहवे नमः

ॐ दीनबंन्धवे नमः

ॐ महात्मने नमः

ॐ भक्तवत्सलाय नमः

ॐ संजीवन नगाहर्त्रे नमः

ॐ शुचये नमः

ॐ वाग्मिने नमः

ॐ द्रढवताय नमः

ॐ कालनेमि प्रमथनाय नमः (९०)

ॐ हरि मर्कट मर्कटाय नमः

ॐ दान्ताय नमः

ॐ शान्ताय नमः

ॐ प्रसन्नात्मने नमः

ॐ शतकण्ठमदापहृते नमः

ॐ योगिने नमः

ॐ रामकथा लोलाय नमः

ॐ सीतान्वेषण पण्डिताय नमः

ॐ वज्रद्रंष्ट्राय नमः

ॐ वज्रनखाय नमः (१००)

ॐ रुद्रवीर्य समुद्भवाय नमः

ॐ इन्द्रजित् प्रहितामोघ ब्रह्मास्त्र विनिवारकाय नमः

ॐ पार्थध्वाजाग्र संवासिने नमः

ॐ शरपञ्जर भेदकाय नमः

ॐ दशबाहवे नमः

ॐ लोकपूज्याय नमः

ॐ जाम्बवत्प्रीतिवर्धनाय नमः

ॐ सीतासमेत श्रीराम पाद सेवा धुरन्धराय नमः (१०८)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्री नवग्रह अष्टोत्तरशतनामावळि

ॐ भानवे नमः

ॐ हंसाय नमः

ॐ भास्कराय नमः

ॐ सूर्याय नमः

ॐ शूराय नमः

ॐ तमोहराय नमः

ॐ रथिने नमः

ॐ विश्वधृते नमः

ॐ अव्याप्त्रे नमः

ॐ हरये नमः

ॐ वेदमयाय नमः

ॐ विभवे नमः

❄ 🗁 ❄

ॐ शुद्धांशवे नमः

ॐ शुभ्रांशवे नमः

ॐ चन्द्राय नमः

ॐ अब्जनेत्र समुद्भवाय नमः

ॐ ताराधिपाय नमः

ॐ रोहिणीशाय नमः

ॐ शम्भुमूर्ति कृतालयाय नमः

ॐ औषधीड्याय नमः

ॐ ओषधिपतये नमः

ॐ ईश्वरधराय नमः

ॐ सुधानिधये नमः

ॐ सकलाह्लादनकराय नमः

❄ 🗁 ❄

ॐ भौमाय नमः

ॐ भूमिसुताय नमः

ॐ समुमान्याय नमः

ॐ समुद्भवाय नमः

ॐ आर्याय नमः

ॐ अग्निकृते नमः

ॐ रोहितांगाय नमः

ॐ रक्तवस्त्र धराय नमः

ॐ शुचये नमः

ॐ मंगळाय नमः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ अंगारकाय नमः

ॐ रक्तमालिने नमः

❄ 🗁 ❄

ॐ मायांविशारदाय नमः

ॐ बुधाय नमः

ॐ तारासुताय नमः

ॐ सौम्याय नमः

ॐ रोहिणी गर्भ संभूताय नमः

ॐ चन्द्रात्मजाय नमः

ॐ सोमवंशकराय नमः

ॐ श्रुति विशारदाय नमः

ॐ सत्यसन्धाय नमः

ॐ सत्य संकल्पाय नमः

ॐ विधुसुताय नमः

ॐ विबुधाय नमः

❄ 🗁 ❄

ॐ विभवे नमः

ॐ वाक्कृते नमः

ॐ ब्राह्मणाय नमः

ॐ ब्रह्मणे नमः

ॐ धिषणाय नमः

ॐ शुभवेषधराय नमः

ॐ गीःपतये नमः

ॐ गुरवे नमः

ॐ इन्द्रप्रोहिताय नमः

ॐ जीवाय नमः

ॐ निर्ज्जर पूजिताय नमः

ॐ पीताम्बरालंकृताय नमः

❄ 🗁 ❄

ॐ भृगवे नमः

ॐ भार्गव सम्भूताय नमः

ॐ निशाचर गुरवे नमः

ॐ कवये नमः

ॐ भृत्यखेदहराय नमः

ॐ भृगुसुताय नमः

ॐ वर्षकृते नमः

ॐ दीन राज्यदाय नमः

ॐ शुक्राय नमः

ॐ शुक्रस्वरूपाय नमः

ॐ राज्यदाय नमः

CC-0. In Public Domain Kirtikant Sharma Navafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ लयकृताय नमः

❄ 🗁 ❄

ॐ कोणाय नमः

ॐ शनैश्चराय नमः

ॐ मन्दाय नमः

ॐ छायाहृदयनन्दनाय नमः

ॐ मार्त्तण्डजाय नमः

ॐ पंगवे नमः

ॐ भानुतनूभवाय नमः

ॐ यमानुजाय नमः

ॐ अतिभयकृते नमः

ॐ नीलाय नमः

ॐ सूर्यवंशजाय नमः

ॐ निर्मल देहाय नमः

❄ 🗁 ❄

ॐ राहवे नमः

ॐ स्वर्भानवे नमः

ॐ आदित्यचन्द्रद्वेषिणे नमः

ॐ भुजंगमाय नमः

ॐ सिंहिकेशाय नमः

ॐ गुणवते नमः

ॐ रात्रिपति पीडिताय नमः

ॐ अहिराजे नमः

ॐ शिरोहीनाय नमः

ॐ विषधराय नमः

ॐ महाकायाय नमः

ॐ महाभूताय नमः

❄ 🗁 ❄

ॐ ब्राह्मणाय नमः

ॐ ब्रह्मसंभूताय नमः

ॐ रविकृते नमः

ॐ राहूरूपधृते नमः

ॐ केतवे नमः

ॐ केतुस्वरूपाय नमः

ॐ खेचराय नमः

ॐ सुकृतालयाय नमः

ॐ ब्रह्मविदे नमः

ॐ ब्रह्मपुत्राय नमः

ॐ कुमारकाय नमः

ॐ ब्राह्मणप्रीताय नमः

CC-0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विज्यं धनुः कपर्दिनो विशल्यो बाणवाꣳउत। अनेशन्नस्येषव आभुरस्य निषंगथिः। ओं ह्रीं नमः शिवाय। बलाय नमः। धूममाघ्रापयामि॥

या ते हेति मींढुष्टम हस्ते बभूव ते धनुः। तयाऽस्मान् विश्वतस्त्व-मयक्ष्मया परिब्भुज। ओं ह्रीं नमः शिवाय। बलप्रमथनाय नमः। दीपं दर्शयामि॥ आचमनीयं समर्पयामि॥

ओं भूभुवस्सुव * ब्रह्मणे स्वाहा॥ नमस्ते अस्त्वायु-धायानाततताय धृष्णवे। उभाभ्या मुत ते नमो बाहुभ्यां तव धन्वने॥ ओं ह्रीं नमः शिवाय। सर्वभूतदमनाय नमः॥ महानैवेद्यं निवेदयामि॥ मध्ये मध्ये अमृतपानीयं समर्पयामि। अमृतापिधानमसि। हस्त प्रक्षालनं समर्पयामि। प्रादप्रक्षालनं समर्पयामि। आचमनीयं समर्पयामि॥

परि ते धन्वनो हेति-रस्मान् वृणक्तु विश्वतः। अथो य इषुधिस्तवारे अस्मन्निधेहि तम्। ओं ह्रीं नमः शिवाय। मनोन्मनाय नमः। कर्पूर तांबूलं समर्पयामि॥

नमस्ते अस्तु भगवन् विश्वेश्वराय महादेवाय त्र्यम्बकाय त्रिपुरान्तकाय त्रिकाग्निकालाय कालाग्निरुद्राय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नीलकण्ठाय मृत्युं जयाय सर्वेश्वराय सदाशिवाय श्रीमन्महादेवाय नमः॥ कर्पूरनीराजनदीपं दर्शयामि॥

बृहत्साम क्षत्रभृद् वृद्धवृष्णियं त्रिष्टुभौजश्शुभितमुग्रवीरम्। इन्द्रस्तोमेन पंचदशेन मध्यमिदं वातेन सगरेण रक्ष॥ रक्षां धारयामि॥

॥ श्रीरुद्रनाम त्रिशती॥

नमो हिरण्यबाहवे नमः। सेनान्ये नमः। दिशां च पतये नमः। नमो वृक्षेभ्यो नमः। हरिकेशेभ्यो नमः। पशूनां पतये नमः। नमस्सस्पिंजराय नमः। त्विषीमते नमः। पथीनां पतये नमः। नमो बभ्लुशाय नमः। विव्याधिने नमः। अन्नानां पतये नमः। नमो हरिकेशाय नमः। उपवीतिने नमः। पुष्टानां पतये नमः। नमो भवस्य हेत्यै नमः। जगतां पतये नमः। नमो रुद्राय नमः। आततविने नमः। क्षेत्राणां पतये नमः। नमस्सूताय नमः। अहन्त्याय नमः। वनानां पतये नमः। नमो रोहिताय नमः। स्थपतये नमः। वृक्षाणां पतये नमः। नमो मन्त्रिणे नमः। वाणिजाय नमः। कक्षाणां पतये नमः। नमो भुवन्तये नमः। वारिवस्कृताय नमः। ओषधीनां पतये नमः। नम उच्चैर्घोषाय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नमः। आक्रन्दयते नमः। पत्तीनां पतये नमः। नमः कृत्स्नवीताय नमः। धावते नमः। सत्वनां पतये नमः॥ ३८॥

नमः सहमानाय नमः। निव्याधिने नमः। आव्याधिनीनां पतये नमः। नमः ककुभाय नमः। निषंगिणे नमः। स्तेनानां पतये नमः। नमो निषंगिणे नमः। इषुधिमते नमः। तस्कराणां पतये नमः। नमो वंचते नमः। परिवंचते नमः। स्तायूनां पतये नमः। नमो निचेरवे नमः। परिचराय नमः। अरण्यानां पतये नमः। नमः सृकाविभ्यो नमः। जिघाꣳसद्भ्यो नमः। मुष्णतां पतये नमः। नमोऽसिमद्भ्यो नमः। नक्तं चरद्भ्यो नमः। प्रकृन्तानां पतये नमः। नमः उष्णीषिणे नमः। गिरिचराय नमः। कुलुंचानां पतये नमः। नम इषुमद्भ्यो नमः। धन्वाविभ्यश्च नमः। वो नमः। नम आतन्वानेभ्यो नमः। प्रतिदधानेभ्यश्च नमः। वो नमः। नम आयच्छद्भ्यो नमः। विसृजद्भ्यश्च नमः। वो नमः। नमोऽस्यद्भ्यो नमः। विध्यद्भ्यश्च नमः। वो नमः। नम आसीनेभ्यो नमः। शयानेभ्यश्च नमः। वो नमः। नमः स्वपद्भ्यो नमः। जाग्रद्भ्यश्च नमः। वो नमः। नमस्तिष्ठद्भ्यो नमः। धावद्भ्यश्च नमः। वो नमः। नमस्सभाभ्यो नमः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सभापतिभ्यश्च नमः। वो नमः। नमो अश्वेभ्यो नमः। अश्वपतिभ्यश्च नमः। वो नमः॥

नम आव्याधिनीभ्यो नमः। विविध्यन्तीभ्यश्च नमः। वो नमः। नम उगणाभ्यो नमः। तृंहतीभ्यश्च नमः। वो नमः। नमो गृत्सेभ्यो नमः। गृत्सपतिभ्यश्च नमः। वो नमः। नमो व्रातेभ्यो नमः। व्रातपतिभ्यश्च नमः॥३८॥

वो नमः। नमो गणेभ्यो नमः। गणपतिभ्यश्च नमः। वो नमः। नमो विरूपेभ्यो नमः। विश्वरूपेभ्यश्च नमः। वो नमः। नमो महद्भ्यो नमः। क्षुल्लकेभ्यश्च नमः। वो नमः। नमो रथिभ्यो नमः। अरथेभ्यश्च नमः। वो नमः। नमो रथेभ्यो नमः। रथपतिभ्यश्च नमः। वो नमः। नमस्सेनाभ्यो नमः। सेनानिभ्यश्च नमः। वो नमः। नमः क्षत्तृभ्यो नमः। संग्रहीतृभ्यश्च नमः। वो नमः। नमस्तक्षभ्यो नमः। रथकारेभ्यश्च नमः। वो नमः। नमः कुलालेभ्यो नमः। कर्मारेभ्यश्च नमः। वो नमः। नमः पुंजिष्टेभ्यो नमः। निषादेभ्यश्च नमः। वो नमः। नम इषुकृद्भ्यो नमः। धन्वकृद्भ्यश्च नमः। वो नमः। नमो मृगयुभ्यो नमः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्वनिभ्यश्च नमः। वो नमः। नमः श्वभ्यो नमः। श्वपतिभ्यश्च नमः। वो नमः॥ ८९॥

नमो भवाय च नमः। रुद्राय च नमः। नमश्शर्वाय च नमः। पशुपतये च नमः। नमो नीलग्रीवाय च नमः। शितिकण्ठाय च नमः। नमः कपर्दिने च नमः। व्युप्तकेशाय च नमः। नमस्सहस्राक्षाय च नमः। शतधन्वने च नमः। नमो गिरिशाय च नमः। शिपिविष्टाय च नमः। नमो मीढुष्टमाय च नमः। इषुमते च नमः। नमो ह्रस्वाय च नमः। वामनाय च नमः। नमो बृहते च नमः। वर्षीयसे च नमः। नमो वृद्धाय च नमः। संवृध्वने च नमः। नमो अग्रियाय च नमः। प्रथमाय च नमः। नम आशवे च नमः। अजिराय च नमः। नमः शीघ्रियाय च नमः। शीभ्याय च नमः। नम ऊर्म्याय च नमः। अवस्वन्याय च नमः। नमः स्रोतस्याय च नमः। द्वीप्याय च नमः॥ १७०॥

नमो ज्येष्ठाय च नमः। कनिष्ठाय च नमः। नमः पूर्वजाय च नमः। अपरजाय च नमः। नमो मध्यमाय च नमः। अपगल्भाय च नमः। नमो जघन्याय च नमः। बुध्नियाय च नमः। नमः सोभ्याय च नमः। प्रतिसर्याय च नमः। नमो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

याम्याय च नमः। क्षेम्याय च नमः। नम उर्वर्याय च नमः। खल्याय च नमः। नमः श्लोक्याय च नमः। अवसान्याय च नमः। नमो वन्याय च नमः। कक्ष्याय च नमः। नम श्रवाय च नमः। प्रतिश्रवाय च नमः। नम आशुषेणाय च नमः। आशुरथाय च नमः। नमः शूराय च नमः। अवभिन्दते च नमः। नमो वर्मिणे च नमः। वरूथिने च नमः। नमो बिल्मिने च नमः। कवचिने च नमः। नमश्श्रुताय च नमः। श्रुतसेनाय च नमः॥ २००॥

नमो दुन्दुभ्याय च नमः। आहनन्याय च नमः। नमो धृष्णवे च नमः। प्रमृशाय च नमः। नमो दूताय च नमः। प्रहिताय च नमः। नमो निषंगिणे च नमः। इषुधिमते च नमः। नमस्तीक्ष्णेषवे च नमः। आयुधिने च नमः। नमः स्वायुधाय च नमः। सुधन्वने च नमः। नमः स्त्रुत्याय च नमः। पथ्याय च नमः। नमः काट्याय च नमः। नीप्याय च नमः। नमस्सूद्याय च नमः। सरस्याय च नमः। नमो नाद्याय च नमः। वैशन्ताय च नमः। नमः कूप्याय च नमः। अवट्याय च नमः। नमो वर्ष्याय च नमः। अवर्ष्याय च नमः। नमो मेध्याय च नमः। विद्युत्याय च नमः। नम ईध्रियाय च नमः। आतप्याय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

च नमः। नमो वात्याय च नमः। रेष्मियाय च नमः। नमो वास्तव्याय च नमः। वास्तु पाय च नमः॥ २३२॥

नमस्सोमाय च नमः। रुद्राय च नमः। नमस्ताम्राय च नमः। अरुणाय च नमः। नमः शंगाय च नमः। पशुपतये च नमः। नम उग्राय च नमः। भीमाय च नमः। नमो अग्रेवधाय च नमः। दूरेवधाय च नमः। नमो हन्त्रे च नमः। हनीयसे च नमः। नमो वृक्षेभ्यो नमः। हरिकेशेभ्यो नमः। नमस्ताराय नमः। नमश्शंभवे च नमः। मयोभवे च नमः। नमश्शंकराय च नमः। मयस्कराय च नमः। नमः शिवाय च नमः। शिवतराय च नमः। नमस्तीर्थ्याय च नमः। कूल्याय च नमः। नमः पार्याय च नमः। अवार्याय च नमः। नमः प्रतरणाय च नमः। उत्तरणाय च नमः। नम आतार्याय च नमः। आलाद्याय च नमः। नमः शष्प्याय च नमः। फेन्याय च नमः। नमस्सिकत्याय च नमः। प्रवाह्याय च नमः॥ २६५॥

नम इरिण्याय च नमः। प्रपथ्याय च नमः। नमः किंशिलाय च नमः। क्षयणाय च नमः। नमः कपर्दिने च नमः। पुलस्तये च नमः। नमो गोष्ठ्याय च नमः। गृह्याय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

च नमः। नमस्तल्प्याय च नमः। गेह्याय च नमः। नमः काट्याय च नमः। गह्वरेष्ठाय च नमः। नमो हृदय्याय च नमः। निवेष्प्याय च नमः। नमः पाꣳसव्याय च नमः। रजस्याय च नमः। नमः शुष्क्याय च नमः। हरित्याय च नमः। नमो लोप्याय च नमः। उलप्याय च नमः। नम ऊर्व्याय च नमः। सूर्म्याय च नमः। नमः पर्ण्याय च नमः। पर्णशद्याय च नमः। नमोपगुरमाणाय च नमः। अभिघ्नते च नमः। नम आक्खिदते च नमः। प्रक्खिदते च नमः। नमो वो नमः। किरिकेभ्यो नमः। देवानाꣳहृदयेभ्यो नमः। नमो वीक्षीणकेभ्यो नमः। नमो विचिन्वत्केभ्यो नमः। नम आनिर्हतेभ्यो नमः। नम आमीवत्केभ्यो नमः॥ ३००॥

प्रदक्षिणं मंत्रः

द्रापे अन्धसस्पते दरिद्रन्नीललोहित। एषां पुरुषाणामेषां पशूनां मा भेर्मारो मो एषां किंचनाममत्॥

या ते रुद्र शिवा तनूः शिवा विश्वाहा भेषजी। शिवा रुद्रस्य भेषजी तया नो मृड जीवसे॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इमाꣳरुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतिम्। यथा नः शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम्॥

मृडा नो रुद्रोतनो मयस्कृधि क्षयद्विराय नमसा विधेम ते। यच्छं च योश्च मनुरायजे पिता तदश्याम तव रुद्र प्रणीतौ॥

मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्त-मुत मा न उक्षितम्। मा नो वधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः॥

मानस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः। वीरान्मा नो रुद्र भामितोऽवधी-र्हविष्मन्तो नमसा विधेम ते॥

आरात्ते गोघ्न उत पूरुषघ्ने क्षयद्वीराय सुम्नमस्मे ते अस्तु। रक्षा च नो अधि च देव ब्रूह्यथा च नः शर्म यच्छ द्विबर्हाः॥

स्तुहि श्रुतं गर्तसदं युवानं मृगन्न भीम-मुपहत्नुमुग्रम्। मृडा जरित्रे रुद्र स्तवानो अन्यन्ते अस्मन्निवपन्तु सेनाः॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

परिणो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः। अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृडय॥

मीढुष्टम शिवतम शिवो नः सुमना भव॥ परमे वृक्ष आयुधं निधाय कृत्तिं वसान आचर पिनाकं विभ्रदागहि॥

विकिरिद विलोहित नमस्ते अस्तु भगवः। यास्ते सहस्रꣳहेतयोऽन्यमस्मन्निवपन्तु ताः॥

सहस्राणि सहस्रधा बाहुवोस्तव हेतयः। तासामीशानो भगवः पराचीना मुखा कृधि॥

नमस्कार मत्रः

सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम्। तेषाꣳसहस्रयोजनेऽवधन्वानि तन्मसि महा देवा दिभ्यो नमः॥

अस्मिन् महत्यर्णवेऽन्तरिक्षे भवा अधि। तेषाꣳसहस्रयोजनेऽवधन्वानि तन्मसि महा देवा दिभ्यो नमः॥

नीलग्रीवाः शितिकण्ठाः शर्वा अधः क्षमाचराः। तेषाꣳसहस्रयोजनेऽवधन्वानि तन्मसि महा देवा दिभ्यो नमः॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नीलग्रीवाः शितिकण्ठा दिवꣳरुद्रा उपश्रिताः।
तेषाꣳसहस्त्रयोजनेऽवधन्वानि तन्मसि महा देवा दिभ्यो नमः॥

ये वृक्षेषु सस्पिंजरा नीलग्रीवा विलोहिताः।
तेषाꣳसहस्त्रयोजनेऽवधन्वानि तन्मसि महा देवा दिभ्यो नमः॥

ये भूतानामधिपतयो विशिखासः कपर्दिनः।
तेषाꣳसहस्त्रयोजनेऽवधन्वानि तन्मसि महा देवा दिभ्यो नमः॥

ये अन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान्।
तेषाꣳसहस्त्रयोजनेऽवधन्वानि तन्मसि महा देवा दिभ्यो नमः॥

ये पथां पथिरक्षय ऐलबृदा यव्युधः।
तेषाꣳसहस्त्रयोजनेऽवधन्वानि तन्मसि महा देवा दिभ्यो नमः॥

ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः।
तेषाꣳसहस्त्रयोजनेऽवधन्वानि तन्मसि महा देवा दिभ्यो नमः॥

य एतावन्तश्च भूयाꣳसश्च दिशो रुद्रा वितस्थिरे।
तेषाꣳसहस्त्र-योजने ऽवधन्वानि तन्मसि महा देवा दिभ्यो नमः॥

नमो रुद्रेभ्यो ये पृथिव्यां येषामन्न मिषव-स्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशो-दीचीर्दशोर्ध्वास्तेभ्यो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि॥

नमो रुद्रेभ्यो ये ऽन्तरिक्षे वात इषव-स्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशो-दीचीर्दशोर्ध्वास्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि॥

नमो रुद्रेभ्यो ये दिवि येषा वर्षमिषव-स्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशो-दीचीर्दशोर्ध्वास्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि॥

प्रार्थना

॥ चमकप्रश्नः ॥

अग्नाविष्णू सजोषसेमा वर्धन्तु वां गिरः। द्युम्नैर्वाजेभिरागतम्। वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे श्रावश्च मे श्रुतिश्च मे ज्योतिश्च मे सुवश्च मे प्राणश्च मेऽपानश्च मे व्यानश्च मेऽसुश्च मे चित्तं च म आधीतं च मे वाक्च मे मनश्च मे चक्षुश्च मे श्रोत्रं च मे दक्षश्च मे बलं च म ओजश्च मे सहश्च

CC-0. In Public Domain. Kulkarni Sharma Nagarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

म आयुश्च मे जरा च म आत्मा च मे तनूश्च मे शर्म च मे वर्म च मे ऽङ्गानि च मेऽस्थानि च मे परूंषि च मे शरीराणि च मे॥ १॥

ज्यैष्ठ्यं च म आधिपत्यं च मे मन्युश्च मे भामश्च मेऽमश्च मेऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्ष्मा च मे द्राघुया च मे वृद्धं च मे वृद्धिश्च मे सत्यं च मे श्रद्धा च मे जगच्च मे धनं च मे वशश्च मे त्विषिश्च मे क्रीडा च मे मोदश्च मे जातं च मे जनिष्यमाणं च मे सूक्तं च मे सुकृतं च मे वित्तं च मे वेद्यं च मे भूतं च मे भविष्यच्च मे सुगं च मे सुपथं च म ऋद्धं च म ऋद्धिश्च मे क्लृप्तं च मे क्लृप्तिश्च मे मतिश्च मे सुमतिश्च मे॥ २॥

शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च च ऋतं च मे ऽमृतं च मे ऽयक्ष्मं च मे ऽनामयच्च मे जीवातश्च मे दीर्घायुत्वं च मे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ऽनमित्रं च मे ऽभयं च मे सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे॥ ३॥

ऊर्क्च मे सूनृता च मे पयश्च मे रसश्च मे घृतं च मे मधु च मे सग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रं च म औद्भिद्यं च मे रयिश्च मे रायश्च मे पुष्टं च मे पुष्टिश्च मे विभु च मे प्रभु च मे बहु च मे भूयश्च मे पूर्णं च मे पूर्णतरं च मेऽक्षितिश्च मे कूयवाश्च मे ऽन्नं च मे ऽक्षुच्च मे व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे गोधूमाश्च मे मसुराश्च मे प्रियंगवश्च मे ऽणवश्च मे श्यामाकाश्च मे नीवाराश्च मे॥ ४॥

अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यं च मे ऽयश्च मे सीसं च मे त्रपुश्च मे श्यामं च मे लोहं च मे ऽग्निश्च म आपश्च मे वीरुधश्च म ओषधयश्च मे कृष्टपच्यं च मे ऽकृष्टपच्यं च मे ग्राम्याश्च मे पशव आरण्याश्च यज्ञेन कल्पन्तां वित्तं च मे वित्तिश्च मे भूतं च मे भूतिश्च मे वसु च मे वसतिश्च मे कर्म च मे शक्तिश्च मे ऽर्थश्च म एमश्चम इतिश्च मे गतिश्च मे॥ ५॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अग्निश्च म इन्द्रश्च मे सोमश्च म इन्द्रश्च मे सविता च म इन्द्रश्च मे सरस्वती च म इन्द्रश्च मे पूषा च म इन्द्रश्च मे बृहस्पतिश्च म इन्द्रश्च मे मित्रश्च म इन्द्रश्च मे वरुणश्च म इन्द्रश्च मे त्वष्टा च म इन्द्रश्च मे धाता च म इन्द्रश्च मे विष्णुश्च म इन्द्रश्च मे ऽश्विनौ न म इन्द्रश्च मे मरुतश्च म इन्द्रश्च मे विश्वे च मे देवा इन्द्रश्च मे पृथिवी च म इन्द्रश्च मे ऽन्तरिक्षं च म इन्द्रश्च मे द्यौश्च म इन्द्रश्च मे दिशश्च म इन्द्रश्च मे मूर्धा च म इन्द्रश्च मे प्रजापतिश्च म इन्द्रश्च मे॥ ६॥

अंशुश्च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च म उपांशुश्च मेऽन्तर्यामश्च म ऐन्द्रवायवश्च मे मैत्रावरुणश्च म आश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे मन्थी च म आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च म ऋतुग्रहाश्च मे ऽतिग्राह्याश्च म ऐन्द्राग्रश्च मे वैश्वदेवश्च मे मरुत्वतीयाश्च मे माहेन्द्रश्च म आदित्यश्च मे सावित्रश्च मे सारस्वतश्च मे पौष्णश्च मे पात्नीवतश्च मे हारियोजनश्च मे॥ ७॥

इध्मश्च मे बर्हिश्च मे वेदिश्च मे धिष्णियाश्च मे स्रुचश्च मे चमसाश्च मे ग्रावाणश्च मे स्वरवश्च म उपरवाश्च मे

CC-0. In Public Domain. Kurukshetra University Collection.

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ऽधिषवणे च मे द्रोणकलशश्च मे वायव्यानि च मे पूतभृच्च म आधवनीयश्च म आग्नीध्रं च मे हविर्धानं च मे गृहाश्च मे सदश्च मे पुरोडाशाश्च मे पचताश्च मेऽवभृथश्च मे स्वगाकारश्च मे॥ ८॥

अग्निश्च मे घर्मश्च मे ऽर्कश्च मे सूर्यश्च मे प्राणश्च मे ऽश्वमेधश्च मे पृथिवी च मे ऽदितिश्च मे दितिश्च मे द्यौश्च मे शक्वरी-रङ्गुलयो दिशश्च मे यज्ञेन कल्पन्ता-मृक्च मे साम च मे स्तोमश्च मे यजुश्च मे दीक्षा च मे तपश्च म ऋतुश्च मे व्रतं च मे ऽहोरात्रयोर्वृष्ट्या बृहद्रथन्तरे च मे यज्ञेन कल्पेताम्॥ ९॥

गर्भाश्च मे वत्साश्च मे त्र्यविश्च मे त्र्यवी च मे दित्यवाट् च मे दित्यौही च मे पञ्चाविश्च मे पञ्चावी च मे त्रिवत्सश्च मे त्रिवत्सा च मे तुर्यवाट् च मे तुर्यौही च मे पष्ठवाट् च मे पष्ठौही च म उक्षा च मे वशा च म ऋषभश्च मे वेहच्चे मेऽनड्वाञ्च मे धेनुश्च म आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पता मपानो यज्ञेन कल्पतां व्यानो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पताꣳ श्रोत्रं यज्ञेन कल्पतां मनो यज्ञेन कल्पतां

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वाग्यज्ञेन कल्पता-मात्मा यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताम्॥ १०॥

एका च मे तिस्त्रश्च मे पञ्च च मे सप्त च मे नव च म एकादश च मे त्रयोदश च मे पंचदश च मे सप्तदश च मे नवदश च म एकविꣳशतिश्च मे त्रयोविꣳशतिश्च मे पंचविꣳशतिश्च मे सप्तविꣳशतिश्च मे नवविꣳशतिश्च म एकत्रिꣳशच्च मे त्रयस्त्रिꣳशच्च म चतस्त्रश्च मेऽष्टौ च मे द्वादश च मे षोडश च मे विꣳशतिश्च मे चतुर्विꣳशतिश्च मेऽष्टाविꣳशतिश्च मे द्वात्रिꣳशच्च मे षट्त्रिꣳश्च मे चत्वारिꣳशच्च मे चतुश्चत्वारिꣳशच्च मेऽष्टाचत्ववारिꣳशच्च मे वाजश्च प्रसवश्चापिजश्च क्रतुश्च सुवश्च मूर्धा च व्यश्नियश्चान्त्यायनश्चान्त्यश्च भौवनश्च भुवनश्चाधिपतिश्च॥ ११॥ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः। सर्वेभ्य-स्सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः॥ तत्पुरुषाय विद्महे महादेवाय धीमही। तन्नो रुद्रः प्रचोदयात।

ईशान-स्सर्वविद्याना मीश्वर-स्सर्वभूतानां ब्रह्माऽधिपतिर्ब्रह्मणोऽधिपति-र्ब्रह्मा शिवो मे अस्तु सदाशिवोम्॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(अथाशिषमाशास्ते)॥ आयुराशा"स्ते। सुप्रजास्त्वा-माशा"स्ते। सजातवनस्यामाशा"स्ते। उत्तरान् देव इज्यामाशा"स्ते। भूयो हविष्करण-माशा"स्ते। दिव्यं धामाशा"स्ते। विश्वं प्रियमाशा"स्ते। यदनेन हविषाऽऽशा"स्ते। तदश्यात्तदृद्ध्यान्। तदस्मै देवारासन्ताम्। तदग्निर्देवो देवेभ्यो वनते। वयमग्नेर्मानुषाः। इष्टं च वीतं च। उभे च नो द्यावापृथिवी अंहसस्पाताम्। इहगतिर्वामस्येदं च। नमो देवेभ्यः॥

॥ श्रीरुद्रप्रश्नः ॥

अस्य श्रीरुद्राध्याय-प्रश्न-महामन्त्रस्य, अघोर ऋषिः, अनुष्टुप छन्दः, सङ्कर्षणमूर्तिस्वरूपो योऽसावादित्यः परमपुरुषः स एष रुद्रो देवता॥

नमः शिवायेति बीजम्। शिवतरायेति शक्तिः। महादेवायेति कीलकम्। श्री-सांबसदाशिव-प्रसादसिद्ध्यर्थे जपे विनियोगः॥ १॥

ओं अग्निहोत्रात्मने अङ्गुष्ठाभ्यां नमः।

दर्शपूर्णमासात्मने तर्जनीभ्यां नमः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चातुर्मास्यात्मने मध्यमाभ्यां नमः।

निरूढपशुबन्धात्मने अनामिकाभ्यां नमः।

ज्योतिष्टोमात्मने कनिष्ठिकाभ्यां नमः।

सर्वक्रत्वात्मने करतलकरपृष्ठाभ्यां नमः॥ २॥

अग्निहोत्रात्मने हृदयाय नमः। दर्शपूर्णमासात्मने शिरसे स्वाह। चातुर्मास्यात्मने शिखायै वषट्। निरूढपशुबन्धात्मने कचचाय हुं। ज्योतिष्टोमात्मने नेत्रत्रयाय वौषट। सर्वक्रत्वात्मने अस्त्राय फट्। भूर्भुवस्वुवरोमिति दिग्बन्धः।

ध्यानम्—

आपाताल-नभः-स्थलान्त-भुवन-ब्रह्माण्ड-माविस्फुर-

ज्ज्योतिः-स्फाटिक-लिङ्गमौलि-विलसत् पूर्णेन्दुवान्तामृतैः।

अस्तोकाप्लुत मेक मीश-मनिशं रुद्रानुवाकाञ्जपन्

ध्यायेदीप्सित सिद्धयेऽद्रुवपदं विप्रोऽभिषिञ्चेच्छिवम्॥ ४॥

ब्रह्माण्ड-व्याप्तदेहा भसित-हिमरुचा भासमाना भुजङ्गैः

कण्ठे कालाः कपर्दाकलित-शशिकला-श्चण्डकोदण्डहस्ताः।

त्र्यक्षा रुद्राक्षमालाः प्रणत-भयहराः शांभवा मूर्ति-भेदाः

रुद्राः श्रीरुद्रसूक्त-प्रकटित-विभवा नः प्रयच्छन्तु सौख्यम्॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शं च मे मयश्च मे प्रियंच मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वंच मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च म ऋतं च मे ऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मे ऽनमित्रं च मेऽभयं च मे सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे॥

ओं शान्तिः शान्तिः शान्तिः॥

॥ श्रीरुद्रप्रश्नः ॥

(नमकम्)

ओं नमो भगवते रुद्राय॥

नमस्ते रुद्रमन्यव उतोत इषवे नमः। नमस्ते अस्तु धन्वने बाहुभ्या-मुत ते नमः॥ यात इषुः शिवतमा शिवं बभूव ते धनुः। शिवा शरव्या या तव तया नो रुद्र मृडय॥ या ते रुद्र शिवा तनू-रघोराऽपापकाशिनी। तया नस्तनुवा शन्तमया गिरिशंताभिचाकशीहि॥ यामिषु गिरिशंत हस्ते बिभर्ष्यस्तवे। शिवां गिरित्र तां कुरु मा हिंसीः पुरुषं जगत्॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शिवेन वचसा त्वा गिरिशाच्छा वदामसि। यथा नः सर्वमिज्जगदयक्ष्मꣳसुमना असत्॥ अध्यवोचदधि वक्ता प्रथमो दैव्यो भिषक्। अहीꣳश्च सर्वाञ्जंभयन्त्सर्वाश्च यातु धान्यः॥ असौ यस्ताम्रो अरुण उत बभ्रुः सुमंगलः। ये चेमाꣳरुद्रा अभितो दिक्षु श्रिताः सहस्रशोऽवैषाꣳहेड ईमहे॥ असौ योऽवसर्पति नीलग्रीवो विलोहितः। उतैनं गोपा अदृशन्नदृशन्नुदहार्यः। उतैनं विश्वा भूतानि स दृष्टो मृडयाति नः॥ नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे। अथो ये अस्य सत्त्वानोऽहं तेभ्योऽकरन्नमः॥ प्रमुंच धन्वनस्त्व-मुभयो-रार्त्नियोर्ज्याम्। याश्च ते हस्त इषवः परा ता भगवो वप॥ अवतत्य धनुस्त्वꣳ सहस्राक्ष शतेषुधे। निशीर्य शल्यानां मुखा शिवो नः सुमना भव॥ विज्यं धनुः कपर्दिनो विशल्यो बाणवाꣳ उत। अनेशन्नस्येषव आभुरस्य निषंगथिः॥ या ते हेति-र्मीढुष्टम हस्ते बभूव ते धनुः। तयाऽस्मान्विश्वतस्त्व-मयक्ष्मया परिब्भुज॥ नमस्ते अस्त्वायुधायानाततताय धृष्णवे। उगाभ्यामुत ते नमो बाहुभ्यां तव धन्वने॥ परि ते धन्वनो हेति-रस्मान्वृणक्तु विश्वतः। अथो य इषुधिस्तवारे अस्मन्निधेहि तम्॥१॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नमस्ते अस्तु भगवन् विश्वेश्वराय महादेवाय त्र्यंबकाय त्रिपुरान्तकाय त्रिकालाग्नि-कालाय कालाग्निरुद्राय नीलकण्ठाय मृत्युंजयाय सर्वेश्वराय सदाशिवाय श्रीमन्महादेवाय नमः ॥

नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमो नमः सस्पिञ्जराय त्विषीमते पथीनां पतये नमो नमो बभ्लुशाय विव्याधिनेऽन्नानां पतये नमो नमो हरिकेशायोपवीतिने पुष्टानां पतये नमो नमो भवस्य हेत्यै जगतां पतये नमो नमो रुद्रायाततताविने क्षेत्राणां पतये नमो नमः सूतायाहन्ताय वनानां पतये नमो नमः रोहिताय स्थपतये वृक्षाणां पतये नमो नमो मन्त्रिणे वाणिजाय कक्षाणां पतये नमो नमो भुवंतये वारिवस्कृतायौषधीनां पतये नमो नम उच्चैर्घोषायाक्रन्दयते पत्तीनां पतये नमो नमः कृत्स्नवीताय धावते सत्त्वनां पतये नमः ॥२ ॥

नमः सहमानाय निव्याधिन आव्याधिनीनां पतये नमो नमः ककुभाय निषङ्गिणे स्तेनानां पतये नमो नमो निषङ्गिण इषुधिमते तस्कराणां पतये नमो नमो वञ्चते

CC-0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

परिवञ्चते स्तायूनां पतये नमो नमो निचेरवे परिचरायारण्यानां पतये नमो नमः। सृकाविभ्यो जिघाꣳसद्भ्यो मुष्णतां पतये नमो नमो ऽसिमद्भ्यो नक्तं चरद्भ्यः प्रकृन्तानां पतये नमो नम उष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमो नम इषुमद्भ्यो धन्वाविभ्यश्च वो नमो नम आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो नम आयच्छद्भ्यो विसृजद्भ्यश्च वो नमो नमो ऽस्यद्भ्यो विद्ध्यद्भश्च वो नमो नम आसीनेभ्यः शयानेभ्यश्च वो नमो नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो नमस्तिष्ठद्भ्यो धावद्भथश्च वो नमो नमःसभाभ्यः सभापतिभ्यश्च वो नमो नमो। अश्वेभ्योऽश्वपतिभ्यश्च वो नमः ॥३॥

नम आव्यधिनीभ्यो विविध्यन्तीभ्यश्च वो नमो नम उगणाभ्यस्तृꣳहतीभ्यश्च वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमो नमो महद्भ्यः क्षुल्लकेभ्यश्च वो नमो नमो रथिभ्योऽरथेभ्यश्च वो नमो नमो रथेभ्यो रथपतिभ्यश्च वो नमो नमः सेनाभ्यः सेनानिभ्यश्च वो नमो नमः क्षत्तृभ्यः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संग्रहीतृभ्यश्च वो नमो नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमो नमः पुञ्जिष्टेभ्यो निषादेभ्यश्च वो नमो नम इषुकृद्भ्यो धन्वकृद्भ्यश्च वो नमो नमो मृगयुभ्यः श्वनिभ्यश्च वो नमो नमः श्वभ्यः श्वपतिभ्यश्च वो नमः ॥४॥

नमो भवाय च रुद्राय च नमः शर्वाय च पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय च नमः कपर्दिने च व्युप्तकेशाय च नमः सहस्राक्षाय च शतधन्वने च नमो गिरिशाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते च नमो ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे च नमो बृद्धाय च संवृद्ध्वने च नमो अग्रियाय च प्रथमाय च नम आशवे चाजिराय च नमः शीघ्रियाय च शीभ्याय च नम ऊर्म्याय चावस्वन्याय च नमः स्रोतस्याय च द्वीप्याय च ॥५॥

नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चापरजाय च नमो मध्यमाय चापगल्भाय च नमो जघन्याय च बुध्नियाय च नमः सोभ्याय च प्रतिसर्याय च नमो याम्याय च क्षेम्याय च नम उर्वर्याय च खल्याय च नमः श्लोक्याय चावसान्याय च नमो वन्याय च कक्ष्याय च नमः श्रवाय च प्रतिश्रवाय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

च नम आशुषेणाय चाशुरथाय च नमः शूराय चावभिन्दते च नमो वर्मिणे च वरूथिने च नमो बिल्मिने च कवचिने च नमः श्रुताय च श्रुतसेनाय च ॥६॥

नमो दुन्दुभ्याय चाहनन्याय च नमो धृष्णवे च प्रमृशाय च नमो दूताय च प्रहिताय च नमो निषङ्गिणे चेषुधिमते च नमस्तीक्ष्णेषवे चायुधिने च नमः स्वायुधाय च सुधन्वने च नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च नमः सूद्याय च सरस्याय च नमो नाद्याय च वैशन्ताय च नमः कूप्याय चावट्याय च नमो वर्ष्याय चावर्ष्याय च नमो मेघ्याय च विद्युत्याय च नम ईध्रीयाय चातप्याय च नमो वात्याय च रेष्मियाय च नमो वास्तव्याय च वास्तुपाय च ॥७॥

नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च नमः शङ्गाय च पशुपतये च नम उग्राय च भीमाय च नमो अग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय नमः शंभवे च मयोभवे च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च नमस्तीर्थ्याय च कूल्याय च नमः पार्याय चावार्याय च

CC-0. In Public Domain. Kirtikant Sharma Narayan Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नमः प्रतरणाय चोत्तरणाय च नम आतार्याय चालाद्याय च नमः शष्प्याय च फेन्याय च नमः सिकत्याय च प्रवाह्याय च ॥८॥

नम इरिण्याय च प्रपथ्याय च नमः किंशिलाय च क्षयणाय च नमः कपर्दिने च पुलस्तये च नमो गोष्ठ्याय च गृह्याय च नमस्तल्प्याय च गेह्याय च नमः काट्याय च गह्वरेष्ठाय च नमो हृदय्याय च निवेष्प्याय च नमः पांसव्याय च रजस्याय च नमः शुष्क्याय च हरित्याय च नमो लोप्याय चोलप्याय च नम ऊर्व्याय च सूर्म्याय च नमः पर्ण्याय च पर्णशद्याय च नमोऽपगुरमाणाय चाभिघ्नते च नम आखिखदते च प्रखिखदते च नमो वः किरिकेभ्यो देवानां हृदयेभ्यो नमो विक्षीणकेभ्यो नमो विचिन्वत्केभ्यो नम आनिर्हतेभ्यो नम आमीवत्केभ्यः ॥९॥

द्रापे अन्धसस्पते दरिद्रन्नीललोहित। एषां पुरुषाणामेषां पशूनां मा भेर्मारो मो एषां किंचनाममत्॥ या ते रुद्र शिवा तनूः शिवा विश्वाह भेषजी। शिवा रुद्रस्य भेषजी तया नो मृड जीवसे ॥ इमांरुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतिम्। यथा नः शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम्॥ मृडा नो रुद्रोतनो मयस्कृधि क्षयद्विराय

CC0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नमसा विधेम ते। यच्छं च योश्च मनुरायजे पिता तदश्याम तव रुद्र प्रणीतौ॥ मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्त-मुत मा न उक्षितम्। मा नो वधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः॥ मानस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः। वीरान्मा नो रुद्र भामितोऽवधी-र्हविष्मन्तो नमसा विधेम ते॥ आरात्ते गोघ्न उत पूरुषघ्ने क्षयद्वीराय सुम्नमस्मे ते अस्तु। रक्षा च नो अधि च देव ब्रूह्यथा च नः शर्म यच्छ द्विबर्हाः॥ स्तुहि श्रुतं गर्तसदं युवानं मृगन्न भीम-मुपहत्नुमुग्रम्। मृडा जरित्रे रुद्र स्तवानो अन्यन्ते अस्मन्निवपन्तु सेनाः॥ परिणो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः। अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृडय॥ मीढुष्टम शिवतम शिवो नः सुमना भव॥ परमे वृक्ष आयुधं निधाय कृत्तिं वसान आचर पिनाकं विभ्रदागहि॥ विकिरिद विलोहित नमस्ते अस्तु भगवः। यास्ते सहस्रꣳहेतयोऽन्यमस्मन्निवपन्तु ताः॥ सहस्राणि सहस्रधा बाहुवोस्तव हेतयः। तासामीशानो भगवः पराचीना मुखा कृधि॥१०॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम्। तेषाꣳसहस्रयोजनेऽवधन्वानि तन्मसि॥ अस्मिन् महत्यर्णवेऽन्तरिक्षे भवा अधि॥ नीलग्रीवाः शितिकण्ठाः शर्वा अधः क्षमाचराः॥ नीलग्रीवाः शितिकण्ठा दिवꣳरुद्रा उपश्रिताः॥ ये वृक्षेषु सस्पिंजरा नीलग्रीवा विलोहिताः॥ ये भूतानामधिपतयो विशिखासः कपर्दिनः॥ ये अन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान्॥ ये पथां पथिरक्षय ऐलबृदा यव्युधः॥ ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः॥ य एतावन्तश्च भूयाꣳसश्च दिशो रुद्रा वितस्थिरे। तेषाꣳसहस्र-योजने ऽवधन्वानि तन्मसि॥ नमो रुद्रेभ्यो ये पृथिव्यां येऽन्तरिक्षे ये दिवि येषामन्नं वातो वर्षमिषव-स्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशो-दीचीर्दशोर्ध्वास्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि॥

त्र्यंबकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्यो-र्मुक्षीय माऽमृतात्॥

यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवनाऽऽविवेश तस्मै रुद्राय नमो अस्तु॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तमुष्टुहि यः स्विषुः सुधन्वा यो विश्वस्य क्षयति भेषजस्य। यक्ष्वामहे सौमनसाय रुद्रं नमोभि र्देवमसुरं दुवस्य॥

अयं मे हस्तो भगवानयं मे भगवत्तरः। अयं मे विश्वभेषजोऽयꣳ शिवाभिमर्शनः॥

ये ते सहस्रमयुतं पाशा मृत्यो मर्त्याय हन्तवे। तान् यज्ञस्य मायया सर्वानव यजामहे। मृत्यवे स्वाहा मृत्यवे स्वाहा॥

ओं नमो भगवते रुद्राय विष्णवे मृत्युर्मे पाहि। प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तकः। तेनान्नेनाप्यायस्व॥ नमो रुद्राय विष्णवे मृत्युर्मे पाहि॥११॥

ओं शान्तिः शान्तिः शान्तिः॥

इति श्रीकृष्णयजुर्वेदीय तैत्तिरीय संहितायां
चतुर्थकाण्डे पंचमः प्रपाठकः॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ चमकप्रश्नः ॥

अग्नाविष्णू सजोषसेमा वर्धन्तु वां गिरः। द्युम्नैर्वाजेभिरागतम्। वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे श्रावश्च मे श्रुतिश्च मे ज्योतिश्च मे सुवश्च मे प्राणश्च मेऽपानश्च मे व्यानश्च मेऽसुश्च मे चित्तं च म आधीतं च मे वाक्च मे मनश्च मे चक्षुश्च मे श्रोत्रं च मे दक्षश्च मे बलं च म ओजश्च मे सहश्च म आयुश्च मे जरा च म आत्मा च मे तनूश्च मे शर्म च मे वर्म च मे ऽङ्गानि च मेऽस्थानि च मे परूंषि च मे शरीराणि च मे॥ १॥

ज्यैष्ठ्यं च म आधिपत्यं च मे मन्युश्च मे भामश्च मेऽमश्च मेऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्ष्मा च मे द्राघुया च मे वृद्धं च मे वृद्धिश्च मे सत्यं च मे श्रद्धा च मे जगच्च मे धनं च मे वशश्च मे त्विषिश्च मे क्रीडा च मे मोदश्च मे जातं च मे जनिष्यमाणं च मे सूक्तं च मे सुकृतं च मे वित्तं च मे वेद्यं च मे भूतं च मे भविष्यच्च मे सुगं च मे सुपथं च म ऋद्धं च म ऋद्धिश्च मे क्लृप्तं च मे क्लृप्तिश्च मे मतिश्च मे सुमतिश्च मे॥ २॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च म प्रसूश्च मे सीरं च मे लयश्च च ऋतं च मे ऽमृतं च मे ऽयक्ष्मं च मे ऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मे ऽनमित्रं च मे ऽभयं च मे सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे॥ ३॥

ऊर्क्च मे सूनृता च मे पयश्च मे रसश्च मे घृतं च मे मधु च मे सग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रं च म औद्भिद्यं च मे रयिश्च मे रायश्च मे पुष्टं च मे पुष्टिश्च मे विभु च मे प्रभु च मे बहु च मे भूयश्च मे पूर्णं च मे पूर्णतरं च मेऽक्षितिश्च मे कूयवाश्च मे ऽन्नं च मे ऽक्षुच्च मे व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे गोधूमाश्च मे मसुराश्च मे प्रियंगवश्च मे ऽणवश्च मे श्यामाकाश्च मे नीवाराश्च मे॥ ४॥

अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यं च मे ऽयश्च मे सीसं च

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मे त्रपुश्च मे श्यामं च मे लोहं च मे ऽग्निश्च म आपश्च मे वीरुधश्च म ओषधयश्च मे कृष्टपच्यं च मे ऽकृष्टपच्यं च मे ग्राम्याश्च मे पशव आरण्याश्च यज्ञेन कल्पन्तां वित्तं च मे वित्तिश्च मे भूतं च मे भूतिश्च मे वसु च मे वसतिश्च मे कर्म च मे शक्तिश्च मे ऽर्थश्च म एमश्चम इतिश्च मे गतिश्च मे ॥ ५ ॥

अग्निश्च म इन्द्रश्च मे सोमश्च म इन्द्रश्च मे सविता च म इन्द्रश्च मे सरस्वती च म इन्द्रश्च मे पूषा च म इन्द्रश्च मे बृहस्पतिश्च म इन्द्रश्च मे मित्रश्च म इन्द्रश्च मे वरुणश्च म इन्द्रश्च मे त्वष्टा च म इन्द्रश्च मे धाता च म इन्द्रश्च मे विष्णुश्च म इन्द्रश्च मे ऽश्विनौ न म इन्द्रश्च मे मरुतश्च म इन्द्रश्च मे विश्वे च मे देवा इन्द्रश्च मे पृथिवी च म इन्द्रश्च मे ऽन्तरिक्षं च म इन्द्रश्च मे द्यौश्च म इन्द्रश्च मे दिशश्च म इन्द्रश्च मे मूर्धा च म इन्द्रश्च मे प्रजापतिश्च म इन्द्रश्च मे ॥ ६ ॥

अंशुश्च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च म उपांशुश्च मेऽन्तर्यामश्च म ऐन्द्रवायवश्च मे मैत्रावरुणश्च म आश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे मन्थी च म आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च म

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ऋतुग्रहाश्च मे ऽतिग्राह्याश्च म ऐन्द्राग्रश्च मे वैश्वदेवश्च मे मरुत्वतीयाश्च मे माहेन्द्रश्च म आदित्यश्च मे सावित्रश्च मे सारस्वतश्च मे पौष्णश्च मे पात्नीवतश्च मे हारियोजनश्च मे ॥ ७ ॥

इध्मश्च मे बर्हिश्च मे वेदिश्च मे धिष्णियाश्च मे स्रुचश्च मे चमसाश्च मे ग्रावाणश्च मे स्वरवश्च म उपरवाश्च मे ऽधिषवणे च मे द्रोणकलशश्च मे वायव्यानि च मे पूतभृच्च म आधवनीयश्च म आग्नीध्रं च मे हविर्धानं च मे गृहाश्च मे सदश्च मे पुरोडाशाश्च मे पचताश्च मेऽवभृथश्च मे स्वगाकारश्च मे ॥ ८ ॥

अग्निश्च मे घर्मश्च मे ऽर्कश्च मे सूर्यश्च मे प्राणश्च मे ऽश्वमेधश्च मे पृथिवी च मे ऽदितिश्च मे दितिश्च मे द्यौश्च मे शक्वरी-रङ्गुलयो दिशश्च मे यज्ञेन कल्पन्ता-मृक्च मे साम च मे स्तोमश्च मे यजुश्च मे दीक्षा च मे तपश्च म ऋतुश्च मे व्रतं च मे ऽहोरात्रयोर्वृष्ट्या बृहद्रथन्तरे च मे यज्ञेन कल्पेताम् ॥ ९ ॥

गर्भाश्च मे वत्साश्च मे त्र्यविश्च मे त्र्यवी च मे दित्यवाट् च मे दित्यौही च मे पञ्चाविश्च मे पञ्चावी च मे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्रिवत्सश्च मे त्रिवत्सा च मे तुर्यवाट् च मे तुर्यौ ही च मे पष्ठवाट् च मे पष्ठौही च म उक्षा च मे वशा च म ऋषभश्च मे वेहच्च मेऽनड्वाच्च मे धेनुश्च म आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पता मपानो यज्ञेन कल्पतां व्यानो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पताꣳ श्रोत्रं यज्ञेन कल्पतां मनो यज्ञेन कल्पतां वाग्यज्ञेन कल्पता-मात्मा यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताम्॥ १०॥

एका च मे तिस्रश्च मे पञ्च च मे सप्त च मे नव च म एकादश च मे त्रयोदश च मे पंचदश च मे सप्तदश च मे नवदश च म एकविꣳशतिश्च मे त्रयोविꣳशतिश्च मे पंचविꣳशतिश्च मे सप्तविꣳशतिश्च मे नवविꣳशतिश्च म एकत्रिꣳशच्च मे त्रयस्त्रिꣳशच्च म चतस्रश्च मेऽष्टौ च मे द्वादश च मे षोडश च मे विꣳशतिश्च मे चतुर्विꣳशतिश्च मेऽष्टाविꣳशतिश्च मे द्वात्रिꣳशच्च मे षट्त्रिꣳशच्च मे चत्वारिꣳशच्च मे चतुश्चत्वारिꣳशच्च मेऽष्टाचत्ववारिꣳशच्च मे वाजश्च प्रसवश्चापिजश्च क्रतुश्च सुवश्च मूर्धा च व्यश्नियश्चान्त्यायनश्चान्त्यश्च भौवनश्च भुवनश्चाधि-पतिश्च॥ ११॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इडा देवहूर्मनु-र्यज्ञनी-र्बृहस्पतिरुक्थामदानि शꣳसिष-द्विश्वेदेवाः सूक्त"वाचः पृथिवि-मातर्मा मा हिꣳसी-र्मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासꣳशुश्रूषेण्यां" मनुष्येभ्यस्तं मा देवा अवन्तु शोभायै पितरोऽनुमदन्तु॥

(प्रत्येक चमकानुवाक जपानन्तरं कर्पूर हारती मन्त्राः॥)

हꣳसः शुचिषद्वसु-रन्तरिक्षसद्धोता वेदिषदतिथि-र्दुरोणसत्।
नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्॥१॥

घृतं मिमिक्षिरे घृतमस्ययोनि-र्घृतेश्रितो घृत-मुवस्य धाम।
अनुष्वधमावह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यम्॥२॥

समुद्रा दूर्मिर्मधुमाꣳउदार-दुपाꣳशुना सममृतत्व-मानट्।
घृतस्य नाम गुह्यं यदस्ति जिह्वा देवाना-ममृतस्य-नाभिः॥३॥

वयं नाम प्रब्रवामा घृतेनास्मिन् यज्ञे धारयामा नमोभिः।
उप ब्रह्मा शृणव च्छस्यमानं चतुशृङ्गोऽवमीद्गौरएतत्॥४॥

चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीरषे सप्त हस्तासो अस्य।
त्रिधाबद्धो वृषभो रोखीति महो देवो मर्त्याꣳ आविवेश॥५॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्रिधाहितं पणिभि-र्गुह्यमानं गवि देवासो घृतमन्वविन्दन्।
इन्द्र एकगं् सूर्य एकं जजान वेना-देकग्गं् स्वधयानिष्ट-तक्षुः ॥६॥

यो देवाना" प्रथमं पुरस्तद्विश्वाधियो रुद्रो महर्षिः।
हिरण्यगर्भं पश्यत जायमानगं् सनो देव-श्शुभया स्मृत्या संयुनक्तु ॥७॥

यस्मात्परं नापरमस्ति किंचि-द्यस्मान्नाणीयो न ज्यायाऽस्ति कश्चित्।
वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम" ॥८॥

न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्व-मानशुः।
परेण नाकं निहितं गुहायां विभ्राजदेद्यतयो विशन्ति ॥९॥

वेदान्तविज्ञान-सुनिश्चितार्था स्संन्यास योगाद्यतयश्शुद्ध-सत्त्वा":।
ते ब्रह्मलोकेतु पर"न्तकाले परामृतात्परिमुच्यन्ति सवे" ॥१०॥

दहं विपापं परमऽश्मभूतं यत्पुण्डरीकं पुरमध्यसग्गं्स्थम्।
तत्रापि दहं गगनं विशोक-स्तस्मिन् यदन्तस्तदुपासितव्यम्।
यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः।
तस्य प्रकृतिलीनस्य यः परस्य महेश्वरः ॥११॥

ओं शान्तिः शान्तिः शान्तिः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ आपस्तंब अग्निमुख प्रयोगः ॥

उल्लिख्य। अवोक्ष्य। भू भुवस्सुवरोमिति अग्निं प्रतिष्ठाप्य। अग्निमिध्वा। अग्निं प्रज्वाल्यः। प्राक्तोयं निधाय। परिस्तीर्य पुरस्तात्, दक्षिणतः, पक्ष्यात्, उत्तरतः। दक्षिणानुत्तरान् उत्तरानऽधरान्। पात्रोत्तरासनं। प्रणीतोत्तरासनं। पक्ष्यात्पात्र सादनं। आयामतः परीमाणं प्रोक्षणी संस्कारः प्रात्रपोक्ष इति। समौ अप्रच्छिन्नाग्रौ दर्भौ प्रादेशमात्रौ पवित्रे कुरुते। स पवित्रेण पाणिना पात्राणि संस्पृश्य। दर्वीं, आज्यस्थालीं, प्रोक्षणीं प्रणीतां, इतरदर्वीं इदमं च। प्रोक्षणी प्रात्रमादाय अक्षतैस्सह उदकं पूरयित्वा त्रिः उत्पूय, उत्तानानि पात्राणि कृत्वा त्रिः सर्वाभिरद्भिः प्रोक्ष्य प्रोक्षणीपात्रं दक्षिणतः निधाय प्रणीता पात्रमादाय अक्षतैः सह अप आसिच्य त्रिः उत्पूय समं प्राणैर्हृत्वा उत्तरेणाग्निं दर्भेषु सादयित्वा दर्भैः प्रच्छाद्य। वरुणाय नमः सकलाराधनैः स्वर्चितम् (उत्तरेणाग्नि कुंभे आपोरा इत्यादि जपित्पवा वरुणं आवाह्य, प्रधान देवताश्च आवाह्य षोडशोपचारेणं संपूज्य)। अग्नेः दक्षिणतः ब्रह्मवरणं। अस्मिन्... होम कर्मणि ब्रह्माणं त्वां वृणे। ब्रह्मणे नमः सकलाराधनैः स्वार्चितं।

CC-0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पवित्रान्तहितायां आज्य स्थालयां आज्यं निरुप्य। उदीचोङ्गारान् निरूह्य। तेषु आज्यं अधिश्रित्य। ज्वलता तृणेनावद्योत्य द्वे दर्भाग्रे प्रच्छिद्य प्रक्षाळय प्रत्यस्य। त्रिः पर्यग्नि कृत्वा। उदगुद्वास्य।'अङ्गारान् प्रत्यूह्य। उदगग्राभ्यां पवित्राभ्यां पुनराहारं आज्यं त्रिः उत्पूय। पवित्रग्रन्थिं विस्त्रस्य अपउपस्पृश्य प्रागग्रामग्नौ प्रहरति। येन जुहोति तदग्नौ प्रतितप्य दर्भैः संमृज्य पुनः प्रति तप्य प्रोक्ष्य निधाय दर्भान् अद्भिः संस्पृश्य अग्नौ प्रहरति। अथ परिधीन् परिदधाति। स्थविष्ठो मध्यमः। अणीयान्द्राधीयान् दक्षिणार्थः। अणिष्ठो ह्रसिष्ठ उत्तरार्धः। द्वे आधार समिधौ मध्यमं परिधिं हस्तेनोपस्पृश्य दक्षिणमुत्तर मादधाति ऊर्ध्वे समिधा-वादधाति। अथाग्निं परिषिञ्चति। अदितेनुमन्यस्व इति दक्षिणतः प्राचीनं। अनुमतेनु मन्यस्वेति पश्चादुदीचीनं। सरस्वतेन्द्र मन्यस्वेति उत्तरतः प्राचीनं। देव सवितः प्रसुवेति समन्नं परिषिच्य। इध्ममाज्येन अभ्यज्य। ओमस्मिन्... होमकर्मणि ब्रह्मन् इध्ममाधास्ये॥ ब्रह्मा-ओमाधत्स्व॥ ब्रंह्मार्पणं॥ प्रजापतिं मनसा ध्यायन् आधारावाधारयति। इतर दर्व्या जुहोति। वायव्या दाग्नेयान्तं। प्रजापतय इदं। प्रधान

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दर्व्या जुहोति। निऋत्ऋत्या ईशानान्तं। इन्द्रायेदं। उत्तरार्ध पूर्वार्धे अग्नये स्वाहा। अग्नय इदं। दक्षिणार्धपूर्वार्धे सोमाय स्वाहा। सोमायेदं। समं पूर्वेण मध्ये अग्नये स्वाहा। अग्नय इदं। आरंभ प्रभृति अग्नौ एतत्क्षणपर्यन्तं मध्ये संभावित समस्त दोषप्रायश्चिन्तार्यं सर्वप्रायश्चिन्त होमं होष्यामि। ओं भूर्भुवस्सुवस्वाहा॥ प्रजापतय इदं न मम॥ श्रीरुद्रविधानेन अग्नौ श्री आदित्यात्मक महादेवं आवाह्य षोडशोपचारैः संपूज्य चरं, श्रपयित्वा प्रोक्ष्य अभिधार्य प्राचीनमुदी चीनं वोद्वास्य प्रतिठित मभिधार्य अवदान धर्मेणावदाय

"असौयस्ताम्रो अरुण उत ब भ्रुस्सुमङ्गलः।
येचेमाꣳ रुद्रा अभितो दिक्षु श्रितास्सहस्रशोवैषाँ हेड- ईमहों॥

असौ यो वसर्पति नीलग्रीवो विलोहितः।
उतैनं गोपा अदृशन्नदृशन्नुद हार्यः॥
उतैनं विश्वा भूतानि सदृष्टो मृडयाति नस्स्वाहा॥"

इति पुरोनु वाक्या मनूच्य याज्यया जुहुयात्। आदित्यात्मक श्री रुद्रायेदं न मम। स्विष्टकृत मवदाय अन्तः परिधि सादयित्वा॥ श्री रुद्र होमं अनुषङ्गोण यथाविधि हुत्वा॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रुद्रैकादशिन्यां

द्वादश ऋत्विजः एक वारं श्री रुद्र हवन कर्तव्यं। श्री रुद्र प्रथमर्चा एकाहुतिः अन्त्यया ऋचा एकाहुतिः चमक प्रश्न एकादशानुवाकेन प्रत्यनुवाकं इति एकादशाहुतिः आचार्येण कर्तव्यं। अनन्तरं वसोर्द्धारा। सामगानं॥

महारुद्रेः

द्वादश ऋत्विजः दशवारं श्री रुद्रहोमं अन्त्यायां एकादश वारे त्रयोदश ऋत्विजः श्रीरुद्रहोमं कृत्वा द्वादश ऋत्विजः प्रत्यनुवाकं एकादश चमकानुवाकेन हवनं कृत्वा श्रीरुद्र आद्यन्त ऋग्म्यां आचार्य एव हुत्वा वसोर्द्धारां जुहुयात्॥

अतिरुद्रे

द्वादश ऋत्विजः एकशतोत्तर द्वाविंशति आवृत्तयः कृत्वा आचार्यः श्रीरुद्रस्य आद्यऋचा अन्त्य ऋचा हवनं कृत्वा वर्सोर्धारां जुहुयात्। "हव्यवाहमभिमानि-षाहं रक्षोहणं पृतनासु जिष्णुं। ज्योतिष्मन्नं दीघतं पुरन्धिं अग्निँ स्विष्टकृत माहुवेमोम्॥ स्विष्टमग्ने अभितत्पृणाहि विश्वादेव पृतना

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अभिष्य। उरुन्नः पन्थां प्रदिशन्विमाहि ज्योतिष्मद्देह्यजरंन आयुस्वाहा ॥ अग्नये स्विष्टकृत इदं न मम॥ ततो जयादि होमः॥ एतत्कर्म समृध्यर्भं जयादि होमं करिष्ये॥

१. चित्तं च स्वाहा-चित्तायेदं न मम।

२. चित्तिश्च स्वाहा-चित्याइदं न मम।

३. आकूतं च स्वाहा-आकूतायेदं न मम।

४. आकूतिश्च स्वाहा-आकूतायेदं न मम।

५. विज्ञातञ्च स्वाहा-विज्ञातायेदं न मम।

६. विज्ञानञ्च स्वाहा-विज्ञानायेदं न मम।

७. मनश्च स्वाहा-मनसइदं न मम।

८. शक्वरीश्च स्वाहा-शक्वरीभ्य इद न ममं।

९. दर्शश्च स्वाहा-दर्शायेदं न मम।

१०. पूर्णमासश्च स्वाहा-पूर्णमासा इदं न मम।

११. बृहश्च स्वाहा-बृहत इदं न मम।

१२. रथन्तरञ्च स्वाहा-रथन्तरायेदं न मम।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१३. प्रजापति र्जयानिन्द्राय वृष्णे प्रायच्छदुग्रः पृतनाज्येषु। तस्मै विशः समनमन्त सवीस्स उग्रः सहिहव्यो बभूव स्वाहा॥ प्रजापतय इदं न मम।

१४. अग्निर्भतानां अधिपति स्समावतु अस्मिन्ब्रह्मन् अस्मिन्क्षत्रे अस्यामाशिवि अस्यां पुरोधायां अस्मिन्कर्मन्नस्यां देवहूत्यां स्वाहा। अग्नय इदं न मम।

१५. इन्द्रो ज्येष्टाना मधिपतिः स्समावतु अस्मिन्ब्रह्मन् अस्मिन्क्षत्रे अस्यामाशिवि अस्यां पुरोधायां अस्मिन्कर्मन्नस्या देवहूत्यां स्वाहा। इन्द्रायेदं न मम।

१६. यमः पृथिव्या अधिपतिः स्समावतु अस्मिन्ब्रह्मन् अस्मिन्क्षत्रे अस्यामाशिवि अस्यां पुरोधायां अस्मिन्कर्मन्नस्या देवहूत्याँ स्वाहा। यमादेदं न मम।

१७. वायुरन्तरिक्षस्य स्समावतु अस्मिन्ब्रह्मन् अस्मिन्क्षत्रे अस्यामाशिवि अस्यां पुरोधायां अस्मिन्कर्मन्नस्या देवहूत्याँ स्वाहा। वायव इदं न मम।

१८. सूर्यो दिवोधिपतिः स्समावतु अस्मिन्ब्रह्मन् अस्मिन्क्षत्रे अस्यामाशिवि अस्यां पुरोधायां अस्मिन्कर्मन्नस्या देवहूत्याँ स्वाहा। सूर्यायेदं न मम।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१९. चन्द्रमा नक्षत्रणां अधिपतिः स्समावतु अस्मिन्ब्रह्मन् अस्मिन्क्षत्रे अस्यामाशिवि अस्यां पुरोधायां अस्मिन्कर्मन्नस्या देवहूत्याँ स्वाहा। चन्द्रमस इदं न मम।

२०. बृहस्पति र्ब्रह्मणोधिपतिः स्समावतु अस्मिन्ब्रह्मन् अस्मिन्क्षत्रे अस्यामाशिवि अस्यां पुरोधायां अस्मिन्कर्मन्नस्या देवहूत्याँ स्वाहा। बृहस्पतयइदं न मम।

२१. मित्रस्सत्यानां अधिपतिः स्समावतु अस्मिन्ब्रह्मन् अस्मिन्क्षत्रे अस्यामाशिवि अस्यां पुरोधायां अस्मिन्कर्मन्नस्या देवहूत्याँ स्वाहा। मित्रायेदं न मम।

२२. वरुणोपां अधिपतिः स्समावतु अस्मिन्ब्रह्मन् अस्मिन्क्षत्रे अस्यामाशिवि अस्यां पुरोधायां अस्मिन्कर्मन्नस्या देवहूत्याँ स्वाहा। वरुणायेदं न मम।

२३. समुद्रस्स्त्रोत्याना मधिपतिः स्समावतु अस्मिन्ब्रह्मन् अस्मिन्क्षत्रे अस्यामाशिवि अस्यां पुरोधायां अस्मिन्कर्मन्नस्या देवहूत्याँ स्वाहा। समुद्रायेदं न मम।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

२४. अन्नं साम्राज्यानां अधिपति तन्मावतु स्समावतु अस्मिन्ब्रह्मन् अस्मिन्क्षत्रे अस्यामाशिवि अस्यां पुरोधायां अस्मिन्कर्मन्नस्या देवहूत्यां स्वाहा। अन्नायेदं न मम।

२५. सोम ओषधीनामधिपतिः स्समावतु अस्मिन्ब्रह्मन् अस्मिन्क्षत्रे अस्यामाशिवि अस्यां पुरोधायां अस्मिन्कर्मन्नस्या देवहूत्याँ स्वाहा। सोमायेदं न मम।

२६. सविता प्रसवानामधिपतिः स्समावतु अस्मिन्ब्रह्मन् अस्मिन्क्षत्रे अस्यामाशिवि अस्यां पुरोधायां अस्मिन्कर्मन्नस्या देवहूत्याँ स्वाहा। सवित्रइदं न मम।

२७. रुद्रः पशूनां अधिपतिः स्समावतु अस्मिन्ब्रह्मन् अस्मिन्क्षत्रे अस्यामाशिवि अस्यां पुरोधायां अस्मिन्कर्मन्नस्या देवहूत्याँ स्वाहा। रुद्रायेदं। अपउपस्पृश्य न मम।

२८. त्वष्टा रूपाणां अधिपतिः स्समावतु अस्मिन्ब्रह्मन् अस्मिन्क्षत्रे अस्यामाशिवि अस्यां पुरोधायां अस्मिन्कर्मन्नस्या देवहूत्याँ स्वाहा। त्वष्ट्र इदं न मम।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

२९. विष्णुः पर्वतानां अधिपतिः स्समावतु अस्मिन्ब्रह्मन् अस्मिन्क्षत्रे अस्यामाशिवि अस्यां पुरोधायां अस्मिन्कर्मन्नस्या देवहूत्यां स्वाहा। विष्णव इदं न मम।

३०. मरुतो गणानामधिपतयः तेमावन्तु अस्मिन् ब्रह्मन् अस्मिन्क्षत्रे अस्यामाशिवि अस्यां पुरोधायां अस्मिन्कर्मन्नस्या देवहूत्याँ स्वाहा। सरुद्भ्य इदं।

३१. पितरः पितामहाः परे वरे ततास्ततामहा इहमावत। अस्मिन्ब्रह्मन् अस्मिन्क्षत्रे अस्यामाशिवि अस्यां पुरोधायां अस्मिन्कर्मन्नस्या देवहूत्याँ स्वाहा। मन्त्रोक्त देवताभ्य इदं न मम। अप उपस्पृश्य।

३२. ऋताषाडृतधामाग्निर्गन्धर्वः तस्यौष धयोप्सरस ऊर्जो नाम स इदं ब्रह्म क्षत्रं पातु ता इंद ब्रह्मक्षत्रं पान्तु राष्ट्रं तस्मै स्वाहा। अग्नये गन्धर्वायेदं न मम। ताभ्य स्वाहा। ओषधीभ्योऽप्सरोभ्य इदं न मम।

३३. सं हि तो विश्वसामा सूर्यो गन्धर्वस्तस्य मरीचयोऽप्सरस आयुवो नाम सइदं ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा। सूर्याय गन्धर्वायेदं न मम। ताभ्य स्वाहा। मरीचिभ्यः अप्सरोभ्यइदं न मम।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

३४. सुषुंन स्सूर्य रश्मिश्चन्दमा गन्धर्वस्तस्य नक्षत्राण्य प्सरसो बेकुरयो नाम ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा। चन्द्रमसे गन्धर्वायेदं न मम। ताभ्य स्वाहा। नक्षेत्रेभ्यः अप्सरोभ्य इदं न मम।

३५. भुज्युस्सुपर्णो यज्ञो गन्धर्वस्तस्य दक्षिणा अप्सरसस्तवा नाम ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा। यज्ञाय गन्धवीयेदं न मम। ताभ्यस्वाहा। दक्षिणाभ्यो-ऽप्सरोभ्य इदं न मम।

३६. प्रजापतिर्विश्वकर्मा मनो गन्धर्वस्तस्यर्क्सामान्यप्सरसो वह्नयो नाम ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा। मनसे गन्धर्वायेदं न मम। ताभ्य स्वाहा ऋक्सामेभ्यःअप्सरोभ्य इदं न मम।

३७. इषिरो विश्वव्यचा वातोऽगन्धर्वस्तस्यापोप्सरसो मुदानाम ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा। वाताय गन्धर्वायेदं न मम। ताभ्यस्वाहा अद्भयः अप्सरोभ्य इदं न मम।

३८. भुवनस्यपते यस्य त उपरि गृहा इह च। सनो रास्वा ज्यानि रायत्पोषं सुवीर्यः संवत्सरीणां स्वस्तिँ स्वाहा। भुवनस्य पत्यै इदं न मम।

CC-0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

३९. परमेष्ट्यधिपति र्मृत्युर्गन्धस्तस्य विश्वमप्सरसो भुवो नाम स इदं ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा। मृत्यते गन्धर्वायेदं न मम। ताभ्य स्वाहा। विश्वस्मा अप्सरोभ्य इदं न मम।

४०. सुक्षितिस्सुभूमिः भद्रकृत्सुववर्वान्पर्जन्यो गन्धर्वः तस्य विद्युतोऽप्सर रुचो नाम स इदं ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा। पर्जन्याय गन्धवीयेदं न मम। ताभ्यस्वाहा। विद्युद्भ्यः अप्सरोभ्य इदं न मम।

४१. दूरे हेति रमृडयो मृत्युर्गन्धर्वस्तस्य प्रजा अप्सरसो भीरुवो नाम स इदं ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा। मृत्यवे गन्धर्वायेदं न मम। ताभ्य स्वाहा। प्रजाभ्योऽप्सरोभ्य इदं न मम।

४२. चारुः कृपण काशी कामो गन्धर्वस्तस्या धयोप्सरसः शोचयन्तीनांम स इदं ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा। कामाय गन्धर्वायेदं न मम। ताभ्यस्वाहा। आधिभ्योऽप्सरोभ्य इदं न मम।

४३. सनो भुवनस्य पते यस्य त उपरि गृहा इह च। उरु ब्रह्मणेस्मै क्षत्राय महि शर्मयच्छ स्वाहा॥ भुवनस्य पत्यै ब्रह्मण इदं न मम।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

४४. प्रजापते नत्वदे तान्यन्यो विश्वा जानानि परिता बभूव। यत्कामास्ते जुहुमस्तन्नो अस्तु वयँस्याम पतयो रयीणां स्वाहा॥ प्रजापतय इदं न मम।

४५. भू स्वाहा। अग्नय इदं न मम। भुवस्वाहा। वायव इदं न मम। सुवः स्वाहा। सूर्यायेदं न मम।

यदस्य कर्मणोत्यरीरिचं यद्वा न्यून मिहाकरं। अग्निष्टन् स्विष्टकृदिदान्सर्वꣳस्विष्टꣳसुहुतं करोतु स्वाहा। अग्न्ये स्विष्टकृत इदं न मम। परिध्यञ्जनं। लेपकार्यं। प्रधान दर्वीं दक्षिणतः। इतरदर्वीं मध्ये। आज्यस्थाली मुत्तरतः। पात्र प्रयुक्तं तृणमक्त बहिः। अग्रं मध्यं मूलं एवं त्रिः। पुकं दर्भं प्रज्ञानं निधाय। अग्नौ प्रहरति। अपउपस्पृश्य नृण प्रहरः। निर्देशयनञ्च। अग्नि मभिमन्त्रिणञ्च। भूमौ निमार्ष्टि। परिधि प्रहरः। इतरौ प्रहरन्। सँसावं जुहोति वसुभ्यो रुद्रेभ्य आदित्येभ्यः सँस्राव भागेभ्य इदं न मम। (व्रतेषु सुवनेचैव तथैवाध्ययने मखे। परिधि प्रहरणं कुर्यात् लेपकार्यं न विद्यते॥

विवाहोपनयन सामावर्तन सीमन्त चौळ गोदान प्रायश्चित्तेषु शम्यापोह्य॥)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अस्मिन् कर्मणि अविज्ञात प्रायश्चित्तानि करिष्ये। अनाज्ञानं यदाज्ञातं यज्ञस्य क्रियते मिथु। अग्ने तदस्य कल्पय त्वँहि वेत्ययथाततं स्वाहा॥ अग्नय इदं न मम। पुरुष संमितो यज्ञः यज्ञः पुरुष संमितः। अग्ने तदस्य कल्पय त्वँहि वेत्थयथा ततं स्वाहा॥ अग्नय इदं न मम। यत्पाकत्रा मनसा दीन दक्षाना यज्ञस्य मन्वते मर्तासः। अग्निष्ट द्वोता क्रतुविद्विजानन् यजिष्ठो देवाँ ऋतुशो यजाति स्वाहा। अग्नय इदं न मम। भू स्वाहा। अग्नय इदं। भुवस्वाहा। वायव इदं न मम। सुवस्वाहा। सूर्यायेदं न मम। ओं भूभुवस्सुव स्वाहा। प्रजापतय इदं न मम। अस्मिन्... होम कर्मणि मध्ये संभाविते मन्त्र लोप तन्त्र लोप क्रिया लोप आज्य लोप पद लोप स्वर लोप न्यूनातिरिक्त समस्त विस्मृत विधि विपर्यास विध्यपराध प्रायश्चित्तार्थं सर्वप्रायश्चित्त होमं होष्यामि। ओं भूर्भुवस्सुवस्वाहा। प्रजापय इदं न मम। श्रीविष्णवे स्वाहा। विष्णवे परमात्मन इदं न मम। नमोरुद्राय पशुपतये स्वाहा। रुद्राय पशुपतय इदं न मम। अपउपस्पृश्य।

पूर्णाहुतिः

पूर्णाहुतिमुत्तमां जहोति। सर्वं वैपूर्णाहुतिः। सर्वमे-वाप्नोति। अथो इयं वै पूर्णाहुतिः। अस्यामेव प्रति तिष्ठति॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्रया देवा एकादश। त्रयस्त्रिँ शास्सुराधसः। बृहस्पति पुरोहिताः। देवस्य सवितुस्सवे। देवा देवै रवलु मा। प्रथमा द्वितीयैः। द्वितीया स्तृतीयैः। तृतीयास्सत्येन। सत्यं यज्ञन। यज्ञो यजुर्भिः। यजूँषि सामभिः। सामान्यृग्भिः। ऋचो याज्याभिः। याज्या वषट्कारैः। वषट्कारा आहुतिभिः। आहुतयो मे कामान्समर्द्धयन्तु। पुनस्वा दित्या रुद्रा वसवस्समिन्धतांपुन ब्रह्माणो वसुनीथा यज्ञैः। घृतेनत्वं तनुवो वर्धयस्व सत्यास्सन्तु यजमानस्य कामास्वाहा॥ सप्तते अग्ने समिधः सप्त जिह्वास्सप्त ऋषयस्सप्त धाम प्रियाणि। सप्तोत्राः सप्त धात्वा यजन्ति सप्त योनीरापृणस्वा घृणेन स्वाहा। अग्नये सप्त वत इदं। आज्यपात्र मुत्तरतो निधाय। प्रायश्चित्तं श्रीकृष्ण। प्राणायामः। परिषेचनं। अदितेन्वर्मस्थाः अनुमतेन्वमं स्थाः। सरस्वतेन्वम स्थाः। देवसवितः प्रासावीः। वरुणायनमः सकलाराधनैः स्वर्चितम्। प्रतिजलेमिश्रं प्राच्यां दक्षिणायां प्रतीच्यां उदीच्यां ऊर्ध्वायां अधः। आत्मानं पत्नीं च प्रोक्ष्य। ब्रह्मन् वरं ते ददामि। ब्रह्मणेनमः सकलाराधनैः स्वचितं॥ स्वाहा अग्नेरुप स्थानं करिष्ये। अग्नि सूक्तेन प्रदक्षिण नमस्मारान् कृत्वा मानो महालमुत मानो अर्भकं मान उक्षन्न

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मुत मान उक्षितम्। मानो वाधीः पितरं मोत मातरं प्रिया मानस्तनुवो रुद्र रीरिषः॥ इति अग्नेरुद्र त्तरतः हुत शेषेण बलिं दधात्॥

अथ यजमानः

(१) शंभो ब्रह्मशिरच्छेदिन् ब्रह्माण्डालय नायक।
नम उग्र महा भाग प्रथमार्घ्यं गृहाण भोः॥
महादेवादिभ्यो नमः इदमर्घ्यं इदमर्घ्यं इदमर्घ्यं।

(२) वेदान्तगम् सिद्धान्त यज्ञेश परमेश्वर।
समस्त जगदाधार द्वितीयार्घ्यं गृहाण भो॥
महा देवादिभ्यो नमः इदमर्घ्यं इदमर्घ्यं इदमर्घ्यं।

(३) सर्व स्वातन्त्र्य साम्राज्य सर्व यज्ञ फल प्रद।
दयाको भक्त संरक्ष तृतीयार्घ्यं गृहाण भोः॥
महा देवादिभ्यो नमः इदमर्घ्यं इदमर्घ्यं इदमर्घ्यं।

4. ब्रह्मादिभिः सुरेः सर्वैः स्तूयमान पदांबुज।
अंबिका रमण स्वामित् तुरीयार्घ्यं गृहाण भोः॥
महा देवादिभ्यो नमः इदमर्घ्यं इदमर्घ्यं इदमर्घ्यं॥

इति अर्घ्यं दधात्॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हिरण्य गर्भ गर्भस्थं हेम बीजं विभावसोः। अन्त पुण्य फलदं अतश्शान्तिं प्रयच्छमे॥ इदं उत्तराङ्गतया विहित गो प्रतिनिधि नाळकेरं दश दान पञ्चदान प्रत्याम्नायं यथा शक्ति हिरण्यं नाना गोत्रेभ्यः ब्राह्मणेभ्यः संप्रददे॥ न मम॥ कुंभे पुनः पूजां कृत्वा यथास्थानं प्रतिष्ठाप्य। देवस्यत्वेत्यादि मन्त्रेण प्रोक्ष्य तीर्थं प्राश्य ऋत्विक् आचार्यान् संपूज्य आशीर्वादं कृत्वा हारती॥) ओं तत्सत्

अथ त्रेधा विभागः

(१) नमस्ते रुद्र मन्यवे इत्यारभ्य नमः क्षतृभ्यस्संगृही-तृभ्यश्च वो नमस्तक्षभ्य स्स्वाहा॥

(२) रथ कारेभ्यश्च वो नम इत्यारभ्य नमस्तीक्ष्णे षवे चायुधिने च नम स्वायुधाय च स्वाहा॥

(३) सुधन्वने च नम इत्यारभ्य तं वो जंभे दधामि स्वाहा॥

अथान्य प्रकारः त्रेधा विभाग पक्षः

(१) नमस्ते रुद्र मन्यवे इत्यारभ्य श्वभ्य श्वपतिभय श्च वो नम स्स्वाहा इत्यन्तं अनुवाक चतुष्टयं एकाहुतिः॥

CC-0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(२) नमो भवाय च इत्यारभ्य नम नमस्सिकत्याय च प्रवाह्याय च स्वाहा इति मध्य अनुवाक चतुष्टयं द्वितीयाहुतिः ॥

(३) नम इरिण्याय च इत्यारम्भ तं वो जंभे दधामि स्वाहा इति अन्त्य अनुवाक त्रयस्य एकाहुतिः इति ॥

षोढा विभागः

षोढ़ा विभागे तु उपर्युक्त आहुति त्रयेण, अन्त्य नमो रुद्रेभ्यो ये पृथिव्यां इति मंत्रस्य त्रिधा अनुषंगेन षोढा विभाग संपद्यते ॥

षोडशधा विभागः

(१) नमस्ते रुद्र मन्यव इत्यारभ्य नमस्तक्षभ्य स्वाहा इत्यन्तं एकाहुतिः ॥

(२) रथकारेभ्य इत्युपक्रम्य स्वायुधाय च स्वाहा इति द्वितीयाहुतिः ॥

(३) सुधन्वने चेत्युपक्रम्य पराचीना मुखाकृति स्वाहा इति तृतीयाहुतिः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(४) सहस्त्राणि सहस्त्रशो ये इत्यारभ्य य एतावन्तश्च भूया ँ सश्च इत्यन्ता दशर्चः अनुषंगेन दशाहुतयः ॥

(५) नमो रुद्रेभ्य इति मन्त्रस्य त्रिधा अनुषंगेन त्रिधा हामः ॥ आहुत्य षोडश आहुतयः संपद्यते ॥

अथ अष्टाचत्वारिंशद्धा विभागः

(१) प्रथमानुवाके पंचदश मन्त्राः ॥

(२) ततः द्वितीयानुवाक मारभ्य नवमानुवाक पर्यन्तं एकैकानुवाकस्य एकैक होमः इति अष्ट होमाः ॥

(३) द्रापे अन्धसस्पते इति द्वादश मन्त्राः ॥

(४) सहस्त्राणि सहस्त्रशो इत्यस्य त्रयोदशा हुतयः ॥ इति ॥

एकोन सप्तत्यधिक शतधा विभागः

(१) प्रथमानुवाके पंचदश मंत्राः ॥

(२) नमो हिरण्य बाहवे इति त्रयोदश होमाः ॥

(३) नम स्सहमानाय इति सप्तदश होमाः ॥

(४) नम आव्याधिनीभ्यः इति सप्तदश होमाः ॥

CC-0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(५) नमो भवाय च इति पंचदश मन्त्राः ॥

(६) नमो ज्येष्ठाय च इति पंचदश मन्त्राः ॥

(७) नमो दुन्दुभ्याय च इति षोडश मन्त्राः ॥

(८) नम स्सोमाय च इति सप्तदश मन्त्राः ॥

(९) नम इरिण्याय च इति एकोन विंशति मन्त्राः ॥

(१०) द्रापे अन्धसस्पते इति द्वादश मन्त्राः ॥

(११) सहस्राणि सहस्रशो ये इति त्रयोदश होमाः ॥

आहत्य १६९ होमाः ॥

श्री रुद्र क्रम पाठः

गणानां त्वा। त्वा गणपतिं। गणपतिꣳहवामहे। गणपति मिति गण * पतिं। हवामहे कविं। कविङ्कवीनां। कवीना मुप मश्रवस्तमं। उप मश्रवस्तम मित्युप मश्रवः * तमं॥ ज्येष्ठराजं ब्रह्मणां। ज्येष्ठराज मिति ज्येष्ठ * राजं। ब्रह्मणां ब्रह्मणः। ब्रह्मणस्पते। पत आ। आनः। न श्रृण्वन्। श्रृण्वन्नूतिभिः। ऊतिभि स्सीद। ऊतिभि रित्यूति * भिः। सीद सादनं। सादन मिति सादनं॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

निधये सर्वविद्यानां श्री दक्षिणामूर्तये नमः॥

श्रुतिस्मृतिपुराणानामालयं करुणालयम्।
नमामि भवगत्पाद-शंकरं लोकशंकरम्॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अज्ञानान्तर्गहनपतितानात्मविद्योपदेशैः
त्रातुं लोकान् भवदवशिखातापपापच्यमानान्।
मुक्तवा मौनं वटविटपिनो मूलतो निष्पतन्ती
शम्भोर्मूर्तिश्चरति भुवने शंकराचार्यरूपा॥

सदाशिवसमारम्भां शंकराचार्यमध्यमाम्।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम्॥

बिल्वाष्टोत्तरस्तोत्रम्

त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रियायुषम्।
त्रिजन्मपापसंहारं एकबिल्वं शिवार्पणम्॥१॥

त्रिशाखैर्बिल्वपत्रैश्च अच्छिद्रैः कोमलैः शुभैः।
तव पूजां करिष्यामि एकबिल्वं शिवार्पणम्॥२॥

सर्वत्रैलोक्यकर्तारं सर्वत्रैलोक्यपालकम्।
सर्वत्रैलोक्यहर्तारं एकबिल्वं शिवार्पणम्॥३॥

नागाधिराजवलयं नागहारेणभूषितम्।
नागकुण्डलसंयुक्तं एकबिल्वं शिवार्पणम्॥४॥

अक्षमालाधरं रुद्रं पार्वतीप्रियवल्लभम्।
चन्द्रशेखरमीशानं एकबिल्वं शिवार्पणम्॥५॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्रिलोचनं दशभुजं दुर्गादेहार्धधारिणम्।
विभूतिचर्चितं देवं एकबिल्वं शिवार्पणम्॥६॥

त्रिशूलधारिणं देवं नागाभरणसुन्दरम्।
चन्द्रशेखरमीशानं एकबिल्वं शिवार्पणम्॥७॥

गङ्गाधरमुमानाथं फणिमण्डलमण्डितम्।
कालकालं गिरीशञ्च एकबिल्वं शिवार्पणम्॥८॥

शुद्धस्फटिकसंकाशं शितिकण्ठं कृपानिधिम्।
सर्वेश्वरं सदाशान्तं एकबिल्वं शिवार्पणम्॥९॥

सच्चिदानन्दरूपं च परानन्दमयं शिवम्।
वागीश्वरं चिदाकाशं एकबिल्वं शिवार्पणम्॥१०॥

शिपिविष्टं सहस्राक्षं दुन्दुभ्यञ्च निषङ्गिणम्।
हिरण्यबाहुं सेनान्यं एकबिल्वं शिवार्पणम्॥११॥

करुणं वामनं तारं वास्तव्यं शैववास्तुपम्।
ज्येष्ठं कनिष्ठं वैशालं एकबिल्वं शिवार्पणम्॥१२॥

हरिकेशं वनाधीशं उच्चैर्घोषं सनातनम्।
अघोररुपकं कुम्भं एकबिल्वं शिवार्पणम्॥१३॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पूर्वजावरजं याम्यं सूक्ष्मतस्करनायकम्।
नीलकण्ठं जघन्यञ्च एकबिल्वं शिवार्पणम्॥१४॥

सुराश्रयं बिषाहारं वर्मिणञ्च वरूथिनम्।
महासेनं महावीरं एकबिल्वं शिवार्पणम्॥१५॥

कुमारं कुशलं कूप्यं वदान्यञ्च महारथम्।
मायावार्यञ्च दिव्यञ्च एकबिल्वं शिवार्पणम्॥१६॥

दशकर्णं ललाटाक्षं पञ्चवक्त्रं सदाशिवम्।
अशेषपापसंहारं एकबिल्वं शिवार्पणम्॥१७॥

नीलकण्ठं जगद्वन्द्यं दीननाथं महेश्वरम्।
महापापहरं शम्भुं एकबिल्वं शिवार्पणम्॥१८॥

चूडामणीकृतविधुं वलयीकृतवासुकिम्।
कैलासनिलयं भौसं एकबिल्वं शिवार्पणम्॥१९॥

कर्पूरकुन्दधवलं नरकार्णवतारकम्।
करूणामृतसिन्धुञ्च एकबिल्वं शिवार्पणम्॥२०॥

महादेवं महात्मानं भुजङ्गाधिपकङ्कणम्।
महापापहरं देवं एकबिल्वं शिवार्पणम्॥२१॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भूतेशं खण्डपरशुं वामदेवं पिनाकिनम्।
वामे शक्तिधरं श्रेष्ठं एकबिल्वं शिवार्पणम्॥२२॥

फाले क्षणं विरूपाक्षं श्रीकण्ठं भक्तवत्सलम्।
नीललोहिनखट्वाङ्गं एकबिल्वं शिवार्पणम्॥२३॥

कैलासवासिनं भीमं कठोरं त्रिपुरान्तकम्।
वृषाङ्कं वृषभारूढं एकबिल्वं शिवार्पणम्॥२४॥

सामप्रियं स्वरमयं भस्मोद्धूलितविग्रहम्।
मृत्युञ्जयं लोकनाथं एकबिल्वं शिवार्पणम्॥२५॥

दरिद्र्यदुःखहरणं रविचन्द्रानलेक्षकम्।
मृगपाणिं चन्द्रमौलिं एकबिल्वं शिवार्पणम्॥२६॥

सर्वलाकमयाकारं सर्वलोकैकसाक्षिणम्।
निर्मलं निर्गुणाकरं एकबिल्वं शिवार्पणम्॥२७॥

सर्वतत्वात्मकं साम्बं सर्वतत्वविदूरकम्।
सर्वतत्वविरूपञ् च एकबिल्वं शिवार्पणम्॥२८॥

सर्वलोकगुरुं स्थाणुं सर्वलोकवरप्रदम्।
सर्वलोकस्य नेत्रञ्च एकबिल्वं शिवार्पणम्॥२९॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्मथोद्धरणं शैवं भवं भर्गं परात्मकम्।
कमलाप्रियपूज्यञ्च एकबिल्वं शिवार्पणम्॥३०॥

तेजोमयं महाभीमं स्मरभस्मविलेपनम्।
भवरोगविनाशञ्च एकबिल्वं शिवार्पणम्॥३१॥

स्वर्गापवर्गफलदं रघुनाथवरप्रदम्।
नागराजसुताकान्तं एकबिल्वं शिवार्पणम्॥३२॥

मञ्जीरपादयुगलं शुभलक्षणलक्षितम्।
फणिराजाविराजञ्च एकबिल्वं शिवार्पणम्॥३३॥

निरामयं निराधारं निस्सङ्गं निष्प्रपञ्चकम्।
तेजोरूपं महारौद्रं एकबिल्वं शिवार्पणम्॥३४॥

चित्राम्बरं चिदाभासं वृषभेश्वरवाहनम्।
नीलग्रीवं चतुर्वक्त्रं एकबिल्वं शिवार्पणम्॥३५॥

सर्वलोकैकपितरं सर्वलोकैकमातरम्।
सर्वलोकैकनाथञ्च एकबिल्वं शिवार्पणम्॥३६॥

रत्नकञ्चुकरत्नेशं रत्नकुण्डलमण्डितम्।
नवरत्नकिरीटञ्च एकबिल्वं शिवार्पणम्॥३७॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दिव्यरत्नाङ्गुलीकर्णरत्नाभरणभूषितम्।
नानारत्नं मणिमयं एकबिल्वं शिवार्पणम्॥३८॥

रत्नाङ्गुलीयविलसत्करशाखाधिकप्रभम्।
भक्तमानसगेहञ्च एकबिल्वं शिवार्पणम्॥३९॥

वामाङ्गभागबिलसदम्बिकावीक्षणप्रियम्।
पुण्डरीकनिभाक्षञ्च एकबिल्वं शिवार्पणम्॥४०॥

सम्पूर्णकामदं सौख्यं भक्तेष्टफलपूरकम्।
सौभाग्यदं हितकरं एकबिल्वं शिवार्पणम्॥४१॥

नानाशास्त्रगुणोपेतं स्फरन्मङ्गलविग्रहम्।
विद्याविभेदरहितं एकबिल्वं शिवार्पणम्॥४२॥

अप्रमेयगुणाधारं वेदकृद्रूपविग्रहम्।
धर्माधर्मप्रवृत्तञ्च एकबिल्वं शिवार्पणम्॥४३॥

गौरीबिलासदनं जीवजीवपितामहम्।
कल्पान्तंभैरवं शुभ्रं एकबिल्वं शिवार्पणम्॥४४॥

सुखदं सुखनाशञ्च दुखदं दुःखनाशनम्।
दुःखावधानं भद्रञ्च एकबिल्वं शिवार्पणम्॥४५॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुखरूपं रूपनाशं सर्वधर्मफलप्रदम्।
अतीन्द्रियं महामायं एकबिल्वं शिवार्पणम्॥४६॥

सर्वपक्षिमृगाकारं सर्वपक्षिमृगाधिपम्।
सर्वपक्षिमृगाधारं एकबिल्वं शिवार्पणम्॥४७॥

जीवाध्यक्षं जीववर्यं जीवजीवनरक्षकम्।
जीवकृज्जीवहरणं एकबिल्वं शिवार्पणम्॥४८॥

विश्वात्मानं विश्ववन्द्यं वज्रात्मवज्रहस्तकम्।
वज्रेशं वज्रभूषञ्च एकबिल्वं शिवार्पणम्॥४९॥

गणाधिपं गणाध्यक्षं प्रलयानलनाशकम्।
दिगम्बरं क्षोभनाशं एकबिल्वं शिवार्पणम्॥५०॥

त्रयम्बकं मृडं शूलमरिष्टवर्गनाशकम्।
जितेन्द्रियं वीरभद्रं एकबिल्वं शिवार्पणम्॥५१॥

कुन्देन्दुशंखधवलं भगनेत्राभिदुज्ज्वलम्।
कालाग्निरुद्रं सर्वज्ञं एकबिल्वं शिवार्पणम्॥५२॥

कम्बुग्रीवं कम्बुकण्ठं धैर्यदं धैर्यवर्धकम्।
शार्दूलचर्मवसनं एकबिल्वं शिवार्पणम्॥५३॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जगदुत्पत्तिहेतुञ्च जगत्प्रलयकारणम्।
पूर्णानन्दस्वरूपञ्च एकबिल्वं शिवार्पणम्॥५४॥

स्वर्णकेशं महत्तेजः पुण्यश्रवणकीर्तनम्।
ब्रह्माण्डनायकं तारं एकबिल्वं शिवार्पणम्॥५५॥

मन्दारमूलनिलयं मन्दारकुसुमप्रियम्।
वृन्दारकप्रियतरं एकबिल्वं शिवार्पणम्॥५६॥

महेन्द्रियं महाबाहुं विश्वासपरिपूरकम्।
सुलभासुलभं लभ्यं एकबिल्वं शिवार्पणम्॥५७॥

बीजाधारं वीजरूपं निर्बीजं बीजवृद्धिदम्।
परेशं बीज नाशञ्च एकबिल्वं शिवार्पणम्॥५८॥

युगाधरं युगाधीशं युगकृद्युगनाशकम्।
युगेशं युगनाशञ्च एकबिल्वं शिवार्पणम्॥५९॥

धूर्जटिं पिङ्गलजटं जटामण्डलमण्डितम्।
कर्पूरगौरं गौरीशं एकबिल्वं शिवार्पणम्॥६०॥

सुरावासं जनावासं योगीशं योगिपुंगवम्।
योगदं योगिनां सिहं एकबिल्वं शिवार्पणम्॥६१॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उत्तमानुत्तमं तत्वमन्धकासुरसूदनम्।
भक्तकल्पद्रुमं स्तव्यं एकबिल्वं शिवार्पणम्॥६२॥

विचित्रमाल्यवसनं दिव्यचन्दनचर्चितम्।
विष्णुब्रह्मादिवन्द्यञ्च एकबिल्वं शिवार्पणम्॥६३॥

कुमारपि[illegible] देवं सितचन्द्रकलानिधिम्।
ब्रह्मशत्रुं जगन्मित्रं एकबिल्वं शिवार्पणम्॥६४॥

लावण्यमधुराकारं करुणारसवारिधिम्।
भ्रुवोर्मध्ये सहस्त्रार्चिं एकबिल्वं शिवार्पणम्॥६५॥

जटाधरं पावकाक्षमृक्षेशं भुवनाश्रयम्।
कामदं सर्वदागम्यं एकबिल्वं शिवार्पणम्॥६६॥

शिवं शान्तमुमानाथं महाध्यानपरायणम्।
ज्ञानप्रदं कृत्तिवासं एकबिल्वं शिवार्पणम्॥६७॥

वासुक्युरगहारञ्च लोकानुग्रहकारणम्।
ज्ञानप्रदं कृत्तिधरं एकबिल्वं शिवार्पणम्॥६८॥

शशङ्कधारिणं भर्गं सर्वलोकैकशङ्करम्।
शुद्धश्च शाश्वतं नित्यं एकबिल्वं शिवार्पणम्॥६९॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शरणागतदीनार्तिपरित्राणपरायणम्।
गम्भीरॅश्च वषट्कारं एकबिल्वं शिवार्पणम्॥७०॥

भोक्तारं भोजनं भोज्यं जेतारं जितमानसम्।
करणं कारणं जिष्णुं एकबिल्वं शिवार्पणम्॥७१॥

क्षेत्रज्ञं क्षेत्रपालञ्च परार्थैकप्रयोजनम्।
व्योमकेशं भीमवेषं एकबिल्वं शिवार्पणम्॥७२॥

भाविजं तरुणोपेतं क्षेमदिष्ट्यमशासकम्।
हिरण्यगर्भं हेमाङ्गं एकबिल्वं शिवार्पणम्॥७३॥

दक्षञ्चामुण्डाजनकं मोक्षदं मोक्षदायकम्।
हिरण्यदं हेमरूपं एकबिल्वं शिवार्पणम्॥७४॥

महाश्मशाननिलयं प्रसन्नस्फटिकप्रभम्।
वेदाश्वं वेदरूपञ्च एकबिल्वं शिवार्पणम्॥७५॥

स्थिरं स्वधर्ममानाभं ब्रह्मण्यं चाश्रयं विभुम्।
जगन्निवासं प्रथं एकबिल्वं शिवार्पणम्॥७६॥

रुद्राक्षमालाभरणं रुद्राक्षप्रियवत्सलम्।
रुद्राक्षभक्तसंस्तव्यं एकबिल्वं शिवार्पणम्॥७७॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

फणीन्द्रविलसत्कण्ठफणीन्द्रवलयान्वितम्।
मुनिवन्द्यं मुनिश्रेष्ठं एकबिल्वं शिवार्पणम्॥७८॥

नागेन्द्रविलसत्कर्णं भुजङ्गाभरणप्रियम्।
दक्षाध्वरविनाशञ्च एकबिल्वं शिवार्पणम्॥७९॥

मृगेन्द्रचर्मवसनं मुनिसाध्यैकजीवनम्।
सर्वदेवादिपूज्यञ्च एकबिल्वं शिवार्पणम्॥८०॥

निधनेशं धनाधीशामपमृत्युविनाशनम्।
लिंगमूर्तिमलिंगाख्यं एकबिल्वं शिवार्पणम्॥८१॥

भक्तकल्याणदं व्यस्तं वेदवेदान्तसंस्तुतम्।
कल्पकृत्कल्पनाशञ्च एकबिल्वं शिवार्पणम्॥८२॥

घोरपातकदावाग्निं जन्मकर्मविवर्जितम्।
कपालमालाभरणं एकबिल्वं शिवार्पणम्॥८३॥

मातङ्गचर्मवसनं विराद्रूपविधारकम्।
विष्णुक्रान्तमनन्तञ्च एकबिल्वं शिवार्पणम्॥८४॥

यज्ञकर्मफलाध्यक्षं यज्ञविघ्नविनाशकम्।
यज्ञेशं यज्ञभोक्तारं एकबिल्वं शिवार्पणम्॥८५॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कालाधीशं त्रिकालज्ञं दुष्टनिग्रहकारकम्।
योगिमानसपूज्यञ्च एकबिल्वं शिवार्पणम्॥८६॥

महोन्नसं महाकायं महोदं महाभुजम्।
महावृत्तं महावक्त्रं एकबिल्वं शिवार्पणम्॥८७॥

सुनेत्रं सुललाटञ्च शर्वं भीमपराक्रमम्।
महेश्वरं शिवकरं एकबिल्वं शिवार्पणम्॥८८॥

समस्तजगदाधारं समस्तगुणसागरम्।
सत्यं सत्यगुणोपेतं एकबिल्वं शिवार्पणम्॥८९॥

माघकृष्णचतुर्दश्यां पूजार्थञ्च जगद्गुरोः।
दुर्लभं सर्वदेवानां एकबिल्वं शिवार्पणम्॥९०॥

तत्रापि दुर्लभं मन्ये नभो मासेन्दुवासरे।
प्रदोषकाले पूजा च एकबिल्वं शिवार्पणम्॥९१॥

सालग्रामेषु विप्राणां तटाकशनकूपयोः।
कोटिकन्यामहादानं एकबिल्वं शिवार्पणम्॥९२॥

दर्शनं बिल्ववृक्षस्य स्पर्शनं पापनाशनम्।
अघोरं पापसंहारं एकबिल्वं शिवार्पणम्॥९३॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तुलसी नीलनिर्गुण्ठां जम्बीरामलकं तथा।
अघोरपापसंहारं एकबिल्वं शिवार्पणम्॥९४॥

अखण्डबिल्वपत्रैश्च पूजयेन्नन्दिकेश्वरम्।
मुच्यते सर्वपापभ्यः एकबिल्वं शिवार्पणम्॥९५॥

सालङ्कृतं सतां वृन्ते कन्याकोटिसहस्त्रकम्।
साम्राज्यपृथिवीदानञ्च एकबिल्वं शिवार्पणम्॥९६॥

दशकोटितुरङ्गाणामश्वमेधसहस्त्रकम्।
साम्राज्यपृथिवीदानं एकबिल्वं शिवार्पणम्॥९७॥

चतुर्वेदसहस्त्राणि भारतादिपुराणकम्।
तुलाभारं शतावृत्ति एकबिल्वं शिवार्पणम्॥९८॥

सर्वरत्नमयं मेरुं काञ्चनं दिव्यवस्त्रकम्।
सवत्सधेनुकोटीनाम् एकबिल्वं शिवार्पणम्॥९९॥

अष्टोत्तरशनं बिल्वं योऽर्पयेल्लिङ्गमस्तके।
अथर्वोक्तं वदेद्यः स एकबिल्वं शिवार्पणम्॥१००॥

काशीक्षेत्रनिवासञ्च कालभैरवदर्शनम्।
अघोरपापसंहारं एकबिल्वं शिवार्पणम्॥१०१॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अष्टोत्तरशतश्लोकैः स्तोत्राद्यैः पूजयेद्यदा।
त्रिसन्यं मोक्षमाप्नोति एकबिल्वं शिवार्पणम्॥१०२॥

दन्तिकोटिसहस्त्राणां भूहिरण्यसहस्त्रकम्।
सर्वक्रतुमयं पुण्यम् एकबिल्वं शिवार्पणम्॥१०३॥

पुत्रपौत्रादिकं भोगं भुक्त्वा चात्र यथोप्सितम्।
अन्ते च शिवसायुज्यं एकबिल्वं शिवार्पणम्॥१०४॥

विप्रकोटिसहस्त्राणां भक्तगानाञ्च यत्फलम्।
तत्फलं प्राप्नुयात् सत्यं एकबिल्वं शिवार्पणम्॥१०५॥

त्वन्नामकीर्तनं तच्च तव पादाम्बुं यः पिवेत्।
जीवन्मुक्तो भवेन्नित्यं एकबिल्वं शिवार्पणम्॥१०६॥

अनेकदानफलकमनन्तसुकृतादिकम्।
तीर्थयात्राखिलं पुण्यम् एकबिल्वं शिवार्पणम्॥१०७॥

त्वं मां पालय सर्वत्र पदध्यानकृशं तव।
भवनं शाङ्करं नित्यं एकबिल्वं शिवार्पणम्॥१०८॥

एककाले पठेन्नित्यं सर्वशत्रुनिवारणम्।
द्विकाले च पठेन्नित्यं एकबिल्वं शिवार्पणम्॥१०९॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्रिकाले च पठेन्नित्यं मनोवाञ्छाफलप्रदम्।
अचिरात् कार्यसिद्धिञ्च लभते नात्र संशयः ॥११०॥

एककालं द्विकालं वा त्रिकालं यः पठेन्नरः।
लक्ष्मीप्राप्तिः शिवावासः शिवेन सह मोदते ॥१११॥

कोटिजन्मकृतं पापं अर्चनेन विनश्यति।
सप्तजन्मकृतं पापं श्रवणेन विनश्यति ॥११२॥

जन्मान्तरकृतं पापं श्रवणेन विनश्यति।
दिवारात्रिकृतं पापं दर्शनेने विनश्यति ॥११३॥

क्षणे क्षणे कृतं पापं स्मरणेन विनश्यति।
पुस्तकं धारयेद्देह आरोग्यं भयनाशकम् ॥११४॥

इति श्री शिवरहस्ये गौरीनारायण
संवादे बिल्वाष्टोत्तरशतस्तोत्र सम्पूर्णम्।

॥ शिव पञ्चाक्षर स्तोत्रं ॥

(शंकराचार्य)

नागेन्द्र हाराय त्रिलोचनाय भस्मांग रागाय महेश्वराय।
नित्याय शुद्धाय दिगंबराय तस्मै नकाराय नम श्शिवाय॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्दाकिनी सलिल चन्दन चर्चिताय नन्दीश्वर प्रमथनाथ महेश्वराय।
मन्दार मुख्य बहु पुष्प सु पूजिताय तस्मै **म**कार महिताय नम श्शिवाय॥
शिवाय गौरी वदनाब्ज बृन्द सूर्याय दक्षाध्वर नाशकाय।
श्री नीलकण्ठाय वृषध्वजाय तस्मै **शि**काराय नम श्शिवाय॥
वसिष्ठ कु भोद्भव गौत मार्य मुनिन्द्र देवार्चित शेखराय।
चन्द्रार्क वैश्वनार लोचनाय तस्मै **व**काराय नम श्शिवाय॥
यक्ष स्वरूपाय जटाधराय पिनाक हस्ताय सनातनाय।
दिव्याय देवाय दिगंबराय तस्मै **य**काराय नम श्शिवाय॥
पञ्चाक्षर मिदं पुण्यं यः पठेच्छिव सन्निधौ।
शिवलोक मावाप्नोति शिवेन सह मोदते॥

॥ लिंगाष्टकं ॥

१. ब्रह्म मुरारि सुरार्चित लिंगं - निर्मल भाषित शोभित लिंगं।
जन्मज दुःख विनाशक लिंगं - तत्प्रण मामि सदा शिव लिंगं॥

२. देव मुनि प्रवारार्चित लिंगं - काम दहं करुणाकर लिंगं।
रावणदर्प विनाशन लिंगं - तत्प्रणमामि सदाशिव लिंगं॥

३. सर्व सुगन्धि सुलेपित लिंगं - बुद्धि विवर्धन कारण लिंगं।
सिद्ध सुरा सुर वन्दित लिंगं - तत्प्रणमामि सदा शिव लिंगं॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

४. कनक महामणि भूषित लिंगं - फणि पति वेष्टित शोभित लिंगं।
दक्षसु यज्ञ विनाशन लिंगं - तत्प्रणमा मि सदा शिव लिंगं॥

५. कुंकुम चन्दन लेपित लिंगं - पंकज हार सुशोभित लिंगं।
सञ्चित पाप विनाशन लिंगं - तत्प्रणमा मि सदाशिव लिंगं॥

६. देव गणार्चित सेवित लिंगं - भावै र्भक्ति भि रेवच लिंगं।
दिनकर कोटि प्रभाकर लिंगं - तत्प्रणमा मि सदा शिव लिंगं॥

७. अष्ट दलो परि वेष्टित लिंगं - सर्व समुद्भव कारण लिंगं।
अष्ट दरिद्र विनाशित लिंगं - तत्प्रणमा मि सदा शिव लिंगं॥

८. सुर गुरु सुरवर पूजित लिंगं - सुरवन पुष्प सदार्चिव लिंगं।
परात्पंर परमात्मक लिंगं - तत्प्रणमामि सदा शिव लिंगं॥

श्री दुर्गा अष्टोत्तरशतनामावलि

ॐ देव्यै नमः
ॐ दुर्गायै नमः
ॐ त्रिभुवनेश्वर्वै नमः
ॐ यशोदागर्भ सम्भूतायै नमः
ॐ नारायणवरप्रियायै नमः
ॐ नन्दगोप कुलजातायै नमः
ॐ मंगल्यायै नमः
ॐ कुलवंर्धिन्यै नमः
ॐ कंसविद्रावणकर्यै नमः
ॐ असुर क्षयङ्कर्यै नमः (१०)
ॐ शिलातल विनिक्षिप्तायै नमः
ॐ आकाश गामिन्यै नमः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ वासुदेवपत्न्यै नमः

ॐ दिव्यमाल्य विभूषितायै नमः

ॐ दिव्याम्बरधरायै नमः

ॐ खड्ग केटक धारिण्यै नमः

ॐ शिवायै नमः

ॐ पापदारिण्यै नमः

ॐ वरदायै नमः

ॐ कृष्णायै नमः (२०)

ॐ कुमार्यै नमः

ॐ ब्रह्मधारिण्यै नमः

ॐ बालार्कसदृशाकारायै नमः

ॐ पूर्णचन्द्रनिभाननायै नमः

ॐ चतुर्भुजायै नमः

ॐ चतुर्वक्त्रायै नमः

ॐ पीनश्रोणिपयोधरायै नमः

ॐ मयूर पिञ्छ वलयायै नमः

ॐ केयूरांगदधारिण्यै नमः

ॐ कृष्णाच्छविसमायै नमः (३०)

ॐ कृष्णायै नमः

ॐ संकर्षणसमाननायै नमः

ॐ इन्द्रध्वज समबाहुधारिण्यै नमः

ॐ पात्रधारिण्यै नमः

ॐ पङ्कजधारिण्यै नमः

ॐ घण्टाधारिण्यै नमः

ॐ धनुर्धारिण्यै नमः

ॐ महाचक्रधारिण्यै नमः

ॐ विविधायुधधरायै नमः

ॐ कुण्डलपूर्णकर्ण विभूषितायै नमः (४०)

ॐ चन्द्रविस्फुरित मुख विराजितायै नमः

ॐ मुकुटविराजितायै नमः

ॐ शिखिपिञ्छध्वज विराजितायै नमः

ॐ कौमार व्रत धरायै नमः

ॐ त्रिदिव पावयित्र्यै नमः

ॐ त्रिदश पूजितायै नमः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ त्रैलोक्यरक्षिण्यै नमः

ॐ महिषासुर नाशिन्यै नमः

ॐ प्रसन्नायै नमः

ॐ सुर श्रेष्ठायै नमः (५०)

ॐ शिवायै नमः

ॐ जयायै नमः

ॐ विजयायै नमः

ॐ संग्रामजय प्रदायै नमः

ॐ वरदायै नमः

ॐ विन्ध्य वासिन्यै नमः

ॐ काळ्यै नमः

ॐ काल्यै नमः

ॐ महाकाळ्यै नमः

ॐ सुधाप्रियायै नमः (६०)

ॐ मांसप्रियायै नमः

ॐ पशुप्रियायै नमः

ॐ भूतानुसृतायै नमः

ॐ वरदायै नमः

ॐ कामचारिण्यै नमः

ॐ पापहरिण्यै नमः

ॐ पापहरिण्यै नमः

ॐ कीर्त्यै नमः

ॐ क्रियै नमः

ॐ धृत्यै नमः (७०)

ॐ सिद्धयै नमः

ॐ हियै नमः

ॐ विद्यायै नमः

ॐ सन्तत्यै नमः

ॐ मत्यै नमः

ॐ सन्ध्यायै नमः

ॐ रामायै नमः

ॐ प्रभायै नमः

ॐ निद्रायै नमः

ॐ ज्योत्स्नायै नमः (८०)

ॐ कान्त्यै नमः

ॐ क्षमायै नमः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ दयायै नमः

ॐ बन्धननाशिन्यै नमः

ॐ मोहनाशिन्यै नमः

ॐ पुत्रापमृत्युनाशिन्यै नमः

ॐ धनक्षयनाशिन्यै नमः

ॐ व्याधि नाशिन्यै नमः

ॐ मृत्यु नाशिन्यै नमः

ॐ भयनाशिन्यै नमः (९०)

ॐ पद्मपत्राक्ष्यै नमः

ॐ दुर्गायै नमः

ॐ शरण्यायै नमः

ॐ भक्तवत्सलायै नमः

ॐ सौख्यदायै नमः

ॐ आरोग्यदायै नमः

ॐ राज्यदायै नमः

ॐ आयुर्द्दायै नमः

ॐ वपुर्द्दायै नमः

ॐ सुतदायै नमः (१००)

ॐ प्रवास रक्षिकायै नमः

ॐ नगर रक्षिकायै नमः

ॐ संग्राम रक्षिकायै नमः

ॐ शत्रुसङ्कट रक्षिकायै नमः

ॐ अटवीदुर्ग कान्तार रक्षिकायै नमः

ॐ सागर गिरि रक्षिकायै नमः

ॐ सर्वकार्य सिद्धि प्रदायिकायै नमः

ॐ दुर्गापरमेश्वर्यै नमः (१०८)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्री दक्षिणामूर्ति

गुरवे सर्वलोकानां भिषजे भवरोगिणां।
निधये सर्वविद्यानां दक्षिणामूर्तये नमः॥

ॐ नमः प्रणवार्थाय शुद्धज्ञानैक मूर्तये।
निर्मलाय प्रशान्ताय दक्षिणामूर्तये नमः॥

वटविटपिसमीपे भूमि भागे निषण्णं
सकलमुनिजनानां ज्ञानदातारमारात्।
त्रिभुवनगुरुमीशं दक्षिणामूर्तिदेवं
जनन मरण दुःख च्छेद दक्षं नमामि॥

श्री दक्षिणामूर्ति अष्टोत्तरशतनामावलि

ॐ ओंकार सिंहसर्वेन्द्राय नमः
ॐ ओंकारोद्यान कोकिलाय नमः
ॐ ओंकार नीडशुक राजे नमः
ॐ ओंकारारण्य कुञ्जराय नमः
ॐ नगराज सुताजानये नमः
ॐ नगराज निजालयाय नमः
ॐ नवमाणिक्य मालाढ्याय नमः
ॐ नवतन्त्र शिखामणये नमः
ॐ नन्दिताशेष मौनीन्द्राय नमः
ॐ नन्दीशादिम देशिकाय नमः (१०)
ॐ मोहानल सुधासाराय नमः
ॐ मोहाम्बुज सुधाकराय नमः
ॐ मोहन्धकार तारणाय नमः
ॐ मोहोत्पल नभोमणये नमः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ भक्तज्ञाननाब्धि शीतांशवे नमः
ॐ भक्ताज्ञान तृणानलाय नमः
ॐ भक्ताम्भोज सहस्त्रांशवे नमः
ॐ भक्तकेकि घनाघनाय नमः
ॐ भक्तकैरव राकेन्दवे नमः
ॐ भक्तकोक शिवाकराय नमः (२०)
ॐ गजाननादि संपूजाय नमः
ॐ गजचर्मोज्ज्वलाग्रतये नमः
ॐ गंगाधवळ दिव्यांगाय नमः
ॐ गंगा पङ्क लसज्जटाय नमः
ॐ गगनाम्बर संवीताय नमः
ॐ गगनामुक्त मूर्तजाय नमः
ॐ वदनाब्ज जिताब्जश्रिये नमः
ॐ वननेन्दु स्फुरन्दीशाय नमः
ॐ वरदानैक निपुणाय नमः
ॐ वरवीणोज्ज्वलत्कराय नमः (३०)
ॐ वनवास समुल्लासाय नमः
ॐ वनवीरैक लोलुपाय नमः
ॐ तेजः पुञ्जक नाकाराय नमः
ॐ तेजसामभिभासकाय नमः
ॐ विधेयानां तेजः प्रदाय नमः
ॐ तेजोमय निजाश्रमाय नमः
ॐ दमितानङ्ग संग्रामाय नमः
ॐ दरहास जितांगनाय नमः
ॐ दयारस सुधासिंधवे नमः
ॐ दरिद्र धनशेवतये नमः (४०)
ॐ क्षीरेन्दु स्फटिकाकाराय नमः
ॐ क्षीरेन्दु मुकुटोज्ज्वलाय नमः
ॐ क्षीरोपहार रसिकाय नमः
ॐ क्षिप्रैश्वर्य फल प्रदाय नमः
ॐ नानाभरण मुग्ध्दांगाय नमः
ॐ नारी सम्मोहनाग्रतये नमः
ॐ नाद ब्रह्म रसास्वादिने नमः
ॐ नाग भूषण भूषिताय नमः
ॐ मूर्ति निन्दित कन्दर्पाय नमः
ॐ मूर्तामूर्त जगद्वपुषे नमः (५०)
ॐ मूकाज्ञान तमोभानवे नमः
ॐ मूर्तिमत्कल्प पादपाय नमः
ॐ तरुणादित्य सङ्काशाय नमः
ॐ तन्त्री वरदान तत्पराय नमः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ तरुमूलैक निलयाय नमः
ॐ तप्तजाम्बू नदप्रभाय नमः
ॐ तत्वपुस्तोल्लसत्पाणये नमः
ॐ तपनोडुप लोचनाय नमः
ॐ यमसन्नुत सत्कीर्तये नमः
ॐ यमसंयम संयुताय नमः (६०)
ॐ यतिरूप धराय मौनिने नमः
ॐ यतीन्द्रोपास्य विग्रहाय नमः
ॐ मन्दारहार रुचिराय नमः
ॐ मन्दारायुध सुन्दराय नमः
ॐ मन्दस्मित लसत्वक्त्राय नमः
ॐ मधुराधर पल्लवाय नमः
ॐ मञ्जीर मञ्जु पादाब्जाय नमः
ॐ मणिपट्टोल्लसत्कटये नमः
ॐ हस्ताङ्कुरित चिन्मुद्राय नमः
ॐ हठयोग परोत्तमाय नमः (७०)
ॐ हंसजप्याक्ष मालाढ्याय नमः
ॐ हंसेन्द्राराद्धय पादुकाय नमः
ॐ मेरुश्रृंग तटोल्लसाय नमः
ॐ मेघ श्याम मनोहराय नमः

ॐ मेधांकुराल वालाग्रयाय नमः
ॐ मेधापक्व फलद्रुमाय नमः
ॐ धार्मिकान्तर्गुहावासाय नमः
ॐ धर्मार्क प्रवर्तकाय नमः
ॐ धर्मत्रय निजारामाय नमः
ॐ धर्मोत्तम मनोरथाय नमः (८०)
ॐ प्रबोधोत्कार दीपश्रिये नमः
ॐ प्रकाशित शिलाचन्द्राय नमः
ॐ प्रज्ञाचन्द्र शिलाचन्द्राय नमः
ॐ प्रज्ञामणि वराकराय नमः
ॐ ज्ञान्तरान्तर भासात्मने नमः
ॐ ज्ञातृज्ञाति विदूरकाय नमः
ॐ ज्ञातृज्ञाद्वैत दिव्यांगाय नमः
ॐ ज्ञातृज्ञाति कुलागताय नमः
ॐ प्रपन्न पारिजाताग्रयाय नमः
ॐ प्रणतार्त्यब्धि पाटलाय नमः (९०)
ॐ भूतानां प्रमाण भूताय नमः
ॐ प्रपञ्च वीतकारकाय नमः
ॐ यत्तत्वमसि संवेद्याय नमः
ॐ यक्षकेयात्म वैभवाय नमः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ यज्ञादि देवतामूर्तय नमः
ॐ यजमान वपुर्धराय नमः
ॐ छत्राधिपति पिश्वेशाय नमः
ॐ छत्रचामर सेविताय नमः
ॐ छन्दश्शास्त्रादि निपुणाय नमः
ॐ छलजात्यादि दूरकाय नमः (१००)
ॐ स्वाभाविक सुखैकात्मने नमः
ॐ स्वानुपुत्र सौधदये नमः
ॐ स्वाराज्य सम्पद्धयक्षाय नमः
ॐ स्वात्माराम महामतये नमः
ॐ हाटकाभ जटाजूटाय नमः
ॐ हासोतस्तारि मण्डलाय नमः
ॐ हालाहलोज्ज्वल गळाय नमः
ॐ हारायुध मनोहराय नमः (१०८)
ॐ श्री दक्षिणामूर्तये नमः

नवग्रहः सूक्तम्

ॐ आसत्येन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च। हिरण्ययेन सविता रथेनाऽऽदेवो याति भुवना विपश्यन्॥ अग्निं दूतं वृणीमहे होतारं विश्ववेदसम्। अस्य यज्ञस्य सुक्रतुम्। येषामीशे पशुपतिः पशूनां चतुष्पदामुत च द्विपदाम्॥ निष्क्रीतोऽयं यज्ञियं भागमेतु रायस्पोषा यजमानस्य सन्तु॥ ॐ अधिदेवता-प्रत्यधिदेवता सहिताय आदित्याय नमः॥ १॥

ॐ अग्निमूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम्। अपागंरे तागंसि जिन्वति॥ स्योना पृथिवि भवाऽनृक्षरा निवेशनी। यच्छानश्शर्म सप्रथाः॥ क्षेत्रस्य पतिना वयगंहिते

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नेव जयामसि। गामश्वं पोषयित्नवा स नो मृडातीदृशे ॥ ॐ अधिदेवता-प्रत्यधिदेवतासहिताय अङ्गारकाय नमः ॥ २ ॥

ॐ प्रवश्शुक्राय भानवे भरध्वम्। हव्यं मतिं चाग्नये सुपूतम्। यो दैव्यानि मानुषा जनूगंषि। अन्तर्विश्वानि विद्म ना जिगाति॥ इन्द्राणीमासु नारिषु सुपत्नीमहमश्रवम्। न ह्यस्या अपरचन जरसा मरते पतिः॥ इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः। अस्माकं-मस्तु केवलः॥ ॐअधिदेवता-प्रत्यधिदेवता-सहिताय शुक्राय नमः॥ ३॥

ॐ आप्यायस्व समेतु ते विश्वतस्सोम वृष्णियम्। भवा वाजस्य संगथे॥ अप्सुमे सोमो अब्रवीदन्तर्विश्वानि भेषजा। अग्निञ्च विश्वशंभुवमापश्च विश्वभेषजीः॥ गौरी मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी। अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमेव्योमन्॥ ॐ अधिदेवता-प्रत्यधिदेवता-सहिताय सोमाय नमः॥ ४॥

ॐ उद्बुध्यस्वाग्ने प्रतिजागृह्येनमिष्टापूर्ते संग्सृजेथा-मयञ्च। पुनः कृण्वग्ग्स्त्वा पितरं युवानमन्वाता-गंसीत्त्वयि तन्तुमेतम्॥ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पागंसुरे॥ विष्णो रराटमसि विष्णोः पृष्ठमसि विष्णोश्शनप्त्रे स्थो विष्णोस्स्यूरसि विष्णो र्ध्रुवमसि

CC0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वैष्णवमसि विष्णवे त्वा॥ ॐ अधिदेवता-प्रत्यधिदेवता-सहिताय बुधाय नमः॥ ५॥

ॐ बृहस्पते अतियदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु। यद्दीदयच्चवसर्तप्रजात तदस्मासु द्रविणन्धेहि चित्राम्॥ इन्द्रमरुत्व इह पाहि सोमं यथा शार्याते अपिबस्सुतस्य। तव प्रणीती तव शूरशर्मन्नाविवासन्ति कवयस्सुयज्ञाः॥ ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतस्सुरुचो वेन आवः। सबुध्नियां उपमा अस्य विष्ठास्सतश्च योनिमसतश्च विवः॥ ॐ अधिदेवता प्रत्यधिदेवतासहिताय बृहस्पतये नमः॥ ६॥

ॐ शन्नो देवीरभिष्टय आपो भवन्तु पीतये। शंयोरभिस्त्रवन्तु नः॥ प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव। यत्कामास्ते जुहुमस्तन्नो अस्तु वयग्ग्स्याम पतयो रयीणाम्॥ इमं यमप्रस्तरमहि सीदाऽङ्गिरोभिः पितृभिस्संविदानः। आत्वा मन्त्राः कविशस्ता वहन्त्वेना राजन् हविषा मादयस्व॥ ॐ अधिदेवता प्रत्यधिदेवता सहिताय शनैश्चराय नमः॥ ७॥

ॐ कया नश्चित्र आभुवदूती सदावृधस्सखा। कया शचिष्ठया वृता॥ आयङ्गौः पृश्निरक्रमीदसनन्मातरं पुनः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पितरञ्च प्रयन्त्सुवः ॥ यत्ते देवी निर्ऋतिराबबन्ध दाम ग्रीवास्वविचर्त्यम् ॥ इदन्ते तद्विष्याम्यायुषो न मध्यादथाजीवः पितुमद्भि प्रमुक्तः ॥ ॐ अधिदेवता-प्रत्यधिदेवता-सहिताय राहवे नमः ॥ ८ ॥

ॐ केतुङ्कृण्वन्नकेतवे पेशो मर्या अपेशसे ॥ समुषद्भिरजायथाः ॥ ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम् । श्येनो गृध्राणागुंस्वधितिर्वनानागुंसोमः पवित्रमत्येति रेभन् ॥ सचित्रचित्रं चितयन्न्तमस्मे चित्रक्षत्र चित्रतमं वयोधाम् । चन्द्रं रयिं पुरुवीरं बृहन्तं चन्द्रचन्द्राभिर्गृणते युवस्व ॥ ॐ अधिदेवता-प्रत्यधिदेवाता-सहितेभ्यः केतुभ्यो नमः ॥९ ॥

॥ ॐ आदित्यादि नवग्रह देवताभ्यो नमो नमः ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नक्षत्रसूक्तम्

तै. ब्राः अष्टकम्- ३ प्रश्नः १ तै. संहिताः कां-२ प्रपाठक- ५ अनु-१

ॐ॥ अग्निर्नः पातु कृत्तिकाः। नक्षत्रं देवमिन्द्रियम्। इदमासां विचक्षणम्। हविरासं जुहोतन। यस्य भान्ति रश्मयो यस्य केतवः। यस्येमा विश्वा भुवनानि सर्वा। सकृत्तिकाभिरभिसंवसानः। अग्निर्नो देव स्सुविते दधातु॥ १॥

आग्नये स्वाहा कृत्तिकाभ्यः स्वाहा।

अम्बायै स्वाहा दुलायै स्वाहा।

नितत्न्यै स्वाहाऽभ्रयन्त्यै स्वाहा।

मेघयन्त्यै स्वाहा वर्षयन्त्यै स्वाहा।

चुपुणीकायै स्वाहा।

प्रजापते रोहिणीवेतु पत्नी। विश्वरूपा बृहती चित्रभानुः। सा नो यज्ञस्य सुवि ते दधातु। यथा जीवेम शरदस्सवीराः। रोहिणी देव्युदगात्पुरस्तात्। विश्वा रूपाणि प्रतिमोदमाना। प्रजापतिगं हविषा वर्धयन्ती। प्रिया देवानामुपयातु यज्ञम्॥ २॥

प्रजापतये स्वाहा रोहिण्यै स्वाहा।

रोचमानायै स्वाहा प्रजाभ्यः स्वाहा।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सोमो राजा मृगशीर्षेण आगन्। शिवं नक्षत्रं प्रियमस्य धाम। आप्यायमानो बहुधा जनेषु। रेतः प्रजां यजमाने दधातु। यत्ते नक्षत्रं मृगशीर्षमस्ति। प्रियगं राजन् प्रियतमं प्रियाणाम्। तस्मै ते सोम हविषा विधेम। शन्न एधि द्विपदे शं चतुष्पदे॥ ३॥

सोमाय स्वाहा मृगशीर्षाय स्वाहा।
इन्वकभ्यः स्वाहौषधीभ्यः स्वाहा।
राज्याय स्वाहाऽभिजित्यै स्वाहा।

आर्द्रया रुद्रः प्रथमा न एति। श्रेष्ठो देवानां पतिरघ्नियानाम्। नक्षत्रमस्य हविषा विधेम। मानः प्रजागं रिरिषन्मोत वीरान्। हेती रुद्रस्य परिणो वृणक्तु। आर्द्रा नक्षत्रं जुषतागं हविर्नः प्रमुंचमानौ दुरितानि विश्वा। अपाघशगंसन्न[illegible]मरातिम्॥ ४॥

रुद्राय स्वाहाऽऽर्द्रायै स्वाहा।
पिन्वमानायै स्वाहा पशुभ्यः स्वाहा॥

पुनर्नो देव्यदितिस्स्पृणोतु। पुनर्वसूनः पुनरेतां यज्ञम्। पुनर्नो देवा अभियन्तु सर्वे। पुनः पुनर्वो हविषा यजामः। एवा न देव्यदितिरनर्वा। विश्वस्य भर्त्री जगतः प्रतिष्ठा। पुनर्वसू हविषा वर्धयन्ती। प्रियं देवाना-मप्येतु पाथः॥ ५॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अदित्यै स्वाहा पुनर्वसुभ्याम्।

स्वाहा भृत्यै स्वाहा प्रजात्यै स्वाहा ॥

बृहस्पतिः प्रथमं जायमानः। तिष्यं नक्षत्रमभिसंबभूव। श्रेष्ठो देवानां पृतनासुजिष्णुः। दिशो नु सर्वा अभयन्नो अस्तु। तिष्यः पुरस्तादुत मध्यतो नः। बृहस्पतिर्नः परिपातु पश्चात्। बाधेतान्द्वेषो अभयं कृणुताम्। सुवीर्यस्य पतयस्स्याम॥ ६॥

बृहस्पतये स्वाहा तिष्याय स्वाहा।

ब्रह्मवर्चसाय स्वाहा ॥

इदगं् सर्पेभ्यो हविरस्तु जुष्टम्। आश्रेषायेषा मनुयन्ति चेतः। ये अन्तरिक्षं पृथिवीं क्षियन्ति। तेनस्सर्पासो हवमागमिष्ठाः। ये रोचने सूर्यस्यापि सर्पाः। ये दिवं देवीमनुसंचरन्ति। येषा माश्रेषा अनुयन्ति कामम्। तेभ्यस्सर्पेभ्यो मधुमज्जुहोमि॥ ७॥

सर्पेभ्यः स्वाहाऽऽश्रेषाभ्यः स्वाहा।

दन्तशूकेभ्यः स्वाहा।

उपहूताः पितरो ये मघासु। मनोजवसस्सुकृतस्सुकृत्याः। ते नो नक्षत्रे हव मागमिष्ठाः। स्वधाभिर्यज्ञं प्रयतं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जुषन्ताम्। ये अग्निदग्धा येऽनग्निदग्धाः येऽमुल्लोकं पितरः, क्षियन्ति। यागंश्च विद्मयागं उ च न प्रविद्म। मधासु यज्ञगं सुकृतं जुषन्ताम्॥ ८॥

पितृभ्यः स्वाहा मधाभ्यः। स्वाहा ऽनघाभ्यः स्वाहाऽगदाभ्यः। स्वाहाऽरुन्धतीभ्यः स्वाहा"।

गवां पतिः फल्गुनीनामसि त्वम्। तदर्यमन् वरुणमित्र चारु। तं त्वा वयगं सनितारगं सनीनाम्। जीवा जीवन्तमुपसंविशेम। येनेमा विश्वा भुवनानि संजिता। यस्य देवा अनु संयन्ति चेतः। अर्यमा राजाऽजरस्तु विष्मान्। फल्गुनीनामृषभो रोरवीति॥ ९॥

अर्यम्णे स्वाहा फल्गुनीभ्यां स्वाहा"। पशुभ्यः स्वाहा"।

श्रेष्ठो देवानां" भगवो भगासि। तत्त्वा विदुः फल्गुनीस्तस्य वित्तात्। अस्मभ्यं क्षत्रमजरगं सुवीर्यम्"। गोमदश्ववदुपसन्नुदेह। भगोह दाता भग इत्प्रदाता। भगो देवीः फल्गुनीराविवेश। भगस्येत्तं प्रसवं गमेम। यत्र देवैस्सधमादं" मदेम॥ १०॥

भगायस्वाहा फल्गुनीभ्यां स्वाहा"। श्रैष्ठ्याय स्वाहा"।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आयातु देवस्सवितोप यातु। हिरण्ययेन सुवृता रथेन। वहन् हस्तगं सुभगं विद्मनापसम्। प्रयच्छन्तं पपुरिं पुण्यमच्छ। हस्तः प्रयच्छ त्वमृतं वसीयः। दक्षिणेन प्रतिगृभ्णीम एनत्। दाता रमद्य सविता विदेय। यो नो हस्ताय प्रसुवाति यज्ञम्॥ ११॥

सवित्रेस्वाहा हस्ताय। स्वाहा ददतेस्वाहा पृणते।

स्वाहा प्रयच्छते स्वाहा प्रतिगृभ्णते स्वाहा।

त्वष्टा नक्षत्रमभ्येति चित्राम्। सुभगं ससंयुवतिगं रोचमानाम्। निवेशयन्नमृतान्मर्त्यांगंश्च। रूपाणि पिगंशन् भुवनानि विश्वा। तन्नस्त्वष्टा तदु चित्रा विचष्टाम्। तन्नक्षत्रं भूरिदा अस्तु मह्यम्। तन्नः प्रजां वीरवतीगं सनोत्। गोभिर्नो अश्वैस्समनक्तु यज्ञम्॥ १२॥

त्वष्ट्रे स्वाहा चित्रायै स्वाहा।

चैत्राय स्वाहा प्रजायै स्वाहा।

वायुर्नक्षत्रमभ्येति निष्ट्याम्। तिग्मशृंगो वृषभो रोरुवाणः। समीरयन् भुवना मातरिश्वा। अप द्वेषागंसि नुदतामरातीः। तन्नो वायुस्तदु निष्ट्या शृणोतु। तन्नक्षत्रं भूरिदा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अस्तु मह्यम् । तन्नो देवासो अनु जानन्तु कामम् । यथा तरेम दुरितानि विश्वा ॥ १३ ॥

वायवे स्वाहा निष्ट्यायै स्वाहा ।

कामचाराय स्वाहाऽभिजित्यै स्वाहा ।

दूरमस्मच्छत्रवो यन्तु भीताः । तदिन्द्राग्नी कृणुतां तद्विशाखे । तन्नो देवा अनुमदन्तु यज्ञम् । पश्चात् पुरस्तादभयन्नो अस्तु । नक्षत्राणामधि पत्नी विशाखे । श्रेष्ठाविन्द्राग्नी भुवनस्य गोपौ । विषूचश्शत्रूनपबाधमानौ । अपक्षुधन्नुदता-मरातिम् ॥ १४ ॥

इन्द्राग्निभ्याꣳ स्वाहा विशाखाभ्याꣳ स्वाहा

श्रैष्ठ्याय स्वाहाऽभिजित्यै स्वाहा ।

पूर्णा पश्चादुत पूर्णा पुरस्तात् । उन्मध्यतः पौर्णमासी जिगाय । तस्यां देवा अधिसंवसन्तः । उत्तमे नाक इह मादयन्ताम् । पृथ्वी सुवर्चा युवतिः सजोषाः । पौर्णमास्युदगाच्छोभमाना । आप्याययन्ती दुरितानि विश्वा । उरुंदुहां यजमानाय यज्ञम् ॥ १५ ॥

पौर्णमास्यै स्वाहा कामाय स्वाहा गत्यै स्वाहा ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ऋद्ध्यास्महव्यैर्नमसोपसद्य। मित्रं देवं मित्रधेयं नो अस्तु। अनूराधान् हविषा वर्धयन्तः। शतं जीवेम शरदः सवीराः। चित्रं नक्षत्रमुदगात्पुरस्ता"त्। अनूराधा स इति यद्वदन्ति। तन्मित्र एति पथिभिर्देवयानै"ः। हिरण्ययै-र्विततै-रन्तरिक्षे॥ १६॥

मित्राय स्वाहाऽनूराधेभ्यः स्वाहा"।

मित्रधेयाय स्वाहाऽभिजित्यै स्वाहा"।

इन्द्रो" ज्येष्ठामनु नक्षत्रमेति। यस्मिन् वृत्रं वृत्र तूर्ये ततार। तस्मिन्वय-ममृतं दुहानाः। क्षुधन्तरेम दुरितिं दुरिष्टिम्। पुरन्दराय वृषभाय धृष्णवे"। अषाढाय सहमानाय मीढुषे"। इन्द्राय ज्येष्ठा मधुमद्दुहाना। उरुं कृणोतु यजमानाय लोकम्॥ १७॥

इन्द्रायस्वाहा ज्येष्ठायै स्वाहा"।

ज्यैष्ठ्याय स्वाहाऽभिजित्यै स्वाहा"।

मूलं प्रजां वीरवतीं विदेय। परा" च्येतु निर्ऋतिः पराचा। गोभिर्नक्षत्रं पशुभिस्समक्तम्। अहर्भूयाद्य जमानाय मह्यम्"। अहर्नो अद्य सुविते दधातु। मूलं नक्षत्रमिति यद्वदन्ति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पराची वाचा निर्ऋतिं नुदामि। शिवं प्रजायै शिवमस्तु मह्यम् ॥ १८ ॥

प्रजापतये स्वाहा मूलायस्वाहा। प्रजायै स्वाहा।

या दिव्या आपः पयसा संबभूवुः। या अन्तरिक्ष उत पार्थि वीर्याः। यासा-मषाढा अनुयन्ति कामम्। ता न आपः शग्गं स्योना भवन्तु। याश्च कूप्या याश्च नाद्याः स्समुद्रियाः। याश्च वैशन्तीरुत प्रासचीर्याः। यासामषाढा मधु भक्षयन्ति। ता न आपः शग्गं स्योना भवन्तु॥ १९ ॥

अद्भ्यः स्वाहाऽषाढाभ्यः स्वाहा।

समुद्राय स्वाहा कामाय स्वाहा। अभिजित्यै स्वाहा।

तन्नो विश्वे उप शृण्वन्तु देवाः। तदषाढा अभिसंयन्तु यज्ञम्। तन्नक्षत्रं प्रथतां पशुभ्यः। कृषिर्वृष्टि र्यजमानाय कल्पताम्। शुभ्राः। कन्या युवतयस्सुपेशसः। कर्मकृतस्सुकृतो वीर्यावतीः। विश्वान् देवान्, हविषा वर्धयन्तीः। अषाढाः काममुपयान्तु यज्ञम्॥ २० ॥

विश्वेभ्यो देवेभ्यः स्वाहाऽषाढाभ्यः स्वाहा

अनपजय्याय स्वाहा जित्यै स्वाहा॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यस्मिन् ब्रह्माभ्यजयत्सर्व मेतत्। अमुंच लोक-मिदमूच सर्वम्"। तन्नो नक्षत्र-मभिजिद्विजित्य। श्रियं दधात्वहणीयमानम्। उभौ लोकौ ब्रह्मणा संजितेमौ। तन्नो नक्षत्रमभिजिद्विचष्टाम्। तस्मिन्वयं पृतनास्संजयेम। तन्नो देवासो अनु जानन्तु कामम्" ॥ २१॥

ब्रह्मणे स्वाहाऽभिजिते स्वाहा"।

ब्रह्मलोकाय स्वाहाऽभिजित्यै स्वाहा"।

शृण्वन्ति श्रोणा-ममृतस्य गोपाम्। पुण्यामस्या उपशृणोमि वाचम्"। महीं देवीं विष्णुपत्नीमजूर्याम्। प्रतीचीमेनाग्ं हविषा यजामः। त्रेधा विष्णु-रुरुगायो विचक्रमे। महीं दिवं पृथिवी-मन्तरिक्षम्। तच्छ्रोणैति श्रव इच्छमाना। पुण्यग्ग् श्लोकं यजमानाय कृण्वती॥ २२॥

विष्णवे स्वाहा" श्रोणायै स्वाहा"।

श्लोकाय स्वाहा" श्रुतायस्वाहा"।

अष्टौ देवा वसवस्सोम्यासः। चतस्रो देवी-रजराः श्रविष्ठाः। ते यज्ञं पा"न्तु रजसः पुरस्"तात्। संवत्सरीण-ममृतग्ग् स्वस्ति। यज्ञं नः पान्तु वसवः पुरस्"तात्। दक्षिणतोऽभियन्तु

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रविष्ठाः। पुण्यन्नक्षत्रमभिसंविशाम। मा नो अरातिरघशगंसागन्॥ २३॥

वसुभ्यः स्वाहा श्रविष्ठाभ्यः स्वाहा।

अग्राय स्वाहा परौत्यैस्वाहा।

क्षत्रस्य राजा वरुणोऽधिराजः। नक्षत्राणागं शतभिषग्वसिष्ठः। तौ देवेभ्यः कृणुतो दीर्घमायुः। शतगं सहस्रा भेषजानिधत्तः। यज्ञन्नो राजा वरुण उपयातु। तन्नो विश्वे अभि संयन्तु देवाः। तन्नो नक्षत्रगं शतभिषग्जुषाणम्। दीर्घमायुः प्रतिरद्भेषजानि॥ २४॥

वरुणायस्वाहा शतभिषजे स्वाहा। भेषजेभ्यः स्वाहा।

अज एकपादुदगात्पुरस्तात्। विश्वा भूतानि प्रतिमोदमानः। तस्य देवाः प्रसवं यन्ति सर्वे। प्रोष्ठपदासो अमृतस्य गोपाः। विभ्राजमानस्समिधा न उग्रः। आऽन्तरिक्षमरुहदागन्द्याम्। तगं सूर्यं देव-मजमेकपादम्। प्रोष्ठपदासो अनुयन्ति सर्वे॥ २५॥

अजायैकपदे स्वाहा प्रोष्ठपदेभ्यः स्वाहा।

तेजसे स्वाहा ब्रह्मवर्चसाय स्वाहा।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अहिर्बुध्नियः प्रथमा न एति। श्रेष्ठो देवानामुत मानुषाणाम्। तं ब्राह्मणास्सोमपास्सोम्यासः। प्रोष्ठपदासो-अभिरक्षन्ति सर्वे। चत्वार एकमभि कर्म देवाः। प्रोष्ठपदा स इति यान् वदन्ति। ते बुध्नियं परिषद्यग्ग् स्तुवन्तः। अहिग्ं रक्षन्ति नमसोपसद्य॥ २६॥

अहये बुध्नियाय स्वाहा प्रोष्ठपदेभ्यः स्वाहा।

प्रतिष्ठायै स्वाहा।

पूषा रेवत्यन्वेति पन्थाम्। पुष्टिपती पशुपा वाजबस्त्यौ। इमानि हव्या प्रयताजुषाणा। सुगैर्नोयानैरुपयातां यज्ञम्। क्षुद्रान् पशून् रक्षतु रेवती नः गावो नो अश्वाग्ं अन्वेतु पूषा। अन्नग्ं रक्षन्तो बहुधा विरूपम्। वाजग्ं सनुतां यजमानाय यज्ञम्॥ २७॥

पूष्णे स्वाहा रेवत्यै स्वाहा। पशुभ्यः स्वाहा।

तदश्विनावश्वयुजोपयाताम्। शुभंगमिष्ठौ सुयमेभिरश्वैः। स्वं नक्षत्रग्ं हविषा यजन्तौ। मध्वासंपृक्तौ यजुषा समक्तौ। यौ देवानां भिषजौ हव्यवाहौ। विश्वस्य दूता-वमृतस्य गोपौ। तौ नक्षत्रं जुजुषाणोपयातम्। नमोऽश्विभ्यां कृणुमोऽश्वयुग्भ्याम्॥ २८॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अप पाप्मानं भरणीर्भरन्तु। तद्यमो राजा भगवान् विचष्टाम्। लोकस्य राजा महतो महान् हि। सुगं नः पन्थामभयं कृणोतु। यस्मिन्नक्षत्रे यम एति राजा। यस्मिन्नेनमभ्यषिंचन्त देवाः। तदस्य चित्रगं हविषा यजाम। अप पाप्मानं भरणीर्भरन्तु॥ २९॥

निवेशनी संगमनी वसूनां विश्वा रूपाणि वसू न्यावेशयन्ती। सहस्र-पोषगं सुभगा रराणा सा न आगन्वर्चसा संविदाना। यत्ते देवा अदधुर्भागधेयममावास्ये संवसन्तो महित्वा। सा नो यज्ञं पिपृहि विश्ववारे रयिन्नो धेहि सुभगे सुवीरम्॥ ३०॥

ॐ शान्तिः शान्तिः शान्तिः॥

पञ्च शान्तिः

शं नो मित्रः शं वरुणः। शं नो भवत्वर्यमा। शं न इन्द्रो बृहस्पतिः। शं नो विष्णुरुरुक्रमः। नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वमेव प्रत्यक्षं ब्रह्म वदिष्यामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतु माम्। अवतु वक्तारम्॥ ॐ शान्तिः शान्तिः शान्तिः॥ १॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शं नो मित्रः शं वरुणः। शं नो भवत्वर्यमा। शं न इन्द्रो बृहस्पतिः। शं नो विष्णुरुरुक्रमः। नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वामेव प्रत्यक्षं ब्रह्मावादिषम। ऋतम वादिषम। सत्यम वादिषम। तन्मामावित। तद्वक्तारमावीतु। आवीनमाम्। आवीद्वक्तारम्॥ ॐ शान्तिः शान्तिः शान्तिः॥ २॥

सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै। तेजस्विनावधीतमस्तु मा विद्विषावहै॥ ॐ शान्तिः शान्तिः शान्तिः॥ ३॥

ॐ नमो वाचे या चोदिता या चानुदिता तस्यै वाचे नमो नमो वाचे नमो वाचस्पतये नम ऋषिभ्यो मन्त्रकृद्भ्यो मन्त्रपतिभ्यो मामामृषयो मन्त्रकृतो मन्त्रपतयः परादुर्माऽहमृषीन्मन्त्रकृतो मन्त्रपतीन्परादां वैश्वदेवीं वाचमुद्यासगं शिवामदस्तांजुष्टां देवेभ्यः शर्म मे द्यौः शर्म पृथिवी शर्म विश्वमिदं जगत्। शर्म चन्द्रश्च सूर्यश्च शर्म ब्रह्मप्रजापती। भूतं वदिष्ये भुवनं वदिष्ये तेजो वदिष्ये यशो वदिष्ये तपो वदिष्ये ब्रह्म वदिष्ये सत्यं वदिष्ये तस्मा अहमिदमुपस्तरण-मुपस्तृण उपस्तरणं मे प्रजायै पशूनां भूयादुपस्तरणमहं प्रजायै पशूनां भूयासं प्राणापानौ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मृत्योर्मापात प्राणापानौ मा माहासिष्टं मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासगं शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवन्तु शोभायै पितरोऽनुमदन्तु ॥४॥

ओं शान्तिः शान्तिः शान्तिः ॥

ॐ तच्छं योरावृणीमहे। गातुं यज्ञाय। गातुं यज्ञपतये। दैवी स्वस्तिरस्तु नः। स्वस्तिर्मानुषेभ्यः। ऊर्ध्वं जिगातु भेषजम्। शं नो अस्तु द्विपदे। शं चतुष्पदे ॥५॥

ॐ शान्तिः शान्तिः शान्तिः ॥

आभिर्गीर्भिर्यदतोन ऊनमाप्यायय हरिवो वर्धमानः। यदास्तोतृभ्यो महि गोत्रा रुजासि भूयिष्ठभाजो अध ते स्याम। ब्रह्म प्रावादिष्म तन्नो मा हासीत ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection